मङ्गलाचरणम्, आचमनम्-१६३। आसनपूजा, प्राणायामः, चक्रचिन्तनम्-१६४। सृष्टि-स्थिति-संहारक्रमेण यन्त्रोद्धारः पूजाच-१६५। जलशोधनं श्रीचक्रराजे आयतनपूजनम्, साम्बायतनपूजनम्-१६६। द्वारदेवतापूजनम्-१६७। तिरस्करिणीध्यानं मन्त्रोद्धारश्च-१६६। भूतापसारणम्-२००। पूर्वद्वारार्चनम्-२०१। दक्षिणद्वारार्चनम्, पश्चिमद्वारार्चनम्-२०२। उत्तरद्वारार्चनम्, ऊर्ध्वद्वारार्चनम्-२०३। मन्दिरार्चनम्:२०५। षोढान्यासस्वरूपम्, अङ्गषोढा, अधराम्नायषोढान्यासः, पूर्वाम्नायषोढान्यासः दक्षिणाम्नायषोढान्यासः-२१२। पश्चिमाम्नायषोढान्यासः, उत्तराम्नायषोढान्यासः, ऊर्ध्वाम्नायालघुषोढान्यासः-२१३। ऊर्ध्वाम्नायमहाषोढान्यासः, पात्रसाधनम्-२१४। प्रथमावरणार्चनम्-२२१। द्वितीयावरणार्चनम्-२२४। तृतीयावरणार्चनम्-२२५। सर्वसंक्षोभणचक्रम्-२२६। पूर्वाम्नायसमष्टिक्रमः-२२८ पञ्चमावरणार्चनम्-२२६। षष्ठावरणार्चनम्-२३०। सप्तमावरणार्चनम्-२३२। दक्षिणाम्नायसमष्टिः-२३३। अष्टमावरणार्चनम्-२३४। गुरुस्मरणम्-२३५। नवमावरणार्चनम्-२३७। दशमावरणार्चनम्-२३६। पश्चिमाम्नायसमष्टिक्रमः, एकादशावरणार्चनम्-२४०। (त्रिपदा) गायत्र्याः प्रत्यक्षरं द्वात्रिंशन्नामानि-२४१। चतुष्पदागायत्री, द्वादशावरणार्चनम्-२४२ दशमहाविद्याः, समष्टिपूजनम्-२४३। त्रयोदशावरणार्चनम्-२४४। चतुर्दशावरणार्चनम्-२४५। पञ्चदशावरणार्चनम्-२४६। षोडशावरणार्चनम्-२४७। समष्टिपूजनम्-२४८।

# अथ महाषोढान्यासस्य विषयसूची

हंसषोढोपनिषत्—१

**तारामहाषोढान्यासः—**

विनियोगादिः, शिवकलान्यासः २। ग्रहन्यासः ४। दिक्पालन्यासः, षट्चक्रन्यासः, तारादिन्यासः ५। पीठन्यासः ६।

**भुवनेश्वरीमहाषोढान्यासः —**

विनियोगादिः, परान्यासः ६। परात्परान्यासः ८। परात्परातीतान्यासः १०। चित्परान्यासः ११। चित्परात्परान्यासः, चित्परात्परातीतान्यासः १३।

**महाकालीमहाषोढान्यासः—**

विनियोगादिः १५। ग्रहन्यासः, राशिन्यासः १६। नक्षत्रन्यासः १७। योगन्यासः १६। करणन्यासः, संवत्सरन्यासः २०।

**पश्चिमाम्नाय-कुब्जिकामहाषोढान्यासः—**

विनियोगादिः २१। न्यासाः २२। द्वात्रिंशद्वर्णन्यासः २२। षडङ्ग-हृदयादिन्यासः २४। ग्रन्थिन्यासः, अघोरन्यासः २५। मालिनीन्यासः २६। शब्दराशिन्यास २८। षड्दूतीन्यासः २६। रत्नपञ्चकन्यासः ३०। नवात्मन्यासः, हृदयादिन्यासः, छोटिकान्यासः अघोरास्त्रन्यासः, द्वात्रिंशद्वर्णन्यासः ३१। एकाक्षरीन्यासः, त्रिविद्यान्यासः, घोराष्टकन्यासः रुद्रखण्डन्यासः ३२। मातृखण्डन्यासः, त्रिखण्डान्यासः ३३। बीजपञ्चकन्यासः, पादादिषट्कन्यासः ३४।

**पञ्चक्रमकालिका** (उत्तराम्नाये)—

विनियोगादिः उग्रमातृक्रमन्यासः ३५। कालीकुलक्रमन्यासः ३६। कालीकुलक्रमः ३८। योगिनीन्यासः ४०। देवतान्यासः ४१। मन्त्रन्यासः ४२। बलिदानमन्त्रः ४३। श्रीकुब्जिकाकवचमालामन्त्रस्तोत्रम् ४४। सृष्टिवज्रकुब्जिका (पश्चिमाम्नाये) ४५।

**श्रीविद्या-लघुषोढान्यासः—**

विनियोगादिः ५२। गणेशन्यासः ५३। ग्रहन्यासः ५५। नक्षत्रन्यासः ५६। योगिनीन्यासः ५७। राशिन्यासः ६०। पीठन्यासः ६१।

**श्रीविद्या-षोढान्यासः**—(ऊर्ध्वाम्नायस्य)

सिद्धेश्वरीन्यासः ६४। परमेश्वरीन्यासः ६६। महाविद्यान्यासः, महाकालाधीश्वरीन्यासः ६७। बीजकलान्यासः ६८। चरणन्यासः ६६।

**श्रीविद्या-महाषोढान्यासः—**

विनियोगादिः, अङ्गुलीन्यासः, देहन्यासः, वक्त्रन्यासः, कर-हृदयादिन्यासौ ७१। प्रपञ्चन्यासः ७२। भुवनन्यासः ७३। मूर्त्तिन्यासः ७४। मन्त्रन्यासः ७६। देवतान्यासः ७८। मातृकाभैरवन्यासः ८०। श्रीविद्या-महाशक्तिन्यासस्तोत्रम् ८२।

સમરીતિર્મહાતેજાઃ પરબ્રહ્મ સનાતનઃ।
જયતાજ્જાનકીનાથો વેદવેદ્યો મહામતિઃ ॥
ankurnagpal108@gmail.com

॥ ॐ नमस्त्रिपुरसुन्दर्यै ॥

## श्रीमदाद्य-शङ्कराचार्य-विरचितं

# यतिदण्डैश्वर्य-विधानम्

१. मङ्गलाचरणम् —

प्रणम्य परमात्मानं, सच्चिदानन्दमद्वयम् ।
यतिदण्डस्य माहात्म्यं, वच्मि संन्यासिनामहम् ॥ १ ॥[1]

२. दण्ड-महिमा —

सुरासुरमनुष्याणां, वज्रास्त्र - शस्त्र - शक्तिवत् ।
निगमागममन्त्राणां, विधानेन प्रतिष्ठितः ॥१७॥
नित्योपासनया सिद्धः, साक्षाद् देवायुधोपमः ।
शास्त्रोक्त-विधिना प्राप्तो, यतिदण्डो विशिष्यते ॥१८॥
विष्णुहस्ते यथा चक्रं, शूलं शिवकरे यथा ।
इन्द्रहस्ते यथा वज्रं, तथा दण्डो यतेः करे ॥१९॥

३. दण्डस्य प्रणवात्मकता —

प्रणवस्य प्रतिकृतिर्दण्डः संन्यासिनां मतः ।
प्रणवोऽस्ति यतः साक्षादद्वैत - ब्रह्मबोधकः ॥२०॥
शब्दब्रह्मात्मना सोऽयं, महानिर्वाणबोधकः ।
परमाद्वैतरूपेण, यस्माद् दण्डे प्रतिष्ठितः ॥२१॥

१. प्रथमश्लोकानन्तरं पञ्चदश श्लोका अपठिताः सन्त्यतः श्लोकसङ्ख्याऽग्रे सप्तदश दत्ताऽस्ति । इतोऽग्रेऽपि यत्र यत्र श्लोकानां विलोपो विद्यते तत्र तत्रैव-मेव सङ्ख्यायोगः कृतो विद्यत इति ज्ञेयम् ।



४. दण्डस्य प्रणव-मात्रा शिववक्त्राम्नाय-तत्त्वचक्रं दिशोपदिशापूर्वकं श्रीचक्रात्मकत्वञ्च —

ओङ्कारमात्रा एवात्र, सन्ति शम्भुमुखानि वै ।
शिवाननानि चाम्नाया, आम्नायास्तत्त्वरूपिणः ॥२२॥
तत्त्वान्येव हि चक्राणि, चक्राण्यथ दिशो मताः ।
दिश एवोपदिशो वै, भवन्त्येव न संशयः ॥२३॥
सर्वाण्येतानि संयुज्य, यान्ति श्रीचक्ररूपताम् ।
तस्माच्छ्रीचक्रात्मकत्वं, यतिदण्डस्य वर्णितम् ॥२४॥
तदेवं स्मरणाद् न्यासाद्, भावनात् पूजनात्तथा ।
यतिदण्डो भवेत् साक्षाच्छ्रीयन्त्रात्मक उत्तमः ॥२५॥
चक्रराजप्रतीकोऽयं, दण्डो भवति नान्यथा ।
एतद् बुद्ध्वैव सन्धार्यो, भावना चात्र सिद्धिदा ॥२६॥

५. यतिदण्डे प्रणवादिचक्रान्तानां सर्वेषामैक्यम् —

यतिदण्डे च प्रणवे, मात्रासु प्रणवस्य च ।
शिववक्त्रेषु चाम्नायेष्वथ तत्त्वेषु दिक्षु वै ॥२७॥
विदिशासु तथा श्रीमच्चक्रराजेऽपि सर्वथा ।
न कश्चिद् विद्यते भेदो, भेदकृन्निरयं व्रजेत् ॥२८॥
तारे दण्डे च पिण्डे च, ब्रह्माण्डे यन्त्रराजके ।
न कञ्चिद् भावयेद् भेदं, यतिस्तत्त्वार्थचिन्तकः ॥२९॥
दण्डे पिण्डे च ब्रह्माण्डे, श्रीचक्रे च सरूपताम् ।
ध्यात्वा शुभ–फलावाप्तिर्नाल्पस्य तपसः फलम् ॥३०॥
आम्नायोपाम्नाययुता, सृष्ट्यादिक्रमकल्पना ।
यतिदण्डे विधातव्या, प्रणवादिवदेव हि ॥३१॥
मूलाधारादि - चक्राणां, यथा पिण्डे विभावना ।
कार्या तथैव दण्डेऽपि, षट्चक्राणां विभावना ॥३२॥

श्रीचक्रस्य यथा देहे, क्रियते परिकल्पना ।
तथैव कार्या दण्डेऽपि, सर्वदा परिकल्पना ॥३३॥

६. यतिदण्ड-स्वरूपम् —

दृढवंशभवः शुष्कश्चारु - पर्व - विभूषितः ।
पवित्रभूमिसम्प्राप्तो, दण्डः संन्यासिनां भवेत् ॥३४॥

७. स्थूलादि-मानम् —

स्यादङ्गुष्ठस्थ - पर्वाढ्या, यतिदण्डस्य स्थूलता ।
तथा कनिष्ठान्त्यकृशा, शिखा तस्य प्रकीर्तिता ॥३५॥

८. आकार-विमर्शः —

पादाङ्गुष्ठाच्छिखान्तः स्याद्, गृहीतुर्दण्ड उत्तमः ।
तत एव च दण्डः स्याद्, भालं यावच्च मध्यमः ॥३६॥
पादाङ्गुष्ठान्नासिकान्तो, यतिदण्डोऽधमः स्मृतः ।
आकृतेरेष नियमः, स्वीकार्यो ह्यथवा पुनः ॥३७॥
हस्तौ प्रसारितौ कृत्वा, मध्यमाङ्गुलियुग्मयोः ।
स्पर्शं यावत् प्रलम्बस्तु, यतिदण्डः शुभो भवेत् ॥३८॥
मध्यमोऽनामिकास्पर्शः, कनिष्ठास्पृक् तथाऽधमः ।
एवं विचार्य क्रियते, दण्डोऽयं यतिभिः सदा ॥३९॥

९. यतिदण्डस्य प्रकारास्तेषां नामानि च —

पञ्च प्रकारा दण्डस्य, पूर्वाचार्यैः प्रदर्शिताः ।
ग्रन्थीनां संख्यया भेदा, भवन्त्येते यथाक्रमम् ॥४०॥
षड्भिः "सुदर्शन" स्तत्राऽष्टभि "र्नारायणो" भवेत् ।
"गोपालो" दशकैः प्रोक्तो, "वासुदेवो"ऽथ मास[12]युक् ॥४१॥
मनु[14]ग्रन्थिमयो"ऽनन्त"स्तत ऊर्ध्वं न धारयेत् ।
पञ्च प्रकारा एवैते, यतिदण्डस्य निश्चिताः ॥४२॥



१०. यतिदण्डस्य त्रयो भागाः —

सर्वेषां यतिदण्डानां, त्रयो भागा भवन्त्यथ ।
ग्रन्थीनां क्रमतस्तेषां, निर्णयो भवति ध्रुवम् ॥४३॥
अधो - मध्योत्तरा भागाः, क्रमशः परिकीर्तिताः ।
स्थूलो भवेदधोभागो, मध्यो मध्यम उच्यते ॥४४॥
उत्तरस्तु कृशस्तस्मादिति संवीक्ष्य गृह्यते ।
नातिस्थूलो नातिकृशो, यतिदण्डो विधीयते ॥४५॥

११. यतिदण्डे मुद्राद्वयम् —

ब्रह्ममुद्रा पर्शुमुद्रा, नाम्ना मुद्राद्वयं स्मृतम् ।
मुद्रां विना यतो दण्डः, केवलं काष्ठमेव सः ॥४६॥

१२. यतिदण्डे ब्रह्मसूत्र-विचारः —

किञ्चात्र ब्रह्मसूत्राणां, चतुरुत्तर–विंशतेः ।
दण्डसूत्रं भवेदेकमिति संन्यासिनां मतम् ॥४७॥
अष्टादश - द्वाविंशति - सूत्राणामपि भेदतः ।
दण्डसूत्राणि जायन्ते, तीर्थ - वाणी[1] - विभागतः ॥४८॥

१३. ब्रह्मसूत्रमानम् —

त्रिवृत्क्रम - विधानेन, तन्तूनामनुवर्तनात् ।
षण्णवत्यङ्गुलमितं, ब्रह्मसूत्रमिति स्मृतम् ॥४९॥
षडुत्तरैषा नवतिश्चतुर्विंशति – संख्यया ।
गुणिता चेद् भवेत् सङ्ख्या, चतुःखाग्निद्विसम्मिता ॥५०॥
तिथिर्वारश्च नक्षत्रं, तत्त्वं वेदा गुणत्रयम् ।
कालत्रयं हि मासाश्च, ब्रह्मसूत्रे हि षण्णवे ॥५१॥

१. तीर्थाश्रम–(इति पाठभेदः)

१४. ब्रह्ममुद्रास्थानम् —

**भागद्वयोत्तरं ब्रह्ममुद्रा – स्थानं तु निश्चितम् ।**
**अथवा नाभिपर्यन्तं, पादाग्राद् दण्डगं भवेत् ॥५२॥**

१५. परशुमुद्रास्थानम् —

**ब्रह्ममुद्रोत्तरं मुद्रा, परशोस्तु निधीयते ॥५३॥**
**प्रणवाकारता तस्याः, प्रथिता यतिमण्डले ॥५४॥**

१६. ब्रह्ममुद्रा-विधानम्—

**अधस्तात् पर्शुमुद्राया, ब्रह्ममुद्रा विधीयते ।**
**प्रदक्षिणं समावेष्ट्य, दण्डसूत्रैः समन्ततः ॥५५॥**
**ब्रह्ममुद्रा विधातव्या, चतुरङ्गुलमायता ।**
**चतुर्थे वलये तत्र, धेनुमुद्रां यथाक्रमात् ॥५६॥**
**विरचय्य विधातव्या, शङ्खमुद्रापि शोभना ।**
**ततः प्रणवमात्राख्यां, [1]शेषमुद्रां च शोभिताम् ॥५७॥**
**विधाय ग्रन्थयेद् ग्रन्थिं, सुदृढां ब्रह्मसूचिकाम् ।**
**एवं दण्डे विधातव्या, ब्रह्ममुद्रा यथाविधि ॥५८॥**
**सार्धत्रिवलयाकारं ... ... ...[2] ॥५९॥**

१७. परशुमुद्राविधानम्[3] ( परशुमुद्रायाः पटमानं तत्साधनं परशुमुद्रा-निर्माणविधिश्च )—

**गृह्णीयान्मसृणं वासः, पूर्वं शुद्धमथाक्षतम् ।**
**भवेद् यदष्टचत्वारिंशदङ्गुलीमितमायतम् ॥६०॥**
**स्यात् षोडशाङ्गुलायामं, रञ्जयेत् तत् प्रयत्नतः ।**
**काषायेणैव रागेण, स दण्डो नियतात्मवान् ॥६१॥**
**प्राग्विस्तारस्योभयतः, परावृत्य तटद्वयम् ।**
**तदाष्टाङ्गुलविस्तारं, कुर्यादुभयतः समम् ॥६२॥**

---

१. मुद्राशेषसुशोभिताम् इति पाठा० । २. एतच्चिह्नाङ्कितभागेषु लिखिताः पंक्तयः खण्डिताः सन्ति तस्मात् पठितुं न पारिताः । ३. पर्शु० इति पाठा० ।



**ततः पुनर्मध्यतस्तत्, परावृत्य यथायथम् ।**
**विस्तारमानतः कुर्याच्चतुरङ्गुलशेषितम् ॥६३॥**
**चतुरङ्गुल ... ... ... त्रि ... ... ॥६४॥**
**यथैवमेकतस्तत् स्यात्, चतुरङ्गुलविस्तृतम् ।**
**अन्यतश्चाष्टचत्वारिंशदङ्गुलमितं क्रमात् ॥६५॥**
**अथायामं चोभयतः, प्रकल्प्य चतुरंशकम् ।**
**एकैकभागं प्रथमं, परावर्त्य प्रयत्नतः ॥६६॥**
**सप्तधा वेष्टितं कृत्वा, निर्मितं परशोश्चरेत् ।**
**तत्र त्रिधा विभागाच्च, सा मुद्रा साध्यते सदा ॥६७॥**
**ततस्तां दण्ड-सूत्रेण, दण्डे संयोज्य यत्नतः ।**
**विधिवत्तत्र बध्नीयाद्, यतिः श्रद्धासमन्वितः ॥६८॥**
**... ... ... ... ... ॥६९॥**
**एवं षडङ्गुलायामा, चतुरङ्गुलविस्तरा ।**
**भवेत् परशुमुद्रैषा, दण्डिनां योगसिद्धिदा ॥७०॥**

पाठान्तरम्—

**ततश्चतुर्षु भागेषु, स्थापयेत् समतां नयन् ।**
**उपर्युपरि विन्यस्य, क्रमेणैवं विशुद्धधीः ॥७१॥**
**पुनः परशुमुद्रायां, त्रिषु खण्डेषु संस्थितम् ।**
**वासस्तद् दण्डब्रह्माण्डे, संन्यसेच्च यथाविधि ॥७२॥**
**ततस्तद्दण्डसूत्रेण, बध्नीयात् सुदृढं यतिः ।**
**यद् भवेद् धारणं युक्तं, तद् धार्यं दण्डिभिः सदा ॥७३॥[1]**
**... ... ... ... ...**
**... ... ... ... ... ॥७६॥**

१८. सुदर्शनाख्ये यतिदण्डे षडाम्नायभावना —

**रस [1]ग्रन्थि - समायुक्ते, यतिदण्डे सुदर्शने ।**
**प्रति-ग्रन्थि तथा ग्रन्थि-मध्ये तत्र विधानतः ॥७७॥**

---

१. इतोऽग्रे त्रयः श्लोकाः पठितुं न पारिताः ।

आम्नायाः परिकल्प्यन्ते, सर्वेऽपि यतिसाधकैः ।
सशक्तिकानां मात्राणां, प्रतिष्ठा च विधीयते ॥७८॥
अधस्तादादिम – ग्रन्थौ, पूर्वाम्नाय उदाहृतः ।
द्वितीयस्यां दक्षिणः स्यात्, तत्रैवाद्याऽथ भावना ॥७९॥
तृतीयस्यां पश्चिमः स्याच्चतुर्थ्यामुत्तरः स्मृतः ।
उपाम्नायाश्च तत्रैषां, मध्ये मध्य उदीरिताः ॥८०॥
उपाम्नाय - समष्टिश्च, पञ्चम्यां यतिभिः स्मृता ।
ऊर्ध्वाम्नायस्तथा प्रोक्तः, षष्ठ्यां ग्रन्थौ विचक्षणैः ॥८१॥
एवं सुदर्शनो दण्डो, [१]सर्वाम्नायैर्विभूषितः ।
यतिहस्ते धृतो नित्यं, धर्मरक्षण-सक्षमः ॥८२॥

१९. सुदर्शनाख्ये यतिदण्डे श्रीचक्रभावना —

श्रीचक्रकल्पना दण्डे, यथा संसाध्यतेऽथ सा ।
प्रोच्यते क्रमशः षट्सु, ग्रन्थिषु प्रतिपादिता ॥८३॥
अधःस्थायामाद्यग्रन्थौ, भूपुरं च त्रिवृत्तकम् ।
षोडशारं नागदलं, भावयेद् यतिसाधकः[२] ॥८४॥
द्वितीयस्यां च मन्वस्र - दशारयुगलं तथा ।
तृतीयस्यामष्टकोणं, त्रिकोणं च विभावयेत् ॥८५॥
श्रीचक्रे प्रथमो बिन्दुः, पञ्चदश्यात्मको भवेत् ।
ग्रन्थौ चतुर्थ्यां क्रियते, तस्य नित्यं विभावना ॥८६॥
द्वितीयस्तत्र बिन्दुर्योऽनाख्यात्मक उदाहृतः ।
पञ्चम - ग्रन्थि-मध्ये तु, कर्तव्या तस्य भावना ॥८७॥
तृतीयस्तत्र यो बिन्दुर्भासात्मक उदाहृतः ।
षष्ठ्यां ग्रन्थौ विधातव्या, यतिभिस्तस्य भावना ॥८८॥

१. दशाम्नायैः । पा०
२. पाठान्तरं— 'साधको यतिः' ।



द्वि-चतुः-षडष्ट-दश-कूटानां समयात्मिका ।
राशि[१२] संख्यक-कूटा च, मनु[१४] संख्यान्विता ततः ॥८९॥
तथा षोडशकूटाख्या, महात्रिपुरसुन्दरी ।
निर्वाणविद्याऽप्यत्रैव, न्यस्तव्या सिद्धिदायिनी ॥९०॥

२०. विश्वधर्मस्य रक्षाकृच्छ्रीयन्त्रस्यात्र भावना —

विश्वधर्मस्य रक्षाकृच्छ्रीयन्त्रस्यात्र भावना ।
सुप्रतिष्ठा च कर्तव्या, शक्तियुक्तस्य साधकैः ॥९१॥
ऐश्वर्ययुक्त - ब्रह्मत्व - प्रदातुश्च विभावना ।
कर्तव्या ब्रह्ममुद्रायां, श्रीयन्त्रस्य तथैव हि ॥९२॥
परैश्वर्यस्य सदनं[१], जयप्राप्तिकरं च यत् ।
श्रीयन्त्रपर्शुमुद्रायां, भावनीयं हि तत् सदा ॥९३॥
श्रीसुदर्शनदण्डस्य, षट्सु ग्रन्थिषु नित्यशः ।
षडाम्नायगतान् न्यासान्, महाषोढात्मकांश्चरेत् ॥९४॥
अर्चनापेक्षया न्यासा, विशिष्यन्ते सदैव हि ।
तस्मान् न्यासाः प्रकर्तव्या, भक्तिशक्तिसुखाप्तये ॥९५॥

२१. नारायणाख्ये यतिदण्ड आम्नायभावना —

अष्टग्रन्थि - समायुक्ते, दण्डे नारायणाह्वये ।
चतुर्थ - ग्रन्थि - पर्यन्तमाम्नायाः पूर्ववत् स्थिताः ॥९६॥
पञ्चम्यां नैर्ऋत्याग्नेयावाम्नायौ भवतस्तथा ।
षष्ठ्यामीशानवायव्यावाम्नायौ स्थितिशालिनौ ॥९७॥
उपाम्नायसमष्टेस्तु, सप्तम्यां क्रियते स्थितिः ।
ऊर्ध्वाम्नायस्तथाऽष्टम्यां, ग्रन्थौ संस्थापितो भवेत् ॥९८॥

२२. नारायणाख्ये यतिदण्डे श्रीचक्रभावना —

श्रीयन्त्रस्थितिरप्यत्र, पूर्ववत् समुदाहृता ।
षष्ठ्यां ग्रन्थौ परो बिन्दुः, प्रथमं स्थितिरिष्यते ॥९९॥

१. 'दमन' मिति पाठा०

सप्तमाष्टमग्रन्थ्योस्तु, शिष्टं बिन्दुद्वयं स्थितम् ।
विद्यानां चापि संस्थानमन्त्यग्रन्थौ विभावयेत् ॥१००॥
मुद्रयोस्तु तथैव स्याद्, यन्त्रयोरथ भावना ।
एवं सम्भावयेद् भक्त्या, दण्डे नारायणाभिधे ॥१०१॥

२३. गोपालाख्ये यतिदण्ड आम्नायभावना —

दशग्रन्थिमये दण्डे, गोपालाख्ये क्रमादिह ।
अधरः प्रथमग्रन्थौ, पूर्वाम्नायो द्वितीयगः ॥१०२॥
आग्नेयश्च तृतीयस्यां, चतुर्थ्यां दक्षिणः स्मृतः ।
पञ्चम्यां नैर्ऋतः षष्ठ्यां, पश्चिमाम्नाय इष्यते ॥१०३॥
वायव्यः सप्तमीसंस्थोऽष्टम्यामुत्तर एव च ।
ईशानस्तु नवम्यां स्याद्, दशम्यामूर्ध्वसंस्थितिः ॥१०४॥
उपाम्नायसमष्टिश्च, सहैवात्र विभाव्यते ।
एवमाम्नायदशकं, गोपाले भावयेद् यतिः ॥१०५॥

२४. गोपालाख्ये यतिदण्डे श्रीचक्रभावना —

श्रीचक्रभावनायान्तु, गोपाल-ग्रन्थिषु क्रमात् ।
भूपुराद् बिन्दुपर्यन्तं, स्थितिर्भवति निश्चितम् ॥१०६॥
दशम्यामेव ग्रन्थौ च, शिष्टं बिन्दुद्वयं भवेत् ।
विद्यानामपि संस्थानमन्त्य-ग्रन्थौ विभावयेत् ॥१०७॥
मुद्रयोस्तु तथैव स्याद्, यन्त्रयोरथ भावना ।
एवं सम्भावयेद् भक्त्या, दण्डे गोपाल-संज्ञके ॥१०८॥

२५. वासुदेवाख्ये यतिदण्ड आम्नायादि-भावना —

द्वादशग्रन्थिसंयुक्ते, वासुदेवाभिधेयके ।
दण्डे गोपालवत् सर्वेऽप्याम्नायाः सन्ति संश्रिताः ॥१०९॥
उपाम्नायसमष्टिस्तु, परं सा दशमी स्थिता ।
एकादश्यां ततो ग्रन्थावूर्ध्वाम्नाय उदाहृतः ॥११०॥



द्वादश्यां च तथा ग्रन्थावधरोऽप्यस्ति संस्थितः ।
एवमाराध्य सततं, यतिः सिद्धिधरो भवेत् ॥१११॥

२६. वासुदेवाख्ये यतिदण्डे श्रीचक्रभावना —

श्रीचक्रभावना दण्डे, वासुदेवाभिधे मता ।
गोपालदण्डवद् ग्रन्थिदशके तु भवेत् समा ॥११२॥
एकादश्यां ततो ग्रन्थौ, द्वितीयो बिन्दुरिष्यते ।
बिन्दुस्तृतीयो द्वादश्यां, विद्याभिः सह संस्थितः ॥११३॥
एवं द्वादश-ग्रन्थीनां, मध्ये सम्भाव्य भक्तितः ।
वासुदेवाभिधं दण्डं धारयेद् यतिरुत्तमः ॥११४॥

२७. अनन्ताख्ये यतिदण्ड आम्नायादि-भावना —

चतुर्दशग्रन्थिमये, दण्डेऽनन्ताभिधे पुनः ।
वासुदेव इवैवात्र, ग्रन्थिषु प्रोक्तसंस्थितिः ॥११५॥
त्रयोदश्यां तु तत्रैव, गुर्वाम्नाय उदाहृतः ।[1]
चतुर्दश्यां च सर्वेषां, समष्टिं भावयेद् यतिः ॥११६॥
एवं साम्नाय-संस्थित्या, भावना सिद्धिदायिनी ।
यतीनां परमोत्कृष्ट-तपस्तेजःप्रकाशिका ॥११७॥

२८. अनन्ताख्ये यतिदण्डे श्रीचक्रभावना —

श्रीचक्रभावनाऽप्यस्मिन् दण्डेऽनन्ताह्वये ततः ।
पूर्ववद् यतिभिः कार्या, द्वादशीं यावदुत्तमा ॥११८॥
त्रयोदश्यां च निर्वाण-विद्यां सम्भावयेत् पुनः ।
चतुर्दश्यां पाशुपतं मनुमुच्चार्य चिन्तयेत् ॥११९॥
एतयोरेव कूटानां, चतुर्दश्या समन्विता ।
कलाकूटात्मिका चैव, महाषोडश्युपास्यते ॥१२०॥
सप्तकोटि - महामन्त्रस्तथाऽन्या मन्त्रशक्तयः ।
भावनीया सदा भक्त्या, यतिभिः साधकोत्तमैः ॥१२१॥

---

१. आश्रमतीर्थसरस्वतीरूपाम्नायेषु स्वगुर्वाम्नाय इति ।

अन्त्यग्रन्थौ तु मन्त्राणां, शिष्टाः कूटादिभावनाः ।
सुदर्शनसमाः कार्याः, षोढान्यासादयस्तथा ॥१२२॥

२९. यतिदण्डे ब्रह्मसूत्रं तन्तुसङ्ख्यानां श्रीयन्त्रावरणदेवतात्वञ्च --

यतिदण्डे ब्रह्मसूत्रतन्तु-संख्या तु या स्मृता ।
चतुःखाग्नि-द्विप्रमिता, साऽस्ति सच्छास्त्रसम्मता ॥१२३॥
सा च प्रणवमात्राभिर्भक्ता षट्पञ्च-वीक्षणैः ।
नवावशेषा भवति, सङ्ख्यया नैतदद्भुतम् ॥१२४॥
श्रीचक्रस्यावरणगाः, स्मृता या नव देवताः ।
ता एव दर्शिताः सम्यग्गता या दशसंख्यया ॥१२५॥
नवावरणान्युक्तानि, श्रीचक्राभ्यन्तरेऽपि च ।
बिन्दूनां गणना नास्ति, तेष्वावरणकेषु च ॥१२६॥
यतो बिन्दौ भवत्येव, मूलदेवस्य संस्थितिः ।
सोऽप्यावरणरूपेण, परिणतो भवेत्ततः ॥१२७॥

३०. श्रीचक्रात्मकाम्नायस्य स्वरूपम् ---

पूर्वाम्नाय-बिन्दुरूपं, षट्कोणं दक्षिणं स्मृतम् ।
अष्टपत्रं पश्चिमस्योत्तरं षोडशच्छदम् ॥१२८॥
ऊर्ध्वत्रिकोणरूपं स्यात्, पातालं च त्रिवृत्तकम् ।
[1]पराम्नायं च वलय-द्वयरूपं ततः परम् ।
आनन्दो भूपुरस्यैकं, रहस्यं वलयद्वयम् ॥१२९॥

प्रसङ्गादाम्नायगोत्राणां शाखानाञ्चापि निर्देशः —

पूर्वस्य चाजनी गोत्रं मानसी दक्षिणस्य च ।
विभावरी पश्चिमस्याद्भुतमुत्तरकस्य च ॥१३०॥

१. यद्यपि षडाम्नाया एव प्रसिद्धाः, तथाप्यनुत्तराम्नायस्यापि केषाञ्चिन्मत उक्तत्वादत्र तस्यैवानन्दरूपतां पराम्नायस्योपाम्नायरूपतां रहस्यस्य च समष्टिरूपताञ्चावधार्य कारिका द्रष्टव्या । इदं सर्वमागमरहस्यतः कौलसर्वस्वतश्च ज्ञेयम् ।



ऊर्ध्वस्य जलया गोत्रं पातालस्य च श्यामला ।
मातङ्गिनी पराख्यस्यानन्दस्य स्याज्जलन्धरी ॥१३१॥
रहस्यस्य निजं गोत्रं क्रमाज्ज्ञेयं च देशिकैः ।
पूर्वे सामन्तिनी शाखा दक्षिणे च मनोन्मनी ॥१३२॥
पश्चिमे यक्षिणी शाखा चोत्तरे कालिका स्मृता ।
ऊर्ध्वे सौभाग्यशाखा स्यात् पाताले शीतला भवेत् ॥१३३॥
मनस्विनी पराम्नाये ह्यानन्दे शृङ्गिनी मता ।
रहस्यं च पराख्या स्यादिति शाखाविनिर्णयः[2] ॥१३४॥
विशुद्धौ डाकिनी देवी, अनाहते तु राकिणी ।
लाकिनी मणिपूरस्था, काकिनी लिङ्गगोचरे ॥१३५॥
आधारे साकिनी देवी, आज्ञायां हाकिनी तथा ।
याकिनी ब्रह्मरन्ध्रस्था, सर्वकामफलप्रदा ॥१३६॥

३१. दण्डे मूलाधारादि-चक्रकल्पना —

मूलाधारस्तथा स्वाधिष्ठानं च मणिपूरकम् ।
अनाहतं विशुद्धं च तथाज्ञेति स्मृतानि षट् ॥१३७॥
मूलाधारादिचक्राणि, दण्डे सङ्कल्प्य देहवत् ।
कार्या तत्तद्देवतानां, यतिभिस्तत्र भावना ॥१३८॥
किं वा देहस्थचक्रेषु, कृत्वा सम्यगुपासनम् ।
दण्डे विचिन्तयेत् पश्चाद्, यतिस्तेषां तदात्मताम् ॥१३९॥
स्थूल-सूक्ष्म-लिङ्ग-भेदैस्त्रिधाऽयं देह उच्यते ।
त्रिष्वप्येतेषु चक्राणि, कल्प्यन्ते योगिभिः पृथक् ॥१४०॥

३२. पृथ्व्यादिकल्पना —

स्थूले पृथ्व्यादि-तत्त्वानि, प्रकल्प्यन्ते यथाक्रमम् ।
किन्तु तत्र भवेदीषद्, भेदः सोऽपि विचार्यताम् ॥१४१॥

२. रहस्ये च स्वयम्भूः स्यादिति शाखाविनिर्णयः ।
—इति कौलसर्वस्वे पाठः ।

मूलाधारे मही तत्र, मणिपूरे जलं तथा ।
स्वाधिष्ठाने भवेद् वह्निरित्यवस्थाविशेषतः ॥१४२॥

३३. प्रणवमात्राणां कादिमतेन दीक्षा-विचारः —

अथ चादौ गुह्यकाली, भुवना कुब्जिका ततः ।
दक्षिणा कालिका तारा, श्रीविद्या परमेश्वरी ॥१४३॥
महाकाली महालक्ष्मीर्महापूर्वा सरस्वती ।
ततस्त्रिशक्तिचामुण्डा, भद्रकाली❀-स्वरूपिणी ॥१४४॥
ध्येया पश्चात् कुब्जिकायां, समष्ट्यालयगामिनी ।
लघुक्रमोऽयं देवेशि चामुण्डाया नवार्णगः ॥१४५॥
कामादि-दोषरहिताः, कादि-हादि-मतानुगाः ।
वाञ्छिता कल्पिता सिद्धिर्मनोरथमयी तथा ॥१४६॥
नैष्ठिकीं ब्रह्मचर्यस्य, दीक्षां लब्ध्वा तु नैष्ठिकः ।
ओङ्कारमात्राणां कुर्यात्, पुरश्चरणमुत्तमम् ॥१४७॥
ततः संन्यस्य विधिवद्, मेधादीक्षां लभेत सः ।
संन्यासाश्रमके पश्चाद्, महामेधा प्रदीयते ॥१४८॥
महासाम्राज्यदीक्षा च, तत एवाभिजायते ।
एषैव दिव्यसाम्राज्य-दीक्षाऽपि विनिगद्यते ॥१४९॥
यतीनामेव यत्रास्तेऽधिकारः केवलं भुवि ।
महासाम्राज्यदीक्षाया, लोके परतरं न हि ॥१५०॥
न न्यासः पूजनं नैव, नियमो नापि विद्यते ।
केवलं धारणान्मुक्तिर्मन्त्रोच्चाराच्छिवो भवेत् ॥१५१॥
यदि संन्याससम्प्राप्तिः, पूर्वमेव कृता भवेत् ।
तदापि शक्तिसम्प्राप्त्यै, दण्डे पिण्डे च सिद्धये ॥१५२॥
पुरश्चरणमाचर्यं, तदनन्तरमेव हि ।
विश्वे धर्मस्य रक्षायां, सामर्थ्यं लभते यतिः ॥१५३॥

❀ कालीकल्पे भद्रकाली । श्रीकल्पे च—उग्रचण्डाऽस्ति ।



निग्रहानुग्रहशक्तिश्च, तदैवायाति नित्यशः ।
अयमेवोत्तमः पक्षो, द्वितीयः प्रोच्यतेऽधुना ॥१५४॥
ओङ्कारमात्राशक्तीनां, मन्त्राणां विधिवद् यतिः ।
संन्यस्तोऽप्याश्रमाचारात्, पुरश्चर्यामथाचरेत् ॥१५५॥
ओङ्कारदीक्षा संन्यासे, दीयते यद्यपीह सा ।
तथापि तद्वत् सुगुणा नागच्छन्ति तया विना ॥१५६॥
पुरश्चर्यानन्तरं हि, दीक्षा मेधात्मिका मता ।
महामेधादयश्चाग्रे, क्रमशोऽथ भवन्ति हि ॥१५७॥
तदा यतिः स्वकर्मभ्यो, मुक्त एव न संशयः ।
ततः स्मरणमात्रेण, शिवरूपो भवेद् यतिः ॥१५८॥
पुरश्चर्यास्वशक्तश्चेद् दण्डे स्वे भक्तिपूर्वकम् ।
प्रणवस्याथ मात्राणां, शक्तीनां च विशेषतः ॥१५९॥
नाम्नामेव सदा कुर्वन् स्मरणं श्रद्धयान्वितः ।
तदैव फलमाप्नोति, भक्तिमान्नात्र संशयः ॥१६०॥

३४. साधना-सिद्धये प्राणप्रतिष्ठाया आवश्यकत्वम् —

एवमुक्तविधानेन, दण्डानां ग्रन्थिवत्क्रमात् ।
आम्नायात्मक-शक्तीनां, परिवृत्त्यामहर्निशम् ॥१६१॥
ओङ्कारमात्रारूपस्य, श्रीचक्रस्य विधानतः ।
प्राणप्रतिष्ठा कर्तव्या, साधनासिद्धये मुदा ॥१६२॥

३५. यतिदण्डस्य स्वरूपचतुष्टयम् —

स्थूलं सूक्ष्मं कारणं च, कारणातीतमेव च ।
चतुर्धाऽत्र स्वरूपं तु, दर्शितं मुख्यरूपतः ॥१६३॥
स्थूले तु ग्रन्थयस्तत्र, पशुमुद्रा च सूक्ष्मके ।
कारणे ब्रह्ममुद्राऽन्ते, प्रणवात्मकता मता ॥१६४॥
सेयं सङ्केत-विद्याऽस्ते, गुरुदेवप्रसादतः ।
पूर्णरूपेण ज्ञातव्या, भक्त्या च श्रद्धया सदा ॥१६५॥

तदेवं करणाद् दण्डः, श्रीचक्रात्मक उत्तमः ।
सर्वशक्तिसमायुक्तो, भवत्येव न संशयः ।।१६६।।
सृष्टि-स्थिति-लयानाख्या-भासारूपा अपि श्रिताः ।
भवन्त्यन्तर्गताःसर्वे, दण्डे सूत्रे च मुद्रयोः ।।१६७।।

३६. यतिदण्डस्य प्रतिष्ठाया आवश्यकता —

प्रतिमासु यथा प्राण-प्रतिष्ठा क्रियते बुधैः ।
तथैव कार्या दण्डेऽपि, प्रतिष्ठाविधिपूर्विका ।।१६८।।

३७. प्रतिष्ठायाः फलानि —

तासां प्रतिष्ठा कर्तव्या, दण्डे शास्त्रविधानतः ।
प्रतिष्ठयाऽनया दण्डे, प्रभावातिशयोद्भवः ।।१६९।।
चमत्कार-विशिष्टायाः, शक्तेश्चानुभवो भवेत् ।
विश्वधर्मस्य रक्षायां, समर्थः स्यात् क्षितौ यतिः ।।१७०।।

३८. प्रतिष्ठा-न्यासादिभिरेव यति-दण्डस्याद्भुतत्वम् —

प्रतिष्ठान्यासपूजादिकार्यं संन्यासिना ध्रुवम् ।
तथैव मुद्रयोर्नित्यं, ग्रन्थिर्देया महात्मभिः ।।१७१।।
आम्नाय-नायिकामन्त्रैः, सर्वैरेवानुपूर्वशः ।
ततः सञ्जायते दण्डः, श्रीचक्रसदृशोऽद्भुतः ।।१७२।।

३९. प्रतिष्ठायास्त्रयः प्रकाराः —

त्रिवृत् प्रतिष्ठा गदिता. शास्त्रेषु नियमान्विता ।
प्रथमा तत्र मूर्तीनां, यन्त्राणां वा स्थिरा मता ।।१७३।।
मन्दिरादिषु तस्यां तु, नाह्वानं न विसर्जनम् ।
शयनोत्थापने स्यातां मुद्राभ्यां नित्यमेव हि ।।१७४।।
द्वितीया नित्यपूजा या पर्वपूजादिके भवेत् ।
नित्याह्वानं विसृष्टिश्च, तत्र स्यातां परं तदा ।।१७५।।
आह्वानं हृदये कृत्वा, पूजयित्वा विधानतः ।
पूजान्ते हृदि विश्रामो, दीयते साधकोत्तमैः ।।१७६।।



तृतीया धारणार्थं ये, यन्त्र-मूर्त्यादयो वृताः ।
तेषां प्रतिष्ठा भिन्नाऽस्ति, पूर्वोक्ताभ्यां विशेषतः ।।१७७।।
इयं प्रतिष्ठा नैकस्मिन्, दिन एव समाप्यते ।
सूक्ष्मरूपेण यदि चेद्, भवेन्नवदिनात्मिका ।।१७८।।
बृहद् रूपेण यदि चेत्, क्रियते तर्हि तत्र सा ।
४०प्रमितैर्दिनैः संयाति, शास्त्ररीत्या प्रपूर्णताम् ।।१७९।।
इति निश्चित्य दण्डेऽपि, प्रतिष्ठा शास्त्रसम्मता ।
यतिभिः सर्वदा कार्या, धर्म-कर्म—विशारदैः ।।१८०।।

४०. यतिदण्डस्य प्रतिष्ठायाः फलानि —

एवं यः कुरुते दण्डी, क्रियाः सर्वा विधानतः ।
स भवेद् देवतातुल्यः, परब्रह्मस्वरूपभाक् ।।१८१।।
महाषोढान्यासयुक्तस्तथा तत्कवचावृतः ।
यतिर्न कञ्चित् प्रणमेद्, नित्यं स्वं रूपमास्थितः ।।१८२।।
इत्थमैश्वर्य-युक्तोऽपि, निग्रहानुग्रहक्षमः ।
निर्ममो निरहङ्कारः, संन्यासी विचरेद् भुवि ।।१८३।।
ऐश्वर्यं बाधकं प्रोक्तं, मुमुक्षूणां तु यद्यपि ।
तथापि दण्डसंस्कारात्, पुरश्चर्या-विधानतः ।।१८४।।
ऐश्वर्यं स्वयमुत्पन्नं, बाधकं न भवेद् यतेः ।
किन्तु साधकमेव स्याद् नित्यं तस्योर्ध्वगामिनः ।।१८५।।
पतनाद् वारयेच्चापि, निरुन्ध्याद् वा विमार्गतः ।
तथा शारीरधातूनां, रक्षकं तद् भवेद् यतेः ।।१८६।।
ओजस्तेजो धृतिं चैव, समुत्पाद्य प्रभावतः ।
प्रत्युत्पन्नां मतिं दद्यात्, तदैश्वर्यं सदा यतेः ।।१८७।।

४१. प्रतिष्ठाऽभावे दण्डस्य-प्रदर्शनमात्रत्वम् —

प्रतिष्ठा प्रणवस्यापि, मात्राणां शक्तयस्तु याः ।
तासां यदि प्रतिष्ठा नो, दण्डं तद् दृश्यमेव हि ।।१८८।।

४२. विधिवत्साधित-दण्डधारणस्य फलानि —

एवं दण्डस्य माहात्म्यं, विधानं साधनाः क्रियाः ।
सर्वं ज्ञात्वा यतिः कुर्याद्, विधिवद् दण्डधारणम् ॥१८९॥
विधिना विहितं कर्म, कृत्वा सच्छ्रद्धयान्वितः ।
अनन्तशक्तिसम्पन्नोऽनन्तदेव-प्रतिष्ठितः ।
अनन्तानन्तपुण्यानां, सारभूतः सनातनः ॥१९०॥
यथाऽऽस्ते यतिदण्डोऽयं, तथा दण्डधरो भवेत् ।
तदा तद्धारणं लोके, सफलं भवति ध्रुवम् ॥१९१॥

[ अत्राग्रे केचन श्लोकाः पठितुं न पारिताः अत एव तेषां क्रमसंख्याऽपि न योजिता ]

४३. दशचक्रेषु जपक्रमः कुण्डलिनी-रूपेण चक्रचिन्तनं च —

गुरोराज्ञां समादाय, मणिपूर-सरोजके ।
दशधा प्रजपेद् विद्यां, सावधानेन चेतसा ॥१९२॥
मूलाधारं समेत्याथ, प्रजपेद् दशधा मनुम् ।
मूलाधारादथाज्ञायामागत्य दशधा जपेत् ॥१९३॥
आज्ञाचक्राद् विशुद्धाख्ये, जपेद् दश समाहितः ।
विशुद्धादग्रतो गत्वा, दशधा प्रजपेन् मनुम् ॥१९४॥
स्वाधिष्ठानात् समेत्याऽनाहतं तत्र जपेद् दश ।
द्वौ द्वौ सम्मेलयेत् तेन, भवेत् कोणचतुष्टयम् ॥१९५॥
तत्र नैर्ऋत्यमाश्रित्य, वायव्यान्तं प्रपूजयेत् ।
मोहिनी मातङ्गी सरस्वती पश्चिमदिग्गता ॥१९६॥
दक्षिणस्यामुग्रया च, युज्यते जायते तदा ।
नैर्ऋत्याधिष्ठातृकैषा, चामुण्डेति निगद्यते ॥१९७॥
लोके त्वेषा महामाया, भद्रकालीति गीयते ।
पूर्वस्था कमलादेवी, बगला याम्यदिग्गता ॥१९८॥
संश्लिष्टाऽऽग्नेयकोणस्य, महालक्ष्मीर्निगद्यते ।
पूर्वस्था सिद्धलक्ष्मी च, पञ्चवक्त्रा तथोत्तरा ॥१९९॥



मिलित्वा दशवक्त्राऽथ, महाकालीति कथ्यते ।
प्रतीच्याश्चण्डमातङ्गी, छिन्नमस्ता तथोत्तरा ॥२००॥
वायव्यस्य मिलित्वा च, महासरस्वती ननु ।
एतास्तु लम्बिकायां वै, पूजनीया विधानतः ॥२०१॥
बिन्दौ नवार्णमन्त्रं च, पूजनीयं प्रयत्नतः ।
... ... ... ... ॥२०२॥
षट्त्रिंशदङ्गुलो हंसः, प्रयाणं कुरुते बहिः ।
सव्यापसव्यमार्गेण, प्रयाणात् प्राण उच्यते ॥२०३॥
अपानः कर्षति प्राणं, प्राणोऽपानं च कर्षति ।
सोऽहं हसः पदेनैव, जीवो जीवति सर्वदा ॥२०४॥
शिवादि-कृमि-पर्यन्तं, प्राणिनां प्राणवर्तनम् ।
निःश्वासश्वासरूपेण, मन्त्रोऽयं वर्तते प्रिये ॥२०५॥

४४, कुण्डलिन्यादिक्रमैश्चक्रचिन्तनानि[१] —

चिन्तनं प्रथमे चक्रे, कुण्डलिक्रम उच्यते ।
द्वितीये चिन्तनं चक्रे, मिश्रणाख्यो भवेत् क्रमः ॥२०६॥
तृतीये लम्बिकाचक्रे, तत्तुर्यक्रमचिन्तनम् ।
संवरोधी-क्रमश्चैव, कथ्यते विबुधैः सदा ॥२०७॥
शाम्भवक्रमतश्चैव, चिन्तयेत् परमेश्वरीम् ।
तत्पञ्चमोर्ध्वचक्रं त्वाज्ञाया हंसक्रमेण वै ॥२०८॥
बैन्दवादिमहाबिन्दु-क्रमणैव सुचिन्तयेत् ।
पूर्ववद् भ्रमयेद् देवि ! कुण्डलि-क्रमतश्च तत् ॥२०९॥
षष्ठं वै चिन्तयेद् देवीमूरूपद्मे तु लम्बिकाम् ।
सप्तमं चिन्तयेद् देवि, समाधिं सविकल्पकम् ॥२१०॥

---

१. तत्–तस्मादिति । अस्य विशदं विवरणं ४० तमे प्रघट्टके ७१ तमे पृष्ठे कुण्डलिनीजागरणक्रमे द्रष्टव्यम् ।

महावैभवसंयुक्तः, साक्षाच्छिवमयो भवेत् ।
तेनातिमन्दभाग्योऽपि, कुबेराधिपतिर्भवेत् ॥२११॥
क्रमदीक्षा-समायुक्तश्चिन्तयेच्चक्रमुत्तमम् ।
सर्वपापविनिर्मुक्तः, सर्वैश्वर्यप्रदायकम् ॥२१२॥

४५. न्यास-प्रकरणम् —

करोम्यनेन मन्त्रेण, तालत्रयमहं शिवे ।
नारायणोऽहं ब्रह्माऽहं, भैरवोऽहं शिवोऽस्म्यहम् ॥२१३॥
देवोऽहं परमात्माऽहं, महात्रिपुरसुन्दरि ।
ध्यात्वैवं वज्रकवचं, न्यासं तव करोम्यहम् ॥२१४॥
कुमारीबीजसंयुक्तं, महात्रिपुरसुन्दरि ।
मां रक्ष रक्षेति हृदि, करोम्यञ्जलिमीश्वरि ॥२१५॥
नमो देव्यासनायेति, ते करोम्यासनं शिवे ।
चक्रासनं नमस्यामि, सर्वमन्त्रासनं भजे ॥२१६॥
साध्यसिद्धासनं वन्दे, मन्त्रैरेभिर्महेश्वरि ।
करोम्यस्मिश्चक्रमन्त्र — देवतासनमुत्तमम् ॥२१७॥
चक्रन्यासं ततः कुर्वे, श्रीकण्ठन्यासमुत्तमम् ।
केशवादि-महान्यासं, कामन्यासं करोम्यहम् ॥२१८॥
कलान्यासं ततः कुर्वे, कुर्वे कामकलाह्वयम् ।
पीठन्यासं ततः कुर्वे, तत्त्वन्यासं करोम्यहम् ॥२१९॥
वशिन्याष्टकं न्यासं, नवयोन्याख्यमुत्तमम् ।
षोढान्यासं ततः कुर्वे, महाषोढां करोम्यहम् ॥२२०॥
षोढान्यासन्तु वै कुर्वंस्तेन ब्रह्माण्डरूपकः ।
विराड्रूपः परमात्मा, शिवः साक्षान्न संशयः ॥२२१॥

४६. षोढान्यास-स्वरूपम् —

बीजं कूटं क्रमो धातुस्तत्त्वं पञ्चमपञ्चकम् ।
पञ्चविंशतिसंख्याका, न्यासा एते प्रकीर्तिताः ॥२२२॥



वारदीक्षाक्रमश्चैव, दीक्षाक्रमस्तथैव च ।
न्यासश्चैवं द्विधा चोक्तौ, नित्यं नैव क्रियेत चेत् ॥२२३॥
षडङ्गषोढां कुलेशानि, कुर्यात् पूर्वोक्तवर्त्मना ।
महाषोढाह्वयं न्यासं, ततः कुर्यात् समाहितः ॥२२४॥

४७. अधराम्नाय-षोढान्यासः (रविवासरे) —

रवौ पद्मे[1] शिवकला, ग्रहा दोषनिवारकाः ।
दिक्पाल-डाकिनी-तारादिकं पीठं च विन्यसेत् ॥२२५॥

४८ पूर्वाम्नाय-षोढान्यासः (सोमवासरे) —

परा - परात्पराऩ्यासौ, परात्परातीता तथा ।
चित्परा चित्परात्परा, सोमे स्वाधिष्ठाने तथा ॥२२६॥
सा चित्परात्परातीता, तथेयं भुवनेश्वरी ।
... ... ... ... ... ॥२२७॥

४९. दक्षिणाम्नाय-षोढान्यासः (मङ्गलवासरे) —

हंसो मन्त्रो लघुश्चैव, महाषोढा तथा स्मृतः ।
ग्रहश्च राशि-नक्षत्र-योगाः करणमेव च ॥२२८॥
पञ्च संवत्सराः काल्या, मनून् भौमे न्यसेत्तथा ।
... ... ... ... ... ॥२२९॥

५०. पश्चिमाम्नाय-षोढान्यासः (बुधवासरे) —

घोराष्टकं त्रिखण्डा चैवाक्षरो देवपञ्चकम् ।
डाद्यष्टकस्य न्यासोऽपि षोढान्यास उदाहृतः ॥२३०॥
ग्रन्थिन्यासं तथा घोरं, द्वादशाङ्गं षडङ्गकम् ।
मालिनी शब्दराशिश्च, षड्दूतं रत्नपञ्चकम् ॥२३१॥
नवात्मा नव घोराश्च, षोढा चैव त्रिविद्यया ।
त्रिखण्डं मन्त्रखण्डं तु, मातृखण्डं तथैव च ॥२३२॥

१. मूलाधारे ।

रुद्रखण्डमिति प्रोक्तमनाहते बुधवासरे ।
रक्ष मां कुब्जिके देवि, रक्ष मां कुब्जिकेश्वरि ॥२३३॥
रक्ष रक्ष महादेवि, अस्मदीयमिदं वपुः ।
कुलदेवीति - विख्याता, कैलासशिखरालये ॥२३४॥
सा कुब्जिका महामाया, स्थातु श्रीर्मम मस्तके ।
[1]वर्मपाठे महत्पुण्यं, तेन भवति निर्भयः ॥२३५॥
[2]वर्मणा रक्षां प्राप्नोति, तस्मान्नित्यं पठेन्नरः ।
... ... ... ... ... ॥२३६॥

५१. उत्तराम्नाय-षोढान्यासः (गुरुवासरे) —

उग्रमातृक्रमः काली-कुल-पीठानि योगिनी ।
देवतामन्त्ररूपाणि, न्यासोऽयं कालिकाक्रमे ॥२३७॥
षोढान्यासे विशुद्धेस्तु, विन्यसेच्च क्रमात्तथा ।
... ... ... ... ... ॥२३८॥
ततश्च लघुषोढा स्यान्महाषोढा ततः परम् ।
महानिर्वाण-षोढा च, सर्वे शेषे प्रकीर्तिताः ॥२३९॥

५२. ऊर्ध्वाम्नाय-लघुषोढान्यासः (शुक्रवासरे) —

शुक्रवारे गणेशश्च, दशविद्यामयो ग्रहः ।
नक्षत्र-योगिनी-राशि-पीठं लघुषोढा स्मृतः ॥२४०॥

५३. ऊर्ध्वाम्नाय-महाषोढान्यासः (शनिवासरे) —

कूटैर्बीजैर्विना देवि, षोढान्यासो न सिद्ध्यति ।
तस्मात् सर्वप्रयत्नेन, कूटमन्त्राणि योजयेत् ॥२४१॥
प्रपञ्चो भुवनं मूर्तिर्मन्त्रदैवत-मातरः ।
महाषोढाह्वयं न्यासमाज्ञायां विन्यसेत् सदा ॥२४२॥
सास्मदीयं शिरः पातु, सदा तिष्ठतु भैरवी ।
या विशाला विशालाक्षी, निर्मला मूलवर्जिता ॥२४३॥

१. २. कवच-पाठे, कवचेनेति च सन्धेयम् ।



सा योगिनी महामाया, स्थातु श्रीर्मस्तके मम ।
सिद्धेश्वरी परापरे, महाविद्या महाकला ॥२४४॥
बीजकलाऽवरोहश्च[1], सहस्रारे शनौ न्यसेत् ।
एतत्पाठे महापुण्यं, न्यासो देवस्वरूपगः ॥२४५॥
केवलं न्यासपाठेन, तत्र तिष्ठन्ति देवताः ।
केवलं स्मृतिमात्रेण, तृप्यन्ति सर्वदेवताः ॥२४६॥
न्यासं षोढा महाषोढा-युक्तं पूर्णं विधाय च ।
अनाख्या-भासयोः पूजा, कार्या नित्यं हि चक्रयोः ॥२४७॥

५४. अथ महाषोढान्यासफलश्रुतिः —

एवं न्यासे कृते देवि, साक्षात् परशिवो भवेत् ।
मन्त्री न चात्र सन्देहो, निग्रहानुग्रहक्षमः ॥२४८॥
महाषोढाह्वयं न्यासं, यः करोति दिने दिने ।
देवाः सर्वे नमस्यन्ति, तं नमामि न संशयः ॥२४९॥
महाषोढाह्वयं न्यासं, यत्र मन्त्री न्यसेत्ततः ।
दिव्यक्षेत्रं समुद्दिष्टं, समन्ताद् दशयोजनम् ॥२५०॥
कृत्वा न्यासमिमं देवि, यत्र गच्छति मानवः ।
तत्र श्रीर्विजयो लाभः, सम्मानं पौरुषं प्रिये ॥२५१॥
महाषोढाकृतन्यासः, क्रुद्धो यं वीक्ष्य वन्दते[2] ।
षण्मासान्मृत्युमाप्नोति, यदि त्राता शिवः स्वयम् ॥२५२॥
वज्रपञ्जरनामानमेनं न्यासं करोति यः ।
दिव्यन्तरिक्ष — भूशैलजलारण्यनिवासिनः ॥२५३॥
उद्दण्डभूतवेताल — देवरक्षोग्रहादयः ।
भयग्रस्तेन मनसा, नेक्षन्ते साधकं प्रिये ॥२५४॥

१. पूर्वमारोहक्रमेण ततोऽवरोहक्रमेणेति ।
[सं. ४५ तः ५३ यावत् सम्बन्धिनः न्यासश्लोका अप्युपलब्धाः सन्ति ।]
२. यमुद्वीक्ष्याभिवन्दते इतिपाठा० ।

महाषोढाह्वयं न्यासं, ब्रह्मविष्णुशिवादयः ।
देवाः सर्वे प्रकुर्वन्ति, ऋषयश्च मुनीश्वराः ॥२५५॥
बहुनोक्तेन किं देवि, सुशिष्याय प्रकाशयेत् ।
अक्षय्यां लभते सिद्धिं, रहसि न्यासमाचरेत् ॥२५६॥
अस्मात्परतरः साक्षाद्, देवताभावसिद्धये ।
लोके नास्ति न सन्देहः, सत्यं सत्यं न संशयः ॥२५७॥
ऊर्ध्वाम्नाय - प्रवेशश्च, पराप्रासाद - चिन्तनम् ।
महाषोढा-परिज्ञानं, नाल्पस्य तपसः फलम् ॥२५८॥

५५. श्रीगुरुप्रणाम-रहस्यम् —

स्वरूपरूपणे हेतौ, श्रीगुरौ प्रथमा नतिः ।
स्वच्छप्रकाशविमर्शहेतवे तु द्वितीयका ॥२५९॥
स्वात्मारामविलीनाय, तेजसे स्यात्तृतीयका ।
योगक्षेमस्य सिद्ध्यर्थेऽव्यस्तहस्ता नतिर्मता ॥२६०॥
सार्धत्रिवारं प्रणमेच्छ्रीगुरुं शिवरूपिणम् ।
सर्वदण्डप्रणामादीन्, कुर्याच्छास्त्रोक्तवर्त्मना ॥२६१॥

५६. श्रीदण्डप्रणामरहस्यम् —

स्पृष्ट्वा पूर्वाम्नायग्रन्थिं, प्रणमेद् भक्तिभावतः ।
पुण्ये मतिर्भवेत् तेन, साधकस्य न संशयः ॥२६२॥
दक्षिणाम्नायग्रन्थिं च, स्पृष्ट्वा चेत्प्रणमेद् यतिः ।
क्रूरकर्मणि तस्याऽशु, मतिस्तत्र यतेर्भवेत् ॥२६३॥
नैर्ऋत्याम्नायजां ग्रन्थिं, स्पृष्ट्वा चेत् प्रणमेद् यतिः ।
पापबुद्धिर्भवेत् तस्य, नात्र कार्या विचारणा ॥२६४॥
पश्चिमाम्नायजां ग्रन्थिं, स्पृष्ट्वा चेत् प्रणमेद् यतिः ।
क्रियाप्रवृत्तिर्जायेत, साधकस्य न संशयः ॥२६५॥
वायव्याम्नायग्रन्थिं च, स्पृष्ट्वा दण्डं नमेद् यतिः ।
गमनादौ भवेद् बुद्धिर्नात्र कार्या विचारणा ॥२६६॥



उत्तराम्नायजां ग्रन्थिं, स्पृष्ट्वा दण्डं नमेद् यतिः ।
रतिः प्रीतिर्भवेत् तस्य, साधकस्याऽचिराद् ध्रुवम् ॥२६७॥
ईशानाम्नायजां ग्रन्थिं, स्पृष्ट्वा दण्डे नमेद् यतिः ।
द्रव्यादिदाने सामर्थ्यं, साधकस्य प्रजायते ॥२६८॥
अधराम्नायजां ग्रन्थिं, स्पृष्ट्वाऽधोभागमादरात् ।
वैराग्यविज्ञानमतिर्जायते तत्क्षणाद् यतेः ॥२६९॥
सर्वैश्वर्यस्य लाभार्थं, मध्यग्रन्थिं स्पृशन् नमेत् ।
यतिरैश्वर्यलाभाय, प्रणमेद् दण्डमादरात् ॥२७०॥
षडाम्नायमहाषोढां, प्रणवस्य कलास्तथा ।
सरहस्याः परिज्ञाय, पुरश्चर्यासमन्वितः ॥२७१॥
साम्राज्यदीक्षासम्पन्नो, लोकरक्षणशक्तिमान् ।
दण्डप्रणाममात्रेण, सद्यः सिद्धिं लभेद् यतिः ॥२७२॥
ईशानाम्नाय-ग्रन्थ्या वै, निर्जराकर्षणं भवेत् ।
... ... ... ... ... ... ... ॥२७३॥
प्रातः श्रीभुवनेश्वर्याः, षोढान्यासं समाचरेत् ।
श्रीमहाभुवनेश्वर्या, महाषोढां तथा न्यसेत् ॥२७४॥
स्वाधिष्ठाने तु न्यस्तव्याः, पूर्वाम्नायक्रमादिमे ।
मध्याह्ने दक्षिणा काल्या, महाषोढां च विन्यसेत् ॥२७५॥
मणिपूराख्यचक्रे तु, भक्तिभावसमन्वितः ।
महोग्रतारादेव्यास्तु, मूलाधारे न्यसेत् सदा ॥२७६॥
महाषोढाह्वयं न्यासं, दक्षिणाम्नायमाश्रितः ।
कुब्जिकाया महाषोढां, सायङ्काले सदा न्यसेत् ॥२७७॥
पश्चिमाम्नायमाश्रित्य, हृच्चक्रेऽनाहते सदा ।
उत्तराम्नायमाश्रित्य, प्राक् प्रातःकृत्यतश्चरेत् ॥२७८॥
प्रागेव ब्राह्ममुहूर्तात्, कुर्यात् षोढाचतुष्टयम् ।
बालायाः पञ्चदश्याश्च, श्रीमहाषोडश्यास्तथा ॥२७९॥

महात्रिपुरसुन्दर्या, आज्ञाचक्रे तु विन्यसेत् ।
सर्वरक्षाकरं वश्य-सहितं तु यशस्करम् ॥२८०॥

५७. नित्य-दण्ड-ग्रहणमन्त्रः —

उत्तिष्ठोत्तिष्ठ देवेश, देवानां हितकाम्यया ।
देवस्यारिविनाशाय, सदा मम करे भव ॥२८१॥

५८. दण्डतर्पणम् —

द्वादश दण्डमूले तु, दण्डाग्रेऽपि तथैव हि ।
मुद्रायां द्वादश प्रोक्तं, प्रतिपर्व त्रिधा मतम् ॥२८२॥
द्विधालोड्य च मध्येन, मूले प्रोक्तं नवाङ्कितम् ।
अग्रे सप्ताङ्कितं प्रोक्तमिति दण्डस्य तर्पणम् ॥२८३॥
शिरःप्रोक्षणमग्रेण, मूलेन पाद-प्रोक्षणम् ।
... ... ... ... ... ... ... ॥२८४॥
सुरास्तिष्ठन्ति दण्डाग्रे, दण्डमूले तु पूर्वजाः ।
प्रतिग्रन्थि तु गन्धर्वा, मध्ये तिष्ठन्ति मानवाः ॥२८५॥
अस्माकं ये कुले जाता, नाम-गोत्र-विवर्जिताः ।
ते सर्वे तृप्तिमायान्तु, दण्ड-सम्बन्धिवारिणा ॥२८६॥
समाप्य यस्य स्मृत्येति शकादिकगुरून् नमेत् ।
ततोऽध्यात्म-ग्रन्थानां श्रवणादिकमाचरेत् ॥२८७॥

५९. दण्ड-वन्दनं वन्दनवेलायां करणीयं च —

हृदये हस्तं निधाय श्रीनाथादि[1] गुरुपारम्पर्येण यावत्स्वगुरु-पादाम्बुजं तावत् प्रणमामीति शिरसि हस्तं निधाय— "ॐ नारायणाय नमः ॥ ॐ पद्मभवाय नमः ॥ ॐ वसिष्ठाय नमः ॥ ॐ शक्त्यै नमः ॥ ॐ पराशराय नमः ॥ ॐ व्यासाय नमः ॥ ॐ शुकाय नमः ॥ ॐ गौडपादाचार्येभ्यो नमः ॥ ॐ गोविन्दभगवत्पूज्यपादाचार्येभ्यो नमः ॥ ॐ श्रीभगवत्पादशङ्कराचार्येभ्यो नमः ॥ ॐ विश्वरूपाचार्येभ्यो नमः ॥ ॐ पद्मपादाचार्येभ्यो नमः । ॐ हस्तामलकाचार्येभ्यो नमः ॐ त्रोटकाचार्येभ्यो नमः ॥ ॐ समस्तब्रह्मविद्या-सम्प्रदायप्रवर्तकाचार्येभ्यो नमः ॥ ॐ गुं गुरुभ्यो नमः ॥ ॐ पं परमगुरुभ्यो

१, श्रीनाथाद्य०/इति पाठा०



नमः ॥ ॐ पं परमेष्ठिगुरुभ्यो नमः ॥ ॐ पं परात्परगुरुभ्यो नमः ॥ (वाम-स्कन्धे) ॐ गं गणपतये नमः ॥ (दक्षिणस्कन्धे) ॐ दुं दुर्गायै नमः ॥ (वाम-कुक्षौ) ॐ क्षं क्षेत्रपालाय नमः ॥ (दक्षिणकुक्षौ) ॐ सं सरस्वत्यै नमः ॥ (नाभौ) ॐ पं परमात्मने नमः ॥ ॐ परब्रह्मणे नमः ॥ (हृदये) । ततो हृदय-कमलमध्ये सर्वतेजोमयं परं ब्रह्मस्वरूपं प्रणवं ध्यात्वा हृदयमालभेत ॥ षट्-प्राणायामान् कृत्वा प्रणवेन करशुद्धिं कुर्यात् । यथा —

प्रकोष्ठे मणिबन्धे च, कूर्पयोर्हस्तयोस्तले ।
तत्पृष्ठे च तदग्रे च, करशुद्धिरुदाहृता ॥२८८॥

६०. न्यासाः —

ॐ भूरज्ञानात्मने तुषारवर्णायाङ्गुष्ठाभ्यां नमः ॥ ॐ भुवः प्राजापत्यात्मने रक्तवर्णाय तर्जनीभ्यां नमः ॥ ॐ स्वः सूर्यात्मने श्यामवर्णाय मध्यमाभ्यां नमः ॥ ॐ महः ब्रह्मात्मने नीलवर्णायानामिकाभ्यां नमः ॥ ॐ जनः ज्ञानात्मने कृष्ण-वर्णाय कनिष्ठिकाभ्यां नमः ॥ ॐ तपः सत्यात्मने श्वेतवर्णाय करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादि० ।

ततः प्लुतोच्चारेण प्रणवेन हृदयादारभ्य शिरःप्रभृति-पादाङ्गुष्ठपर्यन्तं त्रिवारं व्यापकं कुर्यात् । ततस्तालत्रयं कृत्वा बाणमुद्रया छोटिकात्रयञ्च विधाय प्रणवेन दिग्बन्धः —

ॐ हं हमिति बीजेनाकाशप्राकारं विचिन्त्य, यं यमिति वायुप्राकारं विचिन्त्य, रं रमित्यग्निप्राकारं विचिन्त्य, वं वमिति जलप्राकारं विचिन्त्य, लं लमिति पृथ्वीप्राकारं विचिन्त्य, कराग्रं च ब्रह्मरन्ध्रे निधाय परमाकाशं विचिन्तयेत् ।

स्फुरत्तारक-सङ्काशं, विद्युत्पुञ्जसमप्रभम् ।
हृदिस्थं सर्वदा ध्यायेदोमिति ज्योतीरूपकम् ॥२८९॥

ततः ॐ नमो नारायणायेत्यष्टवारं जपेत् ।

६१. प्रणवस्याक्षरादीनां विनियोगाः —

ॐ प्रणवस्यान्तर्यामी ऋषिर्देवीगायत्री च्छन्दः परमात्मा देवता लातव्य-गोत्रोत्पन्नो ब्रह्मपुत्रकः श्वेतो वर्ण उदात्तस्वरो ज्ञानाग्निर्मुखं ॐ अं बीजं ॐ उं शक्तिः ॐ मं कीलकं मम मोक्षार्थे जपे विनियोगः ।

ॐ अकारस्याग्निरृषिर्देवीगायत्री च्छन्दो ब्रह्मा देवता क्लीं बीजं क्रिया शक्तिः पीतो वर्णः जाग्रदवस्था भूः स्थानमुदात्तः स्वरः ऋग्वेदो गार्हपत्योऽग्नी रजो गुणः प्रातःसवनं विश्वात्मा पृथ्वीतत्त्वं सृष्टिक्रियाव्याप्त्यर्थे विनियोगः ।

ॐ उकारस्य वायुर्ऋषिस्त्रिष्टुप्छन्दो विष्णुर्देवता श्रीं बीजं ज्ञानं शक्तिर्विद्युद्वर्णः स्वप्नावस्था भुवः स्थानमनुदात्तःस्वरो यजुर्वेदो दक्षिणाग्निः सत्त्वगुणो माध्यन्दिनं सवनं तैजस आत्मान्तरिक्षं तत्त्वं स्थितिक्रियोत्कर्षार्थे विनियोगः ।

ॐ मकारस्य सूर्य ऋषिर्जगतीच्छन्द ईश्वरो देवता ह्रीं बीजं द्रव्यं शक्तिः श्वेतो वर्णः सुषुप्त्यवस्था स्वःस्थानं स्वरितः स्वरः सामवेदः आहवनीयोऽग्निस्तमोगुणः सायंसवनं प्राज्ञ आत्मा द्यौस्तत्त्वं संहारक्रियार्थे विनियोगः ।

ॐ अर्धमात्रायाः वरुणऋषिर्विराट् छन्दः पुरुषो देवता क्लीं बीजं विज्ञानं शक्तिः सर्वे वर्णास्तुरीयावस्था भूर्भुवःस्वःस्थानानि उदात्तानुदात्तस्वरिताः स्वराः अथर्ववेदो नादो वा संवर्तकः सर्वे गुणाः सर्वाणि सवनानि सर्व आत्मानः पृथ्व्यन्तरिक्षदिवस्तत्त्वानि सृष्टिस्थितिसंहारक्रियार्थे विनियोगः ।

ॐ ध्वनेः ब्रह्माऋषिर्गायत्रीछन्दः परमानन्दो देवता हंसो बीजं चिच्छक्तिर्नादः स्वरूपं ब्रह्मात्मा स्वःस्थानमुन्मन्यवस्था मम मोक्षार्थे जपे विनियोगः ।

## ६२. पञ्चोपचार-पूजनम् —

ॐ लं पृथ्वीगन्धतन्मात्रप्रकृत्यानन्दात्मने परमेश्वराय गन्धं परिकल्पयामि । ॐ हं आकाशशब्दतन्मात्रप्रकृत्यानन्दात्मने परमेश्वराय पुष्पं परिकल्पयामि । ॐ रं अग्निचक्षुस्तन्मात्रप्रकृत्यानन्दात्मने परमेश्वराय दीपं परिकल्पयामि । ॐ वं अमृतरसतन्मात्रप्रकृत्यानन्दात्मने परमेश्वराय नैवेद्यं परिकल्पयामि । ॐ सं शान्तिसर्वतन्मात्रप्रकृत्यानन्दात्मने परमेश्वराय पुष्पाञ्जलिं परिकल्पयामि । इति ।

## ६३. तर्पणम् —

ॐ वमित्यमृतबीजेन धेनुमुद्रया जलेऽमृतरूपं ध्यात्वा प्रणवेन द्वादशवारमभिमन्त्र्याष्टोत्तरशतवारञ्च तर्पयेत् । ऋषीन् तर्पयामि ।। छन्दांसि तर्पयामि ।। देवतास्तर्पयामि ।। हृदयदेवं तर्पयामि । शिरोदेवं तर्पयामि । शिखादेवं तर्पयामि । कवचदेवं तर्पयामि । नेत्रदेवं तर्पयामि । अस्त्रदेवं तर्पयामि ।

## ६४. अर्घ्यप्रदानम् —

ॐ आत्मैवेदं सर्वम् । ॐ ब्रह्मैवेदं सर्वम् । ॐ सर्वं खल्विदं ब्रह्म । ( इति त्रिवारमञ्जलिं दद्यात् ) ।

## ६५. उत्तरपूजनम् —

पूर्ववत्सम्पूज्य स्वहृदये सपरिवारदेवमुद्वासयेत् ।

उत्तिष्ठोत्तिष्ठ देवेश, पुनरागमनाय च ।
प्रसीद त्वं महेशान, प्रविश हृदये मम ।।२९०।।



दक्षिणहस्ते जलमादाय प्रणवेन द्वादशवारमभिमन्त्र्य वामकरे निक्षिप्य तदञ्जलितोयेन शिरः सम्प्रोक्ष्य चाचम्य प्राणायामत्रयं कुर्यात् । जलमादाय सङ्कल्पः ।

ॐ मनसा चिन्तितं यन्मे, वचसा भाषितं पुनः ।
कायेन च कृतं कर्म, सर्वं ब्रह्मार्पणं भवेत् ।। इति ।

## ६६. प्रणवोच्चारेण दण्डतर्पणम् —

द्वादश दण्डमूले तु, दण्डाग्रेऽपि तथैव हि ।
मुद्रायां द्वादश प्रोक्तं, प्रतिपर्वं त्रिधा ततम् ।।२९१।।[1]
द्विधालोड्य च मध्येन, मूले प्रोक्तं नवाङ्कितम् ।
अग्रे सप्ताङ्कितं प्रातरिति दण्डस्य तर्पणम् ।।२९२।।
शिरःप्रोक्षणमग्रेण, मूलेन पादप्रोक्षणम् ।
... ... ... ... ... ... ... ।।२९३।।
सुरास्तिष्ठन्ति दण्डाग्रे, दण्डमूले तु पूर्वजाः ।
प्रतिग्रन्थि तु गन्धर्वा, मध्ये तिष्ठन्ति मानवाः ।।२९४।।
अस्माकं ये कुले जाता, नामगोत्रविवर्जिताः ।
ते सर्वे तृप्तिमायान्तु, दण्डसम्बन्धिवारिणा ।।२९५।।
समाप्य यस्य स्मृत्येति, शङ्करादिकगुरून् नमेत् ।
ततोऽध्यात्मग्रन्थानां श्रवणादिकमाचरेत् ।।२९६।।

## ६७. तुर्या सन्ध्या —

ॐ अजपानाम गायत्री, योगिनां सिद्धिदा मता ।
हंसः पदं महेशानि ! प्रत्यहं जपते नरः ।।२९७।।
मोहाद् यो वै न जानाति, मोक्षस्तस्य न विद्यते ।
अजपां जपतो नित्यं, पुनर्जन्म न विद्यते ।।२९८।।
हकारेण बहिर्यान्तं, विशन्तञ्च सकारतः ।
चिन्तयेत्परमेशानि, जीवन्तं पक्षिरूपिणम् ।।२९९।।

---

१— अत्र २८९ तः २९४ संख्यां यावत् प्रोक्ताः श्लोकाः पूर्वोक्त–५८संख्यक–'दण्डतर्पण'–शीर्षकोक्ता एव सन्ति । अत्र विधेरावश्यकत्वात् पुनः प्रोक्ता इति ।

श्रीगुरोः कृपया देवि, ज्ञायते जप्यते सदा ।
उच्छ्वास-निःश्वासतया, बन्धमोक्षस्तदा भवेत् ।।३००।।

६८. न्यासाः —

ॐ हं सां सूर्यायाङ्गुष्ठाभ्यां नमः ।। ॐ हं सीं सोमाय तर्जनीभ्यां नमः ।। ॐ हं सूं निरञ्जनाय मध्यमाभ्यां नमः ।। ॐ हं सैं निराभासायानामिकाभ्यां नमः ।। ॐ हं सौं अतनुसूक्ष्माय कनिष्ठिकाभ्यां नमः ।। ॐ हं सः करतलकर-पृष्ठाभ्यां नमः ।। (एवं हृदयादि)

६९. ध्यानम् —

ॐ अस्य हंसस्य देवेशि, निगमागमपक्षकौ ।
उभावपि चाग्निसोमौ, वक्षो हंसः शिरो भवेत् ।।३०१।।
बिन्दुत्रयं शिखानेत्रे, मुखं नादः प्रकीर्तितः ।
शिवशक्तिपदद्वन्द्वं, कालाग्निपार्श्वयुग्मकम् ।।३०२।।
हंसः परमहंसोऽयं, सर्वव्यापी प्रकाशवान् ।
सूर्यकोटिप्रकाशश्च, स्वप्रकाशेन भासते ।।३०३।।

(ततो यथाशक्ति हंसमन्त्रं प्रजप्य समष्टिव्यष्टिक्रमेणाजपाजपनिवेदनं कुर्यात् ।)

७० अजपाजपनिवेदनम् —

ॐ गतारुणोदयादागाम्यरुणोदयपर्यन्तं श्वासप्रश्वासानुसारं कृतं षट्-शताधिकैकविंशतिसहस्राजपाजपेन गणेश-ब्रह्म-विष्णु-महेश-जीव-परमात्म-गुरवः प्रीयन्ताम् ।। चतुर्दले मूलाधारे षट्शतेन साङ्गः सावरणः सायुधः सशक्तिकः सवाहनः श्रीगणेशः प्रीयताम् ।। षड्दले स्वाधिष्ठाने सहस्रषट्केन[1] ब्रह्मा प्रीयताम् ।। दशदले मणिपूरके सहस्रषट्केन विष्णुः प्रीयताम् ।। द्वादशदलेऽनाहतचक्रे सहस्रषट्केन महेशः प्रीयताम् ।। षोडशदले विशुद्धचक्रे सहस्रेण जीवात्मा प्रीयताम् ।। द्विदलात्मकाज्ञाचक्रे सहस्रेण परमात्मा प्रीयताम् ।। (आचार्येभ्योऽत्र विशेषः) ईश्वराय सहस्रं० सदाशिवाय सहस्रञ्चेति । ब्रह्मरन्ध्रे सहस्रारे सहस्रेण श्रीगुरुः प्रीयताम् ।।[2]

---

१. अत्र साङ्गः सावरण इत्यादि पाठो योजनीयः ।

२. अजपा-समर्पणं त्रिभिः: प्रकारैर्भवति । तत्र प्रथमे प्रकारे सहस्रदले गुरव एव सर्वं समर्प्यते । द्वितीये प्रकारे गणेश-ब्रह्म-विष्णु-महेश-जीवात्म-परमात्म गुरुभ्यः समर्प्यंते । तृतीये प्रकारे च— गणेश-ब्रह्म-विष्णु-जीवात्म-ईश्वर-सदाशिव-गुरुभ्यः समर्प्यंते । अस्मिन् क्रमे आज्ञाचक्रत ऊर्ध्वस्थानां दशचक्राणां चिन्तनमपि भवति ।



गुह्यातिगुह्यगोप्त्रि त्वं, गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि, त्वत्प्रसादान्महेश्वरि ।।३०५।।
त्रैलोक्यचैतन्यमयीश्वरेशि, श्रीसुन्दरि त्वच्चरणाज्ञयैव ।
प्रातः समुत्थाय तव प्रियार्थं, संसारयात्रामनुवर्तयिष्ये ।।३०६।।

एवं सन्ध्योपासनं विधायान्ते स्वाधिकारानुरूपं प्रणवजपं प्रकुर्वीत । तथा चोक्तम् —

जपे द्वादशसाहस्रं, प्रणवस्य प्रयत्नतः[1] ।
सहस्रं श्रवणार्थी तु, योगाभ्यासी शतं जपेत् ।।३०७।।
निर्विकल्पसमाधिस्तु, न जपेत्किञ्चिदद्वयात् ।।

७१. जपनिवेदनमन्त्रः —

पुण्डरीकाक्ष विश्वात्मन्, मन्त्रमूर्ते जनार्दन ।
गृहाणेमं मन्त्रजपं, मम दीनस्य शाश्वत ।।३०८।।

७२. दण्डस्थापनमन्त्रः —

तिष्ठ त्वं देवदेवेश, तिष्ठ त्वं दण्डदैवत !।
ऋषिभिर्मुनिभिश्चैव, गन्धर्वैश्च समं सदा ।।३०९।।

७३. दण्डपतने ग्रहणमन्त्रो ध्यानं स्तुतिश्च —

उत्तिष्ठोत्तिष्ठ भगवन्, नारायण जगत्पते ।
दण्डरूपिन् महाविष्णो, प्रसीद पुरुषोत्तम ।।३१०।।
मातृपितृसमो दण्डो, भ्रातरो गुरवस्तथा ।
पथि साधनहेतुश्च, ब्रह्ममुद्रे नमोऽस्तु ते ।।३११।।
विष्णुहस्ते यथा चक्रं, शूलं शिवकरे यथा ।
इन्द्रहस्ते यथा वज्रं, तथा दण्ड भवाद्य मे ।।३१२।।

७४. यतीनामनाख्या-भासाक्रमौ —

दशावरणपूजां कृत्वा, श्रीदेवीं प्रतर्प्य च ।
उपचारैः षोडशभिः, साङ्गं सावरणं शिवम् ।।३१३।।

---

१. २६ संख्यकपृष्ठस्था पादटिप्पणी द्रष्टव्या ।

पूजयेन्मूलमन्त्रेण, गन्धपुष्पाक्षतादिभिः ।
महाषोढोदिताशेष-परिवारांश्च शाम्भवि ! ॥३१४॥
प्रणवादिनमोऽन्तेन, तत्तन्नाम्ना प्रपूजयेत् ।
... ... ... ... ... ... ... ॥३१५॥

७५. यतीनां कर्त्तव्यानि —

चक्राणां क्रमशो ध्यानं, जपनं चिन्तनं तथा ।
प्रणवस्य च मात्राणां, शक्तेश्च चिन्तनं खलु ॥३१६॥
कर्त्तव्यानि षडेतानि, यतिभिर्नियतं सदा ।
सम्प्रोक्तक्रमनिर्वाहादैश्वर्यं प्राप्यते ध्रुवम् ॥३१७॥
शौचं स्नानं जपं ध्यानं, सुरार्चनं भिक्षाटनम् ।
कर्त्तव्यानि षडेतानि, सर्वथा [1]नृपदण्डवत् ॥३१८॥

श्रीमदाद्यशङ्कराचार्य-विरचितः
श्रीयतिदण्डैश्वर्य-विधानान्तर्गतो विभूतिपादः ।



સમરીતિર્નિદાતેજાઃ પરબ્રહ્મ સનાતનઃ।
જયતાજ્જાનકીનાથો વેદવેદ્યો મહામતિઃ ॥
ankurnagpal108@gmail.com

[टिप्पणी: — अस्मिन् पादे ३१८ श्लोकाः सन्ति तेषु ३१ श्लोकाः ८ अर्द्धश्लोकास्तथा केचनान्ये श्लोका अपठिता विद्यन्ते । ]

१. गुरोराज्ञावदिति ।

# यतिदण्डैश्वर्य-विधाने

## तत्त्वपादः

१. प्रणवमहिमा—

अष्टाङ्गं च चतुष्पादं, त्रिस्थानं पञ्चदैवतम् ।
ओङ्कार-प्रभवं सर्वं, त्रैलोक्यं सचराचरम् ॥ १ ॥
त्रिस्थानं च त्रिमात्रं च, त्रिब्रह्म च त्रयाक्षरम् ।
त्रिमात्रमर्धमात्रं वा, यस्तं वेद स वेदवित् ॥ २ ॥
सर्वतत्त्वमयः सर्वमन्त्रदैवत-विग्रहः ।
सर्वाम्नायात्मकश्चायं प्रणवः परिपठ्यते ॥ ३ ॥

२. प्रणवस्य मात्रादेवतादि-ज्ञानावश्यकत्वम् —

तस्मात् तत्र प्रणवगा, मात्रास्तासां च देवताः ।
तन्मात्राश्चापि विज्ञेया, यतिभिर्दण्डधारिभिः ॥ ४ ॥

३. प्रणव-मात्रा-वर्णनम् —

अकारः प्रथमा मात्रा, उकारस्तदनन्तरम् ।
मकारश्चार्द्धमात्रा च, नादबिन्दू ततः परम् ॥ ५ ॥
मात्राषट्कमिदं ज्ञेयं, प्रणवस्थितमद्भुतम् ।
अर्द्धमात्रा त्वनुच्चार्या, तस्मात् पञ्चकमेव तत् ॥ ६ ॥

४. प्रणवस्य मात्राणां वर्णाः —

अकारः पीतवर्णः स्याद्, रजोगुण उदीरितः ।
उकारः सात्त्विकः शुक्लः, कृष्णो मस्तामसः स्मृतः ॥ ७ ॥

५. प्रणवस्यान्याः षोडश मात्राः —

मात्राः प्रणवस्यान्यास्तु, स्मर्यन्ते षोडशेति याः ।
ताश्च प्रस्तारभेदेन, प्रदर्श्यन्ते ततः परम् ॥ ८ ॥
कला ततः कलातीता, शान्ता शान्त्यतीता ततः ।
उन्मन्येकादशी प्रोक्ता, द्वादशी तु मनोन्मनी ॥ ९ ॥

**वैखरी मध्यमा पश्चात्, पश्यन्ती च परा ततः ।**
**एवं षोडशरूपोऽयं, प्रणवः सूक्ष्ममात्रकः ॥१०॥**

६. स्थूलादिभेदेनैतासां मात्राणां चतुःषष्टिमात्रात्वम् —

**ओङ्कारस्योक्तरूपस्य, मात्राणां पुनरेव हि ।**
**प्रत्येकं वै स्थूल-सूक्ष्म-बीज-तुर्य-प्रभेदतः ॥११॥**
**मात्राणां स्युश्चतुःषष्टी, रूपाण्यथ सनन्दन[1] ।**
**एता अपि पुनः सर्वा, वर्धन्ते चोक्तरूपतः ॥१२॥**

७. प्रकृति-पुरुषात्मकतया प्रणवमात्राणां द्वैविध्यम् —

**प्रकृत्या पुरुषेणैता, अष्टाविंशतिकोत्तराः ।**
**शतमात्राश्च सिद्ध्यन्ति, द्वैविध्यं समुपाश्रिताः ॥१३॥**

८ सगुण-निर्गुणात्मकतया पुनरपि द्वैविध्यम् —

**ततो द्विशतं मात्राः स्युः, षट्पञ्चाशत् पराश्च ताः ।**
**द्वैविध्यं सगुणेनैवं, निर्गुणेन समाश्रिताः ॥१४॥**
**एता मात्राः क्रमेणाग्रे, वक्ष्यन्ते देवतायुताः ।**
**यासां स्मरणमात्रेण, नरः सिद्धिमवाप्नुयात् ॥१५॥**

९. प्रणवस्याम्नायक्रमदीक्षास्वरूपम् —

**यानि तत्र चतुःषष्टी, रूपाणि प्रणवस्य तु ।**
**तान्येव तावदाम्नाय-क्रम-दीक्षाः[2] प्रकल्पिताः ॥१६॥**

१०. प्रणवस्याम्नाय-स्वरूपम् —

**प्रणवः सर्वविद्यानां, यथोत्पत्तिस्थलं स्मृतम् ।**
**तथैवाम्नायरूपत्वं, प्रसिद्धं साधनाविधौ ॥१७॥**

११. आम्नायानां मूलतः षड् भेदाः —

**दिशश्चतस्रः पूर्वाद्या, ऊर्ध्वाधोदिग्युतास्तथा ।**
**षडाम्नायाः साधनायां, तन्त्रविद्भिः प्रकीर्तिताः ॥१८॥**

---

१, अत्र सनन्दनपदेन 'पद्मपादाचार्य !' इति बोध्यम् ।

२. क्रमदीक्षाया विषये भूमिकायां परिशिष्टे च विलोकनीयम् ।



**इदं षोढात्मकं रूपं, प्राणिनां देहसंश्रितम् ।**
**षट्चक्रस्वरूपेण, राजतेऽध्यात्ममूलकम् ॥१९॥**
**चक्रषट्कमिदं स्थूलं, तथा सूक्ष्मं च विद्यते ।**
**अतिसूक्ष्मस्वरूपं तु, षोढातः परिवर्धते ॥२०॥**
**ओङ्काररूपतैवैषां, चक्राणां नाम-भेदतः ।**
**क्रमदेवादि-व्यवस्था, वर्ण्यतेऽत्र विशेषतः ॥२१॥**

१२. प्रणवस्य कूटात्मकं महानिर्वाणस्वरूपम् —

**अकारो वाग्भवः कूट, उकारः कामराजकः ।**
**मकारः शक्तिकूटात्मा[1], नादः श्रीषोडशी-तनुः ॥२२॥**
**बिन्दुर्महाषोडशीति, नित्यं कूटात्मता-स्थितः ।**
**महानिर्वाणरूपोऽयं, वर्तते प्रणवः स्वराट् ॥२३॥**

१३. प्रणवमात्रास्वाम्नायव्यवस्था —

**अ-उ-मा नाद-बिन्दू च, मात्राः पञ्च यथाक्रमम् ।**
**पञ्चाम्नायाः समाख्याताः, पूर्वादिक्रमतो बुधैः ॥२४॥**
**अर्द्धमात्रा त्वनुच्चार्या, तस्मादत्र विचारणा ।**
**यतिभिर्नैव विहिता, कार्यस्तत्र न संशयः ॥२५॥**

१४. प्रणवमात्राणां सृष्टयादिक्रमः —

**अकारादिक-बिन्द्वन्ता, मात्रा याः प्रणवस्थिताः ।**
**सृष्टि-स्थिति-लयानाख्या-भासास्ता एव संस्मृताः ॥२६॥**

१५. दिक्क्रमेण सृष्टयादिक्रमेण च प्रणवमात्राव्यवस्था —

**अकारः पूर्व आम्नायः, कथितः सृष्टिबोधकः ।**
**उकारो दक्षिणः प्रोक्त, आम्नायः स्थितिवाचकः ॥२७॥**
**मकारः पश्चिमाम्नायरूपः स्याल्लयसंज्ञितः ।**
**नादः स्यादुत्तराम्नायोऽनाख्या-क्रम-विबोधकः ॥२८॥**

---

१. षट्चक्रेषु द्वयोर्द्वयोश्चक्रयोर्मेलनेन निष्पन्नानामुपाम्नायस्य चतुर्णां चक्राणां वर्णनमग्रे भविष्यति ।

बिन्दुः स्यादूर्ध्व आम्नायो, भासाभावस्य सूचकः ।
अधराम्नाय एतेषां[1], सदा विश्रान्तिको भवेत् ॥२९॥
अधरस्य समष्टिस्तु, दक्षिणे प्रभविष्यति ।
यथैवोत्पद्यते वाणी, यथावद् बीजरूपतः ॥३०॥
अनेनैव क्रमेणात्र, मात्राणां स्थितयो मताः ।
बिन्दौ चतस्रश्चान्यत्र, तिस्रः स्युर्गुणिताः क्रमात् ॥३१॥
पूर्वाम्नायः सृष्टिरूपः, स्थितिरूपश्च दक्षिणः ।
संहारः पश्चिमो ज्ञेयो, ह्यन्तर्लीनस्तथोत्तरः ॥३२॥
ऊर्ध्वश्चानुग्रहो भूयश्चाधो विश्रान्तिको भवेत् ।
एषाऽऽम्नाय-व्यवस्थैव, तन्त्रे सर्वत्र वर्णिता ॥३३॥
मन्त्रयोगं विदुः पूर्वे, भक्तियोगं च दक्षिणे ।
पश्चिमे कर्मयोगं च, ज्ञानयोगं तथोत्तरे ॥३४॥
ऊर्ध्वे विज्ञानयोगं च, शब्दयोगं तथाऽधरे ।
चिन्तयित्वा क्रियां कुर्यात्, ततः सिद्धिमवाप्नुयात् ॥३५॥

१६. आम्नायानामुपासनाफलम् —

एकैकाम्नायजा मन्त्रा, भुक्तिमुक्तिफलप्रदाः ।
एकाम्नायं च यो वेत्ति, स मुक्तो नात्र संशयः ॥३६॥
किं वा पुनः षडाम्नाय-वेत्ता साक्षाच्छिवो भवेत् ।
अतस्तु तत्तन्मन्त्राणां, ज्ञानं कर्त्तव्यमेव हि ॥३७॥

१७. प्रणवमात्रासु शिवस्वरूपपूर्वकं सृष्ट्यादिव्यवस्था —

अकारः सृष्टिरूपो यः, पूर्वाम्नायात्मना स्थितः ।
स च तत्पुरुषाख्यस्तु, स्मृतो वाग्भवकूटवान् ॥३८॥
उकारः स्थितिरूपः स्याद् दक्षिणाम्नायरूपकः ।
अघोरनाम्ना विख्यातः, कामराजस्य कूटवान् ॥३९॥

१. पञ्चानां स्यादिति पाठा० ।



मकारो लयरूपः स्यात्, पश्चिमाम्नायरूपधृक् ।
सद्योजात इति ख्यातः, शक्तिकूटात्मना स्थितः ॥४०॥
अर्धमात्रायाः कालाग्नि-रुद्राख्यस्तु शिवः स्मृतः ।
अधराम्नायो व्याख्यातः, कादिकूटसमन्वितः[1] ॥४१॥
सोमात्मकं परं प्रोक्तं, सदा साक्षि सदाऽच्युतम् ।
पातालानामधोभागे, कालाग्निर्यः प्रतिष्ठितः ॥४२॥
नादोऽनाख्यारूप उक्तो, महाषोडशिकायुतः[2] ।
वामदेवाभिधः सोऽयं, सदा सप्तदशीयुतः ॥४३॥
बिन्दुरूर्ध्वाम्नाय उक्तो, भासा रूपावबोधकः ।
ईशानः शिवविख्यातो, नित्यमष्टादशीयुतः ॥४४॥

१८. अकारमात्रायाश्चक्र-विद्या-कूट-क्रमाम्नायाः —

अकारस्य विशुद्धञ्च, स्वाधिष्ठानमनाहतम् ।
भवन्ति त्रीणि चक्राणि, कादिविद्या तथैव च ॥४५॥
वाग्भवं कूटमाम्नातं, कुण्डलीक्रम उच्यते ।
उत्तरः प्राक् पश्चिमश्चेत्याम्नायास्त्रय एव हि ॥४६॥

१९ कादि-हादि-सादिक्रमकूटव्यवस्था —

(अ—उ—म)

सौम्यैन्द्रीपश्चिमाम्नायत्रितयात्मा च वाग्भवः ।
कादिः स एव कथितः, कूट आगमवेदिभिः ॥४७॥
याम्याधरोर्ध्व-त्रितयाम्नायात्मा कामराजकः ।
हादिः स एव कथितः, कूटस्तन्त्रविशारदैः ॥४८॥
उपाम्नायप्रभेदानां, संस्मृतः शक्तिकूटकः ।
सादिः स एव कथितः, कूटक्रम-विवेचकैः ॥४९॥

१. यद्यप्यधराम्नायः सादिकूटात्मक एव तथापि स कादिकूटेन समन्वित इत्यपि प्रोक्तम् ।

२. सदानुग्रहकारक इति पाठा० ।

२०. कूटत्रयस्य देवताः —

**कादिः काली समाख्याता, हादिः श्रीसुन्दरी मता ।**
**सादिश्च तारिणी प्रोक्ता, क्रमज्ञैस्तत्त्वदर्शिभिः ॥५०॥**

२१. कादि-विद्यानां क्रमाः —

**कादिः कुण्डलिनी प्रोक्ता, हादिर्हंसक्रमो मतः ।**
**कहादि-सादिस्तत्त्वज्ञैः, संवरौधिक्रमः स्मृतः ॥५१॥**

२२. कादिक्रमाणां प्रणवमात्राक्रमः —

**अकारः कादिरूपः स्यादुकारो हादिरूपकः ।**
**कहादि-सादि-रूपश्च, मकारस्तत्र वर्णितः ॥५२॥**

**काली कादेः सुन्दरी च, हादेः शक्तिः समीरिता ।**
**कहादिसादिभेदानां, तारिणी शक्तिरीरिता ॥५३॥**

२३. प्रतिकूटं क्रमः कादिक्रमाणां सृष्ट्यादिसन्धानञ्च —

**कादि-हादि-सादि-काली, सुन्दरी तारिणीति च ।**
**पूर्वपञ्चसु सृष्ट्यादौ, सन्दध्यात् सततं बुधः ॥५४॥**
**कादिः सृष्टिस्तथा हादिः, स्थितिरूपः सदैव हि ।**
**कहादि-सादिः संहाररूप उक्तो महात्मभिः ॥५५॥**
**सृष्टिः स्थितिश्च संहारोऽनाख्याभासाभिधः क्रमात् ।**
**प्रतिकूटं भवेत् पञ्च, पञ्चेति गदितं क्रमात् ॥५६॥**
**कादित्वाद् ब्रह्मरूपत्वं, हादित्वाच्छिवरूपता ।**
**चिच्छक्तिः कादिरूपा स्याद्, हादिश्चिद्ज्ञानगोचरा ॥५७॥**
**चिदानन्दस्वरूपाख्यं, शिवशक्त्यात्मकं महः ।**
**कादिस्तु कामराजोऽस्ति, हादिर्लोपा पुरे[मुदे]रिता ॥५८॥**
**एवं हि शास्त्रसम्मत्या, पारिभाषिकमीरितम् ।**
**... ... ... ॥५९॥**



२४. अकारस्य मात्रायाः शक्तयः —

(कादिवाग्भवकूटकुण्डलिनीक्रमोत्तरपूर्वपश्चिमाम्नायाः)

**अकारमात्राः कथ्यन्ते, सिद्धिलक्ष्म्यादिनामतः ।**
**भरतोपासिता गुह्यकाली—नाम्ना प्रतिष्ठिता ॥६०॥**
**रामेणोपासिता गुह्यकाली चैव तथा भवेत् ।**
**चण्डकपालिनी गुह्यकाली चैव सदा स्मृता ॥६१॥**
**कामकला गुह्यकाल्युन्मनी पूर्णेश्वरी स्वयम् ।**
**भुवना भुवनेशी च, भुवनेश्वर्येव संस्मृता ॥६२॥**
**समयाऽघोरवीरे च, वज्राऽघोरे हि कुब्जिके ।**
**कर्मकुब्जिका चेति वै, मात्राः षोडश सूचिताः ॥६३॥**
**विशुद्धचक्रगा देव्य, उत्तराम्नाय-वर्णिताः ।**
**पञ्चात्र डाकिनी चक्रदेवतासहिता मताः ॥६४॥**
**स्वाधिष्ठानस्य पञ्च स्युः, पूर्वाम्नायस्य देवताः ।**
**काकिनी चक्रदेवी च, मता ह्यत्र तथा परम् ॥६५॥**
**पश्चिमाम्नायदेव्यः स्युरनाहतगताश्च षट् ।**
**राकिनी देवता तत्र, दर्शिता क्रमपूर्वकम् ॥६६॥**

२५. उकारमात्रायाश्चक्र-विद्या-कूटक्रमाम्नायाः —

**मणिपूरं मूलाधारमाज्ञाचक्रं तथैव च ।**
**चक्राण्युकारस्यैतानि, हादिविद्या च तद्गता ॥६७॥**
**कूटं श्रीकामराजस्य, क्रमो हंसाख्य एव च ।**
**दक्षिणाधरोर्ध्वाम्नायास्त्रय एवात्र सिद्धिदाः ॥६८॥**

२६ उकारस्य मात्रायाः शक्तयः —

(हादि-कामराजकूट-हंसक्रम-दक्षिणाधरोर्ध्वाम्नायाः)

**आद्याकाली च महाद्या-काली चैव तथा भवेत् ।**
**श्यामाकाली सिद्धिकाली, दक्षिणाकालिका ततः ॥६९॥**

तारिण्येकजटा चोग्रतारा नीलसरस्वती ।
महानीला महोग्रा च, शारदा चैव सम्मताः ॥७०॥
बालादित्रिपुरा बाला-सुन्दरी बालाभैरवी ।
बालापूर्वा या त्रिपुरा, भैरवी सैव सुन्दरी ॥७१॥
उकारस्यापि तत्तन्त्रे, मात्राः षोडश सिद्धिदाः ।
दक्षिणाम्नायदेवीनां, पञ्चकञ्चात्र दर्शितम् ॥७२॥
मणिपूरगताश्चैता, लाकिनी-देवता मता ।
अधराम्नायदेवीनां, पञ्चकञ्च ततः परम् ॥७३॥
मूलाधारगताश्चैताः, साकिनी-देवता मता ।
ऊर्ध्वाम्नायस्य देवीनां, षट्कमालागतं मतम् ॥७४॥
हाकिनी देवता तत्र, चक्रस्यापि समाश्रिता ।
एवं देहस्य चक्रेषु, देव्य एताः सनायिकाः ॥७५॥

२७. मकारमात्राया अधोमुखचक्र-विद्या-कूट-क्रमाम्नायाः —

प्रणवस्य मकाराख्या, मात्रा या वर्णिता पुरा ।
उपाम्नायात्मिका सा तु, प्रथिता तन्त्रवित्तमैः ॥७६॥
अनाहतं मणिपूरं, शिलष्ट्वा नैऋत्यदिग् भवेत् ।
मणिपूरं स्वाधिष्ठानं, मिलित्वाग्नेय उच्यते ॥७७॥
स्वाधिष्ठानविशुद्धे च, मिलित्वेशानदिग् भवेत् ।
विशुद्धानाहते शिलष्ट्वा, वायव्यात्मकतां व्रजेत् ॥७८॥
अधोमुखानि चक्राणि, सन्त्येतानि स्थितानि हि ।
सादिविद्या शक्तिकूटं, संवरौधः क्रमः स्मृतः ॥७९॥
उपाम्नायाश्च दिक्कोणा, नैऋत्याग्नीशवायवः ।
परस्परं समाश्लिष्टा, भवन्त्येव न संशयः ॥८०॥
उपाम्नायसमष्टौ तु, वाम-दक्षिण-भेदतः ।
क्रमद्वयं फलापेक्षावशात् संसूचितं ततः ॥८१॥



वामावर्तक्रमस्तत्रानुग्रहाख्य उदीरितः ।
दक्षिणावर्तसंज्ञस्तु, निग्रहाभिध उच्यते ॥८२॥
डाकिनीसहितो ब्रह्मा, मूलाधारे हि तिष्ठति ।[1]
राकिनीसहितो विष्णुः, स्वाधिष्ठाने व्यवस्थितः ॥८३॥
लाकिनीसहितो रुद्रो, मणिपूरे सुरेश्वरि ।
अनाहते महापद्मे, काकिनीसहितो हरः ॥८४॥
विशुद्धाख्ये वसेन्नित्यं, साकिनी च सदाशिवः ।
हाकिनी परशिवश्चाज्ञाचक्रे सुरेश्वरि ॥८५॥
उपर्युक्तः क्रमो वामावर्तेनात्र तु वर्णितः ।
वायव्येशानाग्निकोणा, नैर्ऋत्यश्चेति दक्षिणे ॥८६॥

२८. मकारस्य मात्रायाः शक्तयः —

प्रतीचीस्था तु मातङ्गी, मोहिनी श्रीसरस्वती ।
दक्षिणस्था तथा तारा, भद्रकाली हि नैर्ऋते ॥८७॥
बगला दक्षिणस्था महालक्ष्मीः कमला मता ।
भवत्याग्नेय-कोणस्था, महालक्ष्मीश्च सर्वथा ॥८८॥
पूर्वस्य सिद्धिलक्ष्मीश्च, महाकाली (पञ्चवक्त्रा) तथोत्तरा ।
पूज्या चेशानकोणस्था, महाकाली दशानना ॥८९॥
प्रतीच्याश्चण्डमातङ्गी, छिन्नमस्ता तथोत्तरा ।
वायव्ये च समाराध्या, महापूर्वा सरस्वती ॥९०॥
त्रिशक्तियुक्ता चामुण्डा, सम्भूयेमा भवन्ति हि ।
उपाम्नायगताश्चैताः, शक्तयः समुदीरिताः ॥९१॥
अर्धमात्रा नादबिन्दू, ऊर्ध्वाम्नायगता इमे ।
तस्माच्चक्रादिकं नात्र, सूचितं पूर्वसूरिभिः ॥९२॥

२९. अर्द्धमात्रायाः शक्तयः —

अर्द्धचन्द्रस्य मात्रासु, पञ्चदश्यादिसंस्मृता ।
लघुषोडशी षोडशी, तथा च दीर्घषोडशी ॥९३॥

---

१ – मूलाधारे डाकिनी स्याच्छक्तिर्ब्रह्माण्यवस्थिता, इति पाठा० ।

तथा सप्तदशी चैव, पूज्या चाष्टदशी ततः ।
चतुःपूर्वा तु समया, नित्या सैव प्रकीर्तिता ॥९४॥
वर्णिता च चतुष्कूटा, महात्रिपुरसुन्दरी ।
रश्मियुक्ताः शाम्भवाश्च, वर्णिताः क्रमपूर्वकम् ॥९५॥

३०, नादमात्रायाः शक्तयः —

प्रणवस्य ततोऽप्यग्रे, नादे तु पञ्चपञ्चिका ।
पञ्चसिंहासना भाति, पराप्रासादनाम्न्यपि ॥९६॥
श्रीप्रासादा यथा वर्ण्या, दशचक्रेश्वरी तथा ।
तथा च षोडशी नित्या, महाषोडशशालिनी ॥९७॥
चक्रेश्वरी ततः साक्षान्महात्रिपुरसुन्दरी ।
अर्द्धचन्द्रस्य मात्रासु, शोभते गुरुपादुका ॥९८॥
सम्मिल्यासां त्रिनवतिर्मातॄणां भवति स्फुटम् ।
... ... ... ... ... ॥९९॥

३१. बिन्दुमात्रायाः शक्तयः—

बिन्दुमात्रासु वर्ण्यन्ते, सर्वमन्त्रेश्वरी तथा ।
आम्नायानां तथा षण्णां, साकं निर्वाणविद्यया ॥१००॥
नवरत्नकुब्जिकाश्च, पञ्चापि समयाश्च ताः ।
नवरत्नसुन्दरी च, यथा चैव तथा स्मृता ॥१०१॥
तथा षोडशकूटैश्च, महात्रिपुरसुन्दरी ।
अन्ते तत्र च महानिर्वाणेश्वर—भैरवः ॥१०२॥
सङ्केतः किन्तु षोडश्याः, सप्तसंख्या यतः स्मृता ।
तत एव न विश्रान्तिः, षोडश्यां कथिता बुधैः ॥१०३॥
अतश्च क्रमशः सप्तदशी चाष्टदशी तथा ।
महानिर्वाणरूपश्च, प्रणवस्तत्र मन्यते ॥१०४॥
मूलाधारस्तथा स्वाधिष्ठानञ्च मणिपूरकम् ।
अनाहतं विशुद्धञ्च, आज्ञा चेति स्मृतानि षट् ॥१०५॥



मूलाधारादिचक्राणि, दण्डे सङ्कल्प्य देहवत् ।
कार्या तत्तद्देवतानां, यतिभिस्तत्र भावना ॥१०६॥
किं वा देहस्थचक्रेषु, कृत्वा सम्यगुपासनाम् ।
दण्डे विचिन्तयेत् पश्चाद्, यतिस्तासां तदात्मताम् ॥१०७॥
स्थूलसूक्ष्मलिङ्गभेदैस्त्रिधाऽयं देह उच्यते ।
त्रिष्वप्येतेषु चक्राणि, कल्प्यन्ते योगिभिः पृथक् ॥१०८॥
स्थूले पृथ्व्यादितत्त्वानि, प्रकल्प्यन्ते यथाक्रमम् ।
किन्तु तत्र भवेदीषद्भेदः सोऽपि विचार्यताम् ॥१०९॥
मूलाधारे मही तत्र, मणिपूरे जलं तथा ।
स्वाधिष्ठाने भवेद् वह्निरित्यवस्थाविशेषतः ॥११०॥
चण्डिका चैव चामुण्डा, भद्रकाली तथा स्मृता ।
भद्रकाल्या समं दुर्गा, तथा चैव सरस्वती ॥१११॥
तथा मोहिनी मातङ्गी, विपरीतप्रत्यङ्गिरा ।
भद्रकाली महासरस्वती चैव तथा मता ॥११२॥
कात्यायनीसमं दुर्गा, महालक्ष्मीश्च तारिका ।
महालक्ष्मीश्चोग्रचण्डा, यथानाम तथागुणा ॥११३॥
पञ्चवक्त्रा महाकाली, सैवास्ते रक्तदन्तिका ।
दशवक्त्रा महाकाली, चामुण्डा च त्रिशक्तिभिः ॥११४॥
एता मकारगा मात्रा,[1] अष्टादश मताः शुभाः ।
उपाम्नायगता देव्यो, नैर्ऋत्यादिक्रमस्थिताः ॥११५॥
यत्र युग्मादिदिशोरेकः कोणो भवत्यथ ।
अधोमुखे च कमले, प्रत्येकं स्थितिरिष्यते ॥११६॥

३२. कादि-हादि-सादि-कूटानां पाठान्तरं कुण्डलिन्यादिक्रमश्च —

कादिः कुण्डलिनी प्रोक्ता, हादिर्हंसक्रमो मतः ।
कहादि-सादिस्तत्त्वज्ञः, संवरौधिक्रमः स्मृतः ॥११७॥

१. मकारमात्राशक्तय; इति पाठान्तरम्

सौम्यैन्द्री पश्चिमाम्नाय-त्रितयात्मा च वाग्भवः ।
कादिः स एव कथितः, कूट आगमवेदिभिः ॥११८॥
याम्याधरोर्ध्वत्रितयाम्नायात्मा कामराजकः ।
हादिः स एव कथितः, कूटस्तन्त्रविशारदैः ॥११९॥

३३. कादिक्रमाणां सृष्ट्यादि-सन्धानम् —

कादि-हादि-सादि-काली-सुन्दरी-तारणीति च ।
पूर्वपञ्चसु सृष्ट्यादौ, सन्दध्यात् सततं बुधः ॥१२०॥
उपाम्नायप्रभेदानां, संस्मृतः शक्तिकूटकः ।
सादिः स एव कथितः, कूटक्रमविवेचकैः ॥१२१॥

३४. कूटत्रयस्य देवताः —

कादिः काली समाख्याता, हादिः श्रीसुन्दरी मता ।
सादिश्च तारिणी प्रोक्ता, क्रमज्ञैस्तत्त्वदर्शिभिः ॥१२२॥
कादित्वात् ब्रह्मरूपत्वं, हादित्वाच्छिवरूपता ।
चिच्छक्तिः कादिरूपा स्याद्, हादिश्चिदज्ञानगोचरः॥१२३॥
चिदानन्दस्वरूपाख्यं, शिवशक्त्यात्मकं महः ।
कादिस्तु कामराजोऽस्ति, हादिर्लोपा पुरेरिता ॥१२४॥
... ... सम्मत्या पारिभाषिकमीरितम् ॥१२५॥

३५. ब्रह्मचारि-गृहस्थ-वानप्रस्थ-यतीनां श्रीचक्रार्चनक्रमः —

सृष्ट्यर्चनां ब्रह्मचारी, कुरुते बिन्दुयुग्मके ।
प्रथमस्तत्र सोऽस्त्येव, द्वितीयश्चक्रराड् भवेत् ॥१२६॥
सेव्यसेवकभावोऽयं, दासोऽहमिति भावना ।
विसर्गरूपौ द्वौ बिन्दू, सृष्टिरूपावुदाहृतौ ॥१२७॥
स्थित्यर्चने गृहस्थस्तु, बिन्दुत्रितयपूजकः ।
प्रथमस्तत्र सोऽस्त्येव, द्वितीया सहधर्मिणी ॥१२८॥



तृतीयश्चक्रराट् प्रोक्त, ऐक्यमेषां विभावयेत् ।
अनुस्वारो विसर्गश्च, बिन्दुत्रयमुदाहृतम् ॥१२९॥
ऐकमत्यं तु पूजायां, साधकः कुरुते तथा ।
अन्यत्र वै भावयते, सेव्यसेवकभावनाम् ॥१३०॥
वानप्रस्थस्तु संहारपूजां स्वामेकबिन्दुके ।
बिन्दुत्रयं विभाव्यैव, स्वात्मनोऽभेदभावनाम् ॥१३१॥
करोति तत्र श्रीचक्रे, चतूरूपेण संयुताम् ।
अनुस्वारोऽत्र सम्प्रोक्तः, सृष्टि-स्थिति-विवर्जितः ॥१३२॥
सर्वेषामत्र पिण्डे स्वे, भावयन्नेकरूपताम् ।
सोऽहं सन् सुखमाप्नोति, श्रीचक्रार्चनसंयुतः ॥१३३॥
यतिस्तु दण्डे पिण्डे च, श्रीयन्त्रे चैव भावनाम् ।
पूर्वं कुर्वन् क्रमादग्रे, वर्धते साधकोत्तमः ॥१३४॥
चतुर्गुणां पञ्चगुणां, षड्गुणां सप्तरूपकाम् ।
भावनां भावयन् नित्यं, यतिराड् भवति ध्रुवम् ॥१३५॥
सप्तचक्राणि क्रमशो, नाम्नैतानि भवन्ति हि ।
स्वराट्चक्रं विराट्चक्रं, सम्राट्चक्रं विराजकम् ॥१३६॥
विश्वरूपं शत्रुजिच्च, स्वात्मचक्रं तथैव च ।
एवं सप्तकलारूपं, चक्रराजं यजेद् यतिः ॥१३७॥
चक्रसप्तकमेतत्तु, नाहम्भावेन भावयन् ।
यन्त्रराजे ब्रह्ममुद्रा-पशुमुद्रायुगे तथा ॥१३८॥
दण्डे पिण्डे तथाऽऽज्ञातः, सहस्रारावधि क्रमात् ।
श्रीचक्रे च तथाऽऽज्ञातो, मूलाधारावधि क्रमात् ॥१३९॥
सम्पन्ने श्रीचक्रराजे, सर्वैक्यं साधयेत् तदा ।
सहकारविलोपेन, प्रणवात्मकतां व्रजेत् ॥१४०॥

एवं क्रमात् पञ्चतत्त्वमनस्तत्त्वजयो भवेत् ।
अहन्तत्त्वजयं लब्ध्वा, दिव्यसाम्राज्यदीक्षितः ॥१४१॥
परिव्राट् परितो भाति, सर्वसिद्धिसमन्वितः ।
ऐश्वर्येण समायुक्तो, निग्रहानुग्रह—क्षमः ॥१४२॥
तदैव धर्मरक्षायां, समर्थोऽपि भवेच्च सः ।
ततः परं नैव लोके, किञ्चित् कर्मावशिष्यते ॥१४३॥
गुरोराज्ञां समादाय, मणिपूर—सरोजके ।
दशधा प्रजपेद् विद्यां, सावधानेन चेतसा ॥१४४॥
मूलाधारं समेत्याथ, प्रजपेद्दशधा मनुम् ।
मूलाधारात्तदाज्ञायामागत्य दशधा जपेद् ॥१४५॥
आज्ञाचक्राद् विशुद्धाख्ये, जपेद् दश समाहितः ।
ततः स्वाधिष्ठानमेत्य, दशधा प्रजपेन्मनुम् ॥१४६॥
स्वाधिष्ठानात् समेत्याऽनाहतं तत्र जपेद् दश ।
द्वौ द्वौ सम्मेलयेत् तेन, भवेत् कोणचतुष्टयम् ॥१४७॥
तत्र नैर्ऋत्यमाश्रित्य, वायव्यान्तं प्रपूजयेत् ॥१४८॥
मोहिनी मातङ्गी सरस्वती पश्चिमदिग्गता ।
दक्षिण उग्रतारया, युज्यते जायते तदा ॥१४९॥
नैर्ऋत्याधिष्ठात्री चैषा, चामुण्डेति निगद्यते ।
लोके त्वेषा महामाया, भद्रकालीति गीयते ॥१५०॥
पूर्वस्था कमला देवी, बगला याम्यदिग्गता ।
संश्लिष्टाग्नेयकोणस्य, महालक्ष्मीर्निगद्यते ॥१५१॥
पूर्वस्था सिद्धलक्ष्मीश्च, पञ्चवक्त्रा तथोत्तरा ।
मिलित्वा दशवक्त्राथ, महाकालीति कथ्यते ॥१५२॥
प्रतीच्याश्चण्डमातङ्गी, छिन्नमस्ता तथोत्तरा ।
वायव्यस्य मिलित्वा च, महासरस्वती ननु ॥१५३॥



एतास्तु लम्बिकायां वै, पूजनीया विधानतः ।
बिन्दौ नवार्णमन्त्रश्च, पूजनीयः प्रयत्नतः ॥१५४॥

३६. विराट्-प्रणव-स्वरूपम् —

अयुतावयवैर्युक्तो, ह्यकारस्तत्र वर्णितः ।
शतावयवसंयुक्त, उकारः समुदाहृतः ॥१५५॥
सहस्रावयवैर्युक्तो, मकारस्तु निर्दशितः ।
अर्धमात्रश्च प्रणवो, ह्यनन्तावयवः स्मृतः ॥१५६॥
विराट् प्रणवः सगुणः, संहारो निर्गुणात्मकः ।
उभयात्मक उत्पत्ति-प्रणवः समुदाहृतः ॥१५७॥
यथार्थ-कथनः प्रोक्तोऽभिमानोत्पत्तिकः सदा ।
संहारश्चोपसंहारः, प्रणवः सोऽभिधीयते ॥१५८॥
उभयात्मकत्वादुक्तो, विराट् प्रणवनायकः ।
दीर्घप्लुतविराट् चैवोत्पत्तिप्रणव आहितः ॥१५९॥
प्लुतप्लुत्युपसंहारः, प्रणवोऽत्र निगद्यते ।
षट्त्रिंशत्तत्त्वसंयुक्तो, विराट्—प्रणव उच्यते ॥१६०॥
जाग्रदाद्याश्चतस्रो याः, अवस्थाः समुदीरिताः ।
ताश्चतुर्मात्रिके ह्यस्मिन्, योगात् षोडशतां गताः ॥१६१॥
कूटषोडशयोगाच्च, चतुःषष्टिमिताः स्मृताः ।
द्वैविध्यात् पुनरेतासां, प्रकृतेः पुरुषस्य च ॥१६२॥
अष्टाविंशत्युत्तरकाः, शतं मात्रास्ततः स्मृताः ।
सगुणत्वं निर्गुणत्वं, प्राप्य ब्रह्ममयो ह्ययम् ॥१६३॥

क्वापीत्थं प्राप्यते —

—कलातीतश्चेति तत्र चत्वारः । अकारश्चायुतावयवान्वितः । उकारः शतावयवान्वितः । मकारः सहस्रावयवान्वितः । अर्धमात्रप्रणवोऽनन्तावयवान्वितः । सगुणो विराट्—प्रणवः । संहारो निर्गुणप्रणवः । उभयात्मक उत्पत्तिप्रणवः ।

यथार्थंकथन इत्युच्चार्याभिमानोत्पत्तिप्रणवः । सर्वोणसंहारेण संहारप्रणवः । उभयात्मकत्वात् विराट्प्रणवः षोडशमात्रान्वितः । षड्त्रिंशत्तत्त्वयुतः । षोडशमात्रात्मकं कथमित्युच्यते–अकारः प्रथमः । द्वितीय उकारः । मकारस्तृतीयः । अर्धमात्रा चतुर्थी । नादः पञ्चमः । बिन्दुः षष्ठः । कला सप्तमी । शक्तिरष्टमी । शान्तिर्नवमी । समाना दशमी । आत्मनैकादशी । मनोन्मना द्वादशी । वैखरी त्रयोदशी । मध्यमा चतुर्दशी । पश्यन्ती पञ्चदशी । परा षोडशी । इति षोडश–मात्रात्मकः प्रणवः । षोडशमात्रा जाग्रत्स्वप्नसुषुप्तितुरीयावस्थाभेदैरेकैकमात्रा चतुर्विध (भेद)–मेत्य षोडशमात्राश्चतुः षष्टिभेदमेत्य पुनश्च चतुष्षष्टिभेदैरेकैक-मात्राः । प्रकृतिपुरुषद्वैविध्यमायाद्यष्टविंशत्युत्तरभेदमात्रा-स्वरूपमाप्नोति । सगुण-निर्गुण एकोऽयं प्रणवः । सर्वाधारः परं ज्योतिरेष सर्वेश्वरो विभुः । सर्वदेवमयः सर्वप्रपञ्चाधारे वर्णितः । सर्वाधारमयः कालः, सदा सद्भिरुदीरितः । इति ।।

ओमित्येकाक्षरं ब्रह्म, यदुक्तं ब्रह्मवादिभिः ।
शरीरं तस्य वक्ष्यामि, स्थानं कालत्रयं तथा ।।१६४।।

तत्र देवास्त्रयः प्रोक्ता, लोका वेदास्त्रयोऽग्नयः ।
तिस्रो मात्रा अर्धमात्रा, सा प्रत्यक्षा शिवस्य च ।।१६५।।

ऋग्वेदो गार्हपत्यं च, पृथिवी ब्रह्म एव च ।
अकारस्य शरीरं तु, व्याख्यातं ब्रह्मवादिभिः ।।१६६।।

यजुर्वेदोऽन्तरिक्षं च, दक्षिणाग्निस्तथैव च ।
विष्णुश्च भगवान् देव, उकारः परिकीर्तितः ।।१६७।।

सामवेदस्तथा द्यौश्चाहवनीयस्तथैव च ।
ईश्वरः परमो देवो, मकारः परिकीर्तितः ।।१६८।।

सूर्यमण्डलमाभाति, ह्यकारश्चन्द्रमध्यगः ।
उकारश्चन्द्रसङ्काशस्तस्य मध्ये व्यवस्थितः ।।१६९।।

मकारश्चाग्निसङ्काशो, विधूमो विद्युता समः ।
तिस्रो मात्रास्तथा ज्ञेया, सोमसूर्याग्नितेजसः ।।१७०।।

शिखा च दीपसङ्काशा, यस्मिंस्तु परिवर्तते ।
अर्धमात्रा तथा ज्ञेया, प्रणवस्योपरि स्थिता ।।१७१।।



पद्मसूत्रनिभा सूक्ष्मा, शिखाभा दृश्यते परा ।
नासादिसूर्यसङ्काशा, सूर्यं हित्वा तथा परम् ।।१७२।।

द्विसप्ततिसहस्त्रं च, नाडीर्भित्त्वा तु मूर्धनि ।
वरदं सर्वभूतानां, सर्वं व्याप्यैव तिष्ठति ।।१७३।।

कस्य घण्टानिनादः स्याद्यदा लिप्यति शान्तये ।
ओङ्कारस्तु तया योज्यः, श्रुतये सर्वमिच्छति ।।१७४।।

यस्मिन् स लीयते शब्दस्तत्परं ब्रह्म गीयते ।
सोऽमृतत्वाय कल्पेत, सोऽमृतत्वाय कल्पते ।।१७५।।

३७. पञ्च समयाविद्यानां क्रम-व्यवस्था —

द्विधा हि समयाविद्याक्रमः प्रोक्तो महात्मभिः ।
स्थूलस्तु प्रथमस्तत्र, सूक्ष्मश्चैवापरः स्मृतः ।।१७६।।

३८ स्थूलक्रमे चक्राणां तदधिनायिकासमयानां च व्यवस्था —

विशुद्धाख्ये पङ्कजेऽत्र, महात्रिपुरसुन्दरी ।
अनाहते च बगला, कालरात्रिर्मणौ स्मृता ।।१७७।।

स्वाधिष्ठाने जयदुर्गा, छिन्नमस्ता च मूलके ।
आज्ञायां नवरत्नाख्या, कुब्जिका समुदीरिता ।।१७८।।

बिन्द्वादितः सहस्रारे, नवरत्ना हि सुन्दरी ।
स्थूलक्रमे च ध्यातव्या, न्यस्तव्येति शुभं मतम् ।।१७९।।

३९. सूक्ष्मक्रमे चक्राणां तदधिनायिकासमयानां च व्यवस्था —

सूक्ष्मक्रमे च सत्ता स्यात्, समयानां क्रमाद् यथा ।
स्वयम्भूलिङ्गसत्ताऽस्ति, बगलासमया सदा ।।१८०।।

बाणलिङ्गस्य सत्ताऽस्ति, कालरात्रीति नामतः ।
इतरलिङ्गस्य सत्ता, जयदुर्गेति विश्रुता ।।१८१।।

कुलकुण्डलिनीसत्ता, छिन्नमस्ता निगद्यते ।
सर्वसाक्षित्वचैतन्यसत्ता श्रीसुन्दरी मता ।।१८२।।

४०. आम्नायक्रमेण मूलाधारादिचक्रेषु शक्तीनां भैरवाणां च क्रमः —

मूलाधारादिचक्राणां, शक्तयो भैरवाश्च ये ।
आम्नायक्रमतस्तेषां, न्यासध्यानादि कथ्यते ।।१८३।।
मूलाधारे साकिनी स्याच्छक्तिर्ब्रह्मा च भैरवः ।
स्वाधिष्ठाने काकिनी स्याच्छक्तिर्विष्णुश्च भैरवः ।।१८४।।
मणिपूरे लाकिनी स्याच्छक्ती रुद्रोऽथ भैरवः ।
अनाहते राकिनी स्याच्छक्तिरीश्वरभैरवः ।।१८५।।
विशुद्धे डाकिनी शक्तिर्भैरवश्च सदाशिवः ।
आज्ञायां हाकिनी शक्तिर्भैरवोऽथ महेश्वरः ।।१८६।।
सहस्रारे याकिनी स्यात्, कामेशश्चैव भैरवः ।
पूर्वोत्तराधराम्नायक्रमोऽयं गदितः शुभः ।।१८७।।

४१. ऊर्ध्वाम्नायपश्चिमाम्नायडाकिन्यादिस्वरूपम् —

ऊर्ध्वपश्चिमयोश्चैव, दक्षोपाम्नाययोस्तथा ।
शक्तीनां च शिवानां च, क्रमोऽप्यत्र निगद्यते ।।१८८।।
मूलाधारे डाकिनी स्याच्छक्तिर्ब्रह्मा च भैरवः ।
स्वाधिष्ठाने राकिनी स्याच्छक्तिर्विष्णुश्च भैरवः ।।१८९।।
मणिपूरे लाकिनी स्याच्छक्ती रुद्रोऽथ भैरवः ।
अनाहते काकिनी स्याच्छक्तिरीश्वरभैरवः ।।१९०।।
विशुद्धे साकिनी शक्तिर्भैरवश्च सदाशिवः ।
आज्ञायां हाकिनी शक्तिर्भैरवोऽथ महेश्वरः १९१।।
सहस्रारे याकिनी स्यात्, कामेशश्चैव भैरवः ।[1]
... ... ... ... ।।१९३।।
षड् शतं च गणेशस्य, षट् सहस्रं प्रजापतेः ।।१९२।।
विष्णवे षट् सहस्रं च, रुद्राय षट् सहस्रकम् ।।१९४।।

१. इतः परं सार्धैकः श्लोकः पठितुं न पारितः ।



ईश्वराय सहस्रं च, सहस्रं च सदाशिवे[1] ।
सहस्रं गुरवे नित्यमर्पयाम्यजपाजपम् ।।१९५।।
अकारश्च उकारश्च, मकारो बिन्दुरेव च ।
अर्द्धचन्द्रो निरोधश्च, नादो नादान्त एव च ।।१९६।।
शक्तिश्च व्यापिनी चैव, समना उन्मनी तथा ।
समनान्तं पाशजालं, तदूर्ध्वं च परः शिवः ।।१९७।।
अन्तर्यागक्रमश्चैव, बहिर्यागक्रमस्तथा ।
महायागक्रमश्चैव, पूजाखण्डे प्रकीर्तितः ।।१९८।।

श्रीमदाद्यशङ्कराचार्यविरचितः
श्रीयतिदण्डैश्वर्यविधानान्तर्गतस्तत्त्वपादः ।

× × × ×

टिप्पणी : अस्मिन् पादे १९८ श्लोकाः सन्ति तेषु १½ सार्धैकः श्लोकस्तथा-र्धश्लोकद्वयं चापठितं वर्तते ।

સમરીતિર્હાતેજા: પરબ્રહ્મ સનાતન:।
જયતાજ્જાનકીનાથો વેદવેદ્યો મહામતિ:।।
ankurnagpal108@gmail.com

१. सदाशिवायेति ।

# यतिदण्डैश्वर्यविधाने

## साधना-पादः

१. ज्ञान-मन्त्र-कर्म-योगानां पारस्परिकसम्बन्धित्वात्तेषां साधनास्वावश्यकत्वनिरूपणम् —

यतिदण्डे साधनाया, ये ये मार्गाः प्रदर्शिताः ।
तेषां सम्यक्सिद्धिलब्ध्यै, योगज्ञानमपेक्षितम् ।। १ ।।
तत्र शारीरचक्राणां, नाडीनां च विशेषतः ।
ज्ञानं सम्प्राप्य कर्तव्या, सर्वा एव हि साधनाः ।। २ ।।
न हि योगं विना मन्त्रो, योगो मन्त्रं विना न हि ।
कदापि सिद्धिं प्राप्नोति, तस्मादुभयमाचरेत् ।। ३ ।।
न योगेन विना मन्त्रो, न मन्त्रेण विना हि सः ।
द्वयोरभ्यासयोगो हि, ब्रह्मसंसिद्धिकारणम् ।। ४ ।।
कर्मयोगं विना देवि, ज्ञानयोगो न सिद्ध्यति ।
ज्ञानेन कर्मणा वाऽपि, सिद्धिर्भवति नान्यथा ।। ५ ।।

२. योगमाहात्म्यम् —

तस्माद् दोषविनाशार्थमुपायं कथयामि ते ।
योगहीनं न हि ज्ञानं, मोक्षदं भवति ध्रुवम् ।। ६ ।।
योगो हि ज्ञानहीनस्तु, न क्षमो मोक्षकर्मणि ।
तस्माज् ज्ञानञ्च योगञ्च, मुमुक्षुर्दृढमभ्यसेत् ।। ७ ।।

३. द्विविधाः सिद्धयः —

द्विविधाः सिद्धयो लोकेऽकल्पिताः कल्पितास्तथा ।
तासु पूर्वास्तु यतिभिः, साधनीया न चापराः ।। ८ ।।

४. अकल्पिताः सिद्धयः —

मन्त्राणां जपतो योगाद्, धारणाध्यानतस्तथा ।
न्यासात् सम्पूजनाच्चैव, सिद्ध्यन्ति सिद्धयस्तु याः ।। ९ ।।



अकल्पितास्ताः सम्प्रोक्ताश्चिरकालसुखप्रदाः ।
प्रान्ते ब्रह्मपदप्राप्तावपि साहाय्यकारिकाः ।।१०।।

५. कल्पिताः सिद्धयः —

रसौषधि-क्रियाजालमप्यभ्यासादिसाधनैः ।
सिद्ध्यन्ति सिद्धयो यास्तु, कल्पितास्ताः प्रकीर्तिताः ।।११।।

६. शरीर-माहात्म्यम् —

दशभिर्वायुभिर्व्याप्तं दशेन्द्रियपरिच्छदम् ।
तदाधार - समायुक्तमुपाम्नाय - विभूषितम् ।।१२।।
शाम्भवी-शाम्भव-युतं, षडन्वय-सुशाम्भवम् ।[1]
चतुष्पीठ-समाकीर्णं, चतुराम्नायदीपनम् ।।१३।।
बिन्दुनाद-महालिङ्गं, शिवशक्ति-निकेतनम् ।
देहः शिवालयः प्रोक्तः, सिद्धिदः सर्वदेहिनाम् ।।१४।।

७. शरीरस्था दश वायवः —

प्राणापानसमानाश्चोदानव्यानौ तथैव च ।
इमे सर्वे शरीरस्थाः, प्रधानाः पञ्च वायवः ।।१५।।
नागः कूर्मोऽथ कृकरो, देवदत्तो धनञ्जयः ।
इमे पञ्च पुनस्तत्र, गदिता उपवायवः ।।१६।।

८. वायूनां स्थानानि —

हृदि प्राणो गुदेऽपानः, समानो नाभिमण्डले ।
उदानः कण्ठदेशे तु, व्यानः सर्वशरीरगः ।।१७।।

९. वायूनां वर्णाः —

अथ वर्णास्तु पञ्चानां, प्राणादीनामनुक्रमात् ।
रक्तवर्णो मणिप्रख्यः, प्राणवायुः प्रकीर्तितः ।।१८।।
नीलरक्तोऽपानवायुरिन्द्रगोपसमप्रभः ।
समानस्तु द्वयोर्मध्ये, गोक्षीरसदृशप्रभः ।।१९।।

१. महाऽवनम् इति पाठा० ।

अपाण्डुर उदानश्च, व्यानो ह्यर्चिः समप्रभः ।
ध्यानार्थमेते वर्णास्तु, चिन्तनीया विशेषतः ॥२०॥

१०. प्राणादिवायूनां स्थानानि —

आस्य-नासिकयोर्मध्यं, हृदयं नाभिमण्डलम् ।
पादाङ्गुष्ठमिति प्राणस्थानानि द्विजसत्तम ॥२१॥
अपानश्चरति ब्रह्मन्, गुदमेढ्रोरुजानुषु ।
समानः सर्वगात्रेषु, सर्वव्यापी व्यवस्थितः ॥२२॥
उदानः सर्वसन्धिस्थः, पादयोर्हस्तयोरपि ।
व्यानः श्रोत्रोरुकटिषु, गुल्फस्कन्धगलेषु च ॥२३॥
नागादिवायवः पञ्च, त्वगस्थ्यादिषु संस्थिताः ।
तस्मात् स्थानानि तान्येव, ज्ञातव्यानि क्रमात् सदा ॥२४॥

११. प्राणादिवायूनां कार्याणि —

तुन्दस्थजलमन्नञ्च, रसादीनि च सर्वशः[1] ।
तुन्दमध्यगतः प्राणः, कुरुते वै पृथक् पृथक् ॥२५॥
अपानवायुर्मूत्रादेः, करोति च विसर्जनम् ।
प्रसवञ्चापि कुरुते, वायुरेष निरन्तरम् ॥२६॥
प्राणापानादिचेष्टास्तु, क्रियन्ते व्यानवायुना ।
उज्जीर्यते शरीरस्थमुदानेन नभस्वता ॥२७॥
पोषणादिशरीरस्थं समानः कुरुते सदा ।
नागादीनाञ्च वायूनां, कार्याण्यपि वदाम्यहम् ॥२८॥
उद्गारादिक्रियां नागः, कूर्मो नेत्रादिमीलनम् ।
कृकरः क्षुत्करो ज्ञेयो, देवदत्तो विजृम्भकृत् ॥२९॥
मृतगात्रस्य शोभादि-कृदुक्तोऽस्ति धनञ्जयः ।
न जहाति मृते वापि, शरीराणि धनञ्जयः ॥३०॥[2]

१. रसादींश्च समीकृतान् इति पाठा० । २. इतोऽग्रे पद्यमेकमसंख्याकं लुप्तमस्तीति मूलसङ्केताज्ज्ञायते ।



प्राणिनो भौतिके देहे, क्रियामात्रा भवन्ति हि ।
वायोस्साहाय्यतस्तास्ताः, तां विना किमपीह न ॥३१॥
वायोर्वशाद् मनोवश्यं, तत इन्द्रियसंयमः ।
तस्माद् वायोर्वशीकारमुत्तमं योगसाधनम् ॥३२॥
इति विज्ञाय वायूनां, सर्वा ध्यानादिकाः क्रियाः ।
गुरूपदेशतो ज्ञेया, योगसिद्ध्यै महात्मभिः ॥३३॥

१२. दशेन्द्रिय-परिच्छदः —

श्रोत्रं चक्षुः स्पर्शनं च, रसनं घ्राणमेव च ।
वाक्पाणि-पादाः पायुश्च, तथोपस्थ इति क्रमात् ॥३४॥
दशेन्द्रिय-परीवारो, ज्ञानकर्मविभागतः ।
सुप्रसिद्धोऽस्ति सर्वत्र, ज्ञात्वा तं योगमाचरेत् ॥३५॥
समीकृतान्··· ··· ··· ···॥३६॥
··· ··· ··· ··· ··· ···॥३७॥[1]

१३. शरीरस्थाधारादिचक्रवर्णनम् (कालीकल्पे) —

अथ चक्राणि वक्ष्यन्ते, स्थितिर्येषां शरीरगा ।
पूर्वं ह्यधः सहस्रारं विषुवं मूलचक्रकम् ॥३८॥
स्वाधिष्ठानं तदग्रे तु, ततस्तु मणिपूरकम् ।
स्वस्तिकं चैवानाहतं, विशुद्धं चैव लम्बिका ॥३९॥
आज्ञाचक्रमिति प्रोक्तान्यूर्ध्ववक्त्राणि वर्ष्मणि ।
स्वाधिष्ठानं मणिपूरमनाहतमथापि वा ॥४०॥
हृदि स्थाने स्थितं पद्मं, तस्य वक्त्रमधोमुखम् ।
विशुद्धं चेति चक्राणि, सन्त्यधोमुखगानि हि ॥४१॥
एवं द्वादश चक्राणि, कालीकल्पे भवन्ति वै ।
आज्ञाचक्रं विभक्तं स्यात्, कल्पयोरुभयोरपि ॥४२॥

१. अत्र पद्यद्वयमपठितमस्ति ।

कालीकल्पे च सुन्दर्याः, कल्पे चैव विशेषतः ।
... ... ... ... ... ॥४३॥

१४. सुन्दरीकल्पे —

सुन्दरीकल्पचक्राणां, संख्या षोडश विद्यते ।
तेषां नामानि वर्ण्यन्ते, योगतन्त्रानुसारतः ॥४४॥
आज्ञाचक्रं मनश्चक्रं, सप्तकोषाख्यमेव च ।
बिन्दुः कला रोधनी च, नादो नादान्त एव च ॥४५॥
शक्तिश्च व्यापिका चैव, समनाग्रे तथैव हि ।
गुरोः पद्मं ततोऽग्रे च, दलैर्द्वादशभिर्युतम् ॥४६॥
अधोमुखं मनश्चक्रं, पत्रैर्द्वादशभिर्युतम् ।
उन्मनी षोडशदलमधोवक्त्रं च नीरजम् ॥४७॥
महाबिन्दुस्तदग्रे च, चक्राण्येतानि सन्ति वै ।
एतान्यावृत्य लसति, सहस्रारमधोमुखम् ॥४८॥
आज्ञाचक्रादूर्ध्वभाग, एकैकाङ्गुलकोपरि ।
स्थितिः षोडशचक्राणां, सर्वदा योगिसम्मता ॥४९॥
महाषोडश्येवमेव, कूटैः षोडशभिर्युता ।
आम्नायक्रमतश्चैषां, ध्यानं कर्तव्यमेव हि ॥५०॥

(इतः परं श्लोकसंख्या ५१ तः ५४ यावत् पद्यान्यपठितानि सन्ति) ।

मूलाधारं समाधारमधराम्नाय - रूपकम् ।
स्वाधिष्ठानं सृष्टिचक्रं, पूर्वाम्नाय-स्वरूपकम् ॥५५॥
मणिपूरे स्थितं चक्रं, दक्षिणाम्नाय-रूपकम् ।
अनाहतं स्यात् संहारचक्रं पश्चिममार्गगम् ॥५६॥
विशुद्धं स्यादनाख्याख्यमुत्तराम्नाय - रूपकम् ।
आज्ञादिकं च भासा स्यादूर्ध्वाम्नायक्रमात्मकम् ॥५७॥
... ... ... ... ... ... ... ॥५८॥



१५. चक्राणामधिष्ठात्र्यो देवताः —

अधिष्ठात्र्यः प्रवक्ष्यन्ते, नामान्यासां यथाक्रमम् ।
यासां स्मरणमात्रेण, सिद्धिर्भवति वै ध्रुवा ॥५९॥
[1]मणिपूरस्याधिष्ठात्री, देवी दक्षिणकालिका ।
महोग्रतारा देवी च, मूलाधारस्य नायिका ॥६०॥
आज्ञाचक्रस्याधिष्ठात्री, बालात्रिपुरसुन्दरी ।
अधिष्ठात्री विशुद्धस्य, गुह्यकाली च देवता ॥६१॥
स्वाधिष्ठानगता देवी, स्वामिनी भुवनेश्वरी ।
अनाहतस्याधिष्ठात्री, देवता कुब्जिका स्मृता ॥६२॥
नैर्ऋत्यकोणाधिष्ठात्री, देवता भद्रकालिका ।
या देवी भद्रकाली च, चामुण्डा सैव कथ्यते ॥६३॥
महालक्ष्मीर्महादेवी, त्वग्निकोणस्य नायिका ।
ईशानकोणाधिष्ठात्री, महाकाली दशानना ॥६४॥
महासरस्वती देवी, वायुकोणस्य नायिका ।
समष्ट्या तु चतस्रस्तास्तुर्यशक्तिसमन्विताः ॥६५॥
उपाम्नायसमाश्लिष्टाश्चामुण्डा नायिका भवेत् ।
सम्भूय देव्यस्ताः सर्वा, नवार्णं भवति ध्रुवम् ॥६६॥
पश्चिमे तु समाम्नाये, साकं भवति कुब्जिका ।
एवमाम्नायदेवीनां, ध्यानं चक्रेषु सिद्धिदम् ॥६७॥

(इतः परं ६८ तः ७० यावत् पद्यान्यपठितानि सन्ति ।)

प्रयोगकाले मन्त्राणामृषिच्छन्दांसि दैवतम् ।
विनियोगं शक्तिबीजे, स्मरेन्नो चेद् वृथा फलम् ॥७१॥

---

१—अत्र यद्यपि मणिपूरचक्रं दक्षिणाम्नायप्रविष्टं तथापि श्रीमातुः सादिकूटाख्यविश्राग्निददीक्षाकल्पानुसारेण भक्तिभावस्य प्रवेशद्वारत्वात् मणिपूरं प्रथमं सन्निवेश्य प्रोक्तदीक्षाक्रममाश्रित्येदं बोद्धव्यम् ।

स्वाधिष्ठानं सृष्टिचक्रं, प्रकल्प्य क्रमयोगतः ।
देवतास्तेषु सञ्चिन्त्या, यतिभिर्मोक्षकांक्षिभिः ॥७२॥
अथ सृष्ट्यादिचक्रेषु, सञ्चिन्त्या वर्णदेवताः ।
साधकानां सिद्धिहेतोरुद्दिश्यन्ते क्रमादिह ॥७३॥
दक्षिणः साधरश्चोर्ध्वमुत्तरं पूर्व एव च ।
ततः पश्चिम इत्यत्र, बोध्यः सामान्यतः क्रमः ॥७४॥

१६. सृष्टिचक्रस्थ–शक्तीनां नामानि :—

[१]सृष्टिचक्रे क्रमान् न्यस्या, आद्याश्यामा च दक्षिणा ।
तत एकजटा पश्चान्महोग्रा तारिणी ततः ॥७५॥
ततश्च बाला त्रिपुरा, बालात्रिपुरसुन्दरी ।
ततः षडक्षरी हादिर्महात्रिपुरसुन्दरी ॥७६॥
सिद्धिलक्ष्मीः कामकला, चोन्मनी भुवनेश्वरी ।
समया कुब्जिका पश्चात्, तथा च वज्रकुब्जिका ॥७७॥
ततः पञ्चाक्षरी कादिर्महात्रिपुरसुन्दरी ।
ततः परं भद्रकाली, तथा चैव सरस्वती ॥७८॥
महासरस्वती पश्चात्, चामुण्डा चोग्रचण्डिका ।
चतुर्वर्णा ततः सादिर्महात्रिपुरसुन्दरी ॥७९॥
... ... ... ... ॥८०॥

१७. स्थितिचक्रस्थशक्तीनां नामानि —

स्थितिचक्रे क्रमान्न्यस्याः, श्यामा काली च दक्षिणा ।
महोग्रतारा तत्पूर्वं, ध्येया नीलसरस्वती ॥८१॥
पश्चाद् बालासुन्दरी च, ततो बालाषडक्षरी ।
भरतोपासिता गुह्यकाली कामकला ततः ॥८२॥

१. विन्यस्तक्रमान्तःपातिजपानुसारेण वा इदं कथनं सृष्ट्याम्नायसम्बन्धतश्च सृष्टित्वव्यवहार इति विभावनीयम् ।



ततः पूर्णेश्वरी ध्येया, ततश्च भुवनेश्वरी ।
वीरपूर्वा कुब्जिका च, तथा च वज्रकुब्जिका ॥८३॥
उग्रतारा महालक्ष्मीरष्टाविंशतिवर्णका ।
ततः परं महालक्ष्मीरन्या ध्येया नवाक्षरी ॥८४॥
ततः परञ्च चामुण्डा, पश्चात् कात्यायनीत्यपि ।
... ... ... ... ॥८५॥

१८. संहारचक्रस्थशक्तीनां नामानि —

संहारे सिद्धिकाली स्यात्तथा दक्षिण-कालिका ।
ततो महोग्रा तत्पूर्वं, महानील-सरस्वती ॥८६॥
ततो बाला भैरवी स्यात्, ततो बाला षडक्षरी ।
श्रीरामोपासिता गुह्यकाली कामकला ततः ॥८७॥
त्र्यक्षरी भुवना पश्चात्, पञ्चार्णा भुवनेश्वरी ।
अघोरकुब्जिका वज्रकुब्जिका कर्मकुब्जिका ॥८८॥
ततः परं क्रमाद् ध्येया, सप्तार्णा रक्तदन्तिका ।
[१]मन्त्वर्णात्मा महाकाली, महाकाली [२]नवाक्षरी ॥८९॥
भद्रकाली चामुण्डा च, चतुर्वर्णा स्मृताः क्रमात् ।
... ... ... ... ॥९०॥
... ... ... ... ॥९१॥

सिद्धिलक्ष्मीः सिद्धिपूर्वा, कराली सिद्धिकालिका ।
सिद्धिः कपालिनी न्यस्या, गुह्या कामकलात्मिका ॥९२॥
... ... ... ... ॥९३॥

पञ्चदशी षोडशी च, गायत्री ब्रह्मरूपिणी ।
श्रीमहाषोडशी पूर्ण-शाम्भवञ्च षडन्वयम् ॥९४॥
सर्वाधिकाररूपञ्च, गायत्री च चतुष्पदा ।
पशुपतत्रयं चैव, महापूर्णाभिषेचनम् ॥९५॥

१. एषा पञ्चानना । २. एषा दशानना । ३. अत्र पद्यद्वयं त्रयं वा भ्रष्टमित्यस्पष्टत्वम् ।

१९. प्रणवस्य षोडशमात्राणां कूटरूपत्वम्[1] —

अकारः प्रथमः प्रोक्त, उकारश्च द्वितीयकः ।
तृतीयोऽथ मकारः स्यादर्धमात्रा तुरीयकः ॥९६॥
बिन्दुः पञ्चमकूटः स्यान्नादः षष्ठ उदीरितः ।
कला हि सप्तमः कूटः, शक्तिरष्टम एव च ॥९७॥
नवमः शान्तिराख्यातो, दशमः समना स्मृतः ।
आत्मा त्वेकादशः प्रोक्तो, द्वादशश्च मनोन्मना ॥९८॥
त्रयोदशो वैखरी च, मध्यमा स्याच्चतुर्दशः ।
पश्यन्ती स्यात् पञ्चदशः, षोडशश्च परा भवेत् ॥९९॥
एवं षोडशकूटात्मा, स्मर्तव्यः प्रणवः सदा ।
... ... ... ... ... ... ... ...॥१००॥

२०. नाडीभिश्चक्रनिर्मिति-निरूपणम् —

देहस्य कार्यक्षमता-साधनार्थं शरीरगाः ।
अनन्ता नाडिका व्याप्ता, मस्तिष्कान्निःसरन्ति याः ॥१०१॥
अङ्गप्रत्यङ्गकार्याणि, साधयन्ति स्वभावतः ।
सार्धलक्षत्रयं नाड्यस्तासु योगे प्रतिष्ठिताः ॥१०२॥
तत्रापि नाड्यः सम्प्रोक्ताः, सहस्राणि द्विसप्ततिः ।
एतासु मुख्याः षोडश, चित्रा-प्रभृतिसंज्ञिकाः ॥१०३॥
यासामुत्पत्तिभूरेका, सुषुम्ना नाडिका मता ।
प्रधानाः प्राणवाहिन्यो, भूयस्तत्र दश स्मृताः ॥१०४॥
तत्रापि ब्रह्मनाडी च, चित्रा वज्रा तथैव च ।
एतास्तिस्रो मिलित्वैव, सुषुम्नारूपतां गताः ॥१०५॥
लघुमस्तिष्कतो नीचैः, सुषुम्नानाडिका स्थिता ।
सैव प्रधाना सर्वासां, नाडीनां त्र्यग्निरूपिणी ॥१०६॥

---

१. सुन्दरीकल्पोक्तध्यानपद्धत्या अत्र यद्यपि पुनरुक्तं प्रतीयते तथापि सादिकूट-दीक्षितस्यापि प्रणव एव विश्रान्तिरिति पुनः स्मारयति भगवान् सूत्रकारः । नहि तेषु भ्रान्तिरस्ति लोकानुग्रहपरायणेषु इति ध्येयम् ।



तत एव विनिर्यान्ति, वामदक्षिणभागयोः ।
एकत्रिंशद् ह्येकत्रिंशन्नाडिकाः सूक्ष्मरूपतः ॥१०७॥
ग्रीवाप्रदेशे ह्यष्टौ च, तासु नाड्यो व्यवस्थिताः ।
कथ्यन्तेऽनुग्रीविकास्ता, नाडिका योगवित्तमैः ॥१०८॥
पृष्ठदेशे द्वादश च, स्थिताः सन्ति तथेतराः ।
उच्यन्तेऽनुपृष्ठिकास्ता, नामतः किल मेरुजाः ॥१०९॥
कटिप्रदेशे वर्तन्ते, पञ्च नाड्यस्तु संस्थिताः ।
कथ्यन्तेऽनुकटिकास्ता, योगशास्त्रविचक्षणैः ॥११०॥
त्रिकप्रदेशे पञ्चाथ, नाडिकाः सन्ति संस्थिताः ।
अनुत्रिकास्ताः प्रोच्यन्ते, तथैका त्रिकशीर्षकी ॥१११॥
एवं द्वाषष्टिनाडीनां, वामदक्षिणभागयोः ।
गच्छन्तीनां क्रमः प्रोक्तः, सुषुम्नाजनितात्मनाम् ॥११२॥
योगादनुग्रीविकाणां, विशुद्धं जायते ध्रुवम् ।
मणिपूरोऽनुकटिकानाडीभिर्निर्मितिं व्रजेत् ॥११३॥
... ... ... ... ... ... ...॥११४॥
तथैवानुपृष्ठिकानां, नाडीनां षट्कयोगतः ।
अनाहताख्यं चक्रं तु, द्वादशारं भवत्यहो ॥११५॥
ताभ्य एवावशिष्टानां, पञ्चानां सर्वयोगतः ।
मणिपूराभिधं चक्रं, दशारं भवति ध्रुवम् ॥११६॥
शिष्टयाऽप्येकया युक्तं, कटिनाडीद्वयेन वै ।
स्वाधिष्ठानाभिधं चक्रं, भवत्यथ च षड्दलम् ॥११७॥
तृतीयायाश्चतुर्थ्याश्च, कटिनाड्याः प्रमेलनात् ।
मूलाधाराभिधं चक्रं, समुद्गच्छति निश्चितम् ॥११८॥
कटिभागस्यावशिष्टा, नाडिकैका तथाऽपरा ।
अनुत्रिकायाः पञ्चाथ, त्रिकशीर्षस्य चैकिका ॥११९॥

सर्वा मिलित्वा लोकानां, सप्तकं साधयन्ति हि ।
अत्राप्यूर्ध्वं - सहस्राराच्चक्राण्यूर्ध्वमुखानि वै ॥१२०॥
तथैवाधःसहस्राराज्जायन्तेऽधोमुखान्यपि ।
तेषामुत्थितिनियमः, संक्षेपादिह कथ्यते ॥१२१॥
अनुग्रीवानुपृष्ठिभ्यामधोवक्त्रसमुद्गतिः ।
अधोमुखं विशुद्धारं, चक्रमाद्यं निगद्यते ॥१२२॥
अनुपृष्ठ्यनुकटिका — नाडीयोगादधोमुखम् ।
अनाहताख्यमपरं, चक्रं तत्र द्वितीयकम् ॥१२३॥
सविशुद्धानाहतयोर्मणिपूरस्य च क्रमात् ।
स्वाधिष्ठानस्य चैवाधः, परस्परसुयोगतः ॥१२४॥
अधश्चक्राणि तावन्ति, भवन्तीह विशेषतः ।
तान्येव कोणचक्राणि, गदितानि महर्षिभिः ॥१२५॥
तत्र नाड्यौ द्वे भवतः, शुक्र-सम्बन्धगे ततः ।
चित्राख्या सीवनी नाडी, शुक्रमोचनकारिणी ॥१२६॥
निरुद्धा सीवनी नाडी, शुक्रसंरोधकारिणी ।
मनःसंयमनी नाडी, तदा सक्रियतां गता ॥१२७॥
आकर्षति मनः सा तु, समाधिं प्रति साधिका ।
यावन् मनःसंयमनी, सक्रियत्वं न गच्छति ॥१२८॥
तावन्निरुद्धा कर्तव्य-पालनं कुरुते न हि ।
... ... ... ... ... ... ...॥१२९॥

२०. षोडशनाडीनां नामानि स्थाननिरूपणञ्च —

सुषुम्नाया वामभागे, मेधा[1] च प्राण[2]-धारिणी ।
सर्वज्ञान[3]-प्रदा चैव, मनःसंयमनी[4] तथा ॥१३०॥
विशुद्धा[5] निरुद्धा[6] चित्रा[7], वज्रा[8] च ब्रह्मनाडिका[9] ।
एता नव स्थिता नाड्यस्तथा दक्षिणभागके ॥१३१॥

१. इतोऽग्रे पद्यचतुष्टयमभवदित्यनुमितं किन्तु स्पष्टताया अभवादत्र संख्यायोगो न कृतः ।



वायुसञ्चारिणी[10] तेजःशुष्करी[11] बलपुष्टिकृत्[12] ।
बुद्धिसञ्चारिणी[13] चैव, ज्ञानजृम्भणकारिणी[14] ॥१३२॥
सर्वप्राणहरा[15] चैव, पुनर्जीवनकारि[16]णी ।
एताः सप्त स्थिता नाड्यो, यथानाम तथागुणाः ॥१३३॥
सर्वप्राणहरा चैव, पुनर्जीवनकारिणी ।
हस्तयोः पादयोश्चैवाङ्गुष्ठयोश्च स्थितिं गते ॥१३४॥
बुद्धिसञ्चारिणी चैव, ज्ञानजृम्भणकारिणी ।
तर्जनी मध्यमा चैते, स्थितिमत्यौ सदैव हि ॥१३५॥
मनःसंयमनी चैव, सर्वज्ञानप्रदायिनी ।
अनामिका-कनिष्ठासु, स्थितिमत्यौ सदैव हि ॥१३६॥
ब्रह्मनाडी तथा प्राणधारिणी नाम नाडिका ।
मनःसंयमनी चैव, वायुसञ्चारिणी तथा ॥१३७॥
चित्रा निरुद्धा च कुहूर्वज्रेत्यष्टौ क्रमात् पुनः ।
जिह्वायां च तथोपस्थे, सर्वदा यान्ति नाडिकाः ॥ [अ][1]

२२. जप-प्रकाराः —

हस्ते च दक्षिणे पश्चाच्चिन्तयेन्मनसा शिवम् ।
चिन्तयेच्च गुरुं मूर्ध्नि, यथा वर्णादिकं भवेत् ॥१३८॥
मन्त्रं ध्यायेत् कण्ठमध्ये, पीतवर्णं हिरण्मयम् ।
महामायां च हृदये, स्वात्मानं गुरुपादयोः ॥१३९॥
आज्ञाचक्रे ततः पश्चाद्, गुरोर्मन्त्रस्य चात्मनः ।
देव्याश्चाप्येकतां नीत्वा, सुषुम्णावर्त्मना ततः ॥१४०॥
एवं विभाव्य तद्रूपं, तच्चक्रं प्रतिलङ्घयेत् ।
सर्वचक्रे महामायां, क्षणं ध्यात्वा प्रयत्नतः ॥१४१॥
लम्बयेन्मूलमन्त्रेण, चादिषोडशचक्रकम् ।
आदिषोडशमध्यस्थां, साधकानन्ददायिनीम् ॥१४२॥

१. गणनारहितमिदं पद्यमन्यत्र विशिष्य प्राप्यते ।

सञ्चिन्त्य साधको देवीं, जपकर्म समारभेत् ।
भ्रुवोरुपरि नाडीनां, तिसृणां व्रत उच्यते ॥१४३॥
तद्व्रतं त्रिपथस्थानं, षट्कोणं चतुरङ्गुलम् ।
रक्तञ्च कुलयोगज्ञैराज्ञाचक्रमितीरितम् ॥१४४॥
कण्ठे तिसृणां नाडीनां, वेष्टनं विद्यते नृणाम् ।
सुषम्णेडापिङ्गलान्तं, षट्कोणं तत्षडङ्गुलम् ॥१४५॥
तत्षट्चक्रमिति प्रोक्तं, शुक्लं कण्ठस्य मध्यगम् ।
तिसृणामपि नाडीनां, हृदये चैकता भवेत् ॥१४६॥
तत्स्थानं षोडशारं स्यात्, सप्ताङ्गुलप्रमाणतः ।
तत्पीतमुक्तं योगज्ञैरपि षोडशचक्रकम् ॥१४७॥
ध्येयानामथ मन्त्राणां, चिन्तितस्य जपस्य च ।
यस्मादाद्यं तु हृदयं, तस्मादादि निगद्यते ॥१४८॥
गुरुं च देवतां मन्त्रं, तथा स्वात्मानमेव च ।
एकीभूतमिति ध्यायेदादि-षोडशचक्रके ॥१४९॥
एकचित्तः प्रशान्तात्मा, ह्यक्षसूत्रकरः शुचिः ।
भुग्नग्रीवोन्नतः शान्तः, कण्डून्मीलनवर्जितः ॥१५०॥
सविसर्गं समात्रं च, सबिन्दुं चाक्षरं स्फुटम् ।
न द्रुतं नाऽपि विश्रान्तं, क्रमान्मन्त्रं जपेत्सुधीः ॥१५१॥
अतिद्रुतो व्याधिहेतुरतिदीर्घो वसुक्षयः ।
अक्षराक्षरसंयुक्तो, जपेन्मौक्तिकपङ्क्तिवत् ॥१५२॥
तन्निष्ठस्तद्गतप्राणस्तच्चित्तस्तत्परायणः ।
तत्पदार्थानुसन्धानं, कुर्वन्मन्त्रं शनैर्जपेत् ॥१५३॥
जपाच्छ्रान्तः पुनर्ध्यायेद्, ध्यानाच्छ्रान्तः पुनर्जपेत् ।
जपध्यानादिसंयुक्तः, क्षिप्रं मन्त्रः प्रसिध्यति ॥१५४॥
अतिह्रस्वे व्याधिहेतुरतिदीर्घे तपःक्षयः ।
प्रजपेत् प्राणसाम्येन, ततः सिद्धिर्भवेद् ध्रुवम् ॥१५५॥



... ... ... ... ।
नान्यथा सिद्धिमाप्नोति, हास्यमाप्नोति सुन्दरि ! ॥१५६॥
ततो वै ज्ञानशूलेन, ग्रन्थीन् भिन्दन् समुच्चरेत् ।
भित्त्वा हृदयग्रन्थि तु, गतः शब्दः प्रजायते ॥१५७॥
य आकाशसमायोगाद्, घोषशब्दोपमो भवेत् ।
श्रवणाङ्गुलिसंयोगाद्, यः शब्दः सम्प्रवर्तते ॥१५८॥
दीप्तवह्निस्वननिभः, स नादो घोष उच्यते ।
कण्ठस्थो विरमेच्छब्दः, कण्ठं प्राप्य वरानने ॥१५९॥
भिन्दन् स कण्ठदेशं तु, शब्दो धुगधुगायते ।
तालुमध्यगतः प्राणो, यदा भवति सुव्रते ! ॥१६०॥
भिन्दतस्तालुग्रन्थिं तु, शब्दो धुमधुमायते ।
अष्टधा तु स देवेशि !, व्यक्तः शब्दः प्रकीर्तितः ॥१६१॥
घोषो रावः स्वनः शब्दः, स्फोटाख्यो ध्वनिरेव च ।
झङ्कारो ध्वङ्कृतश्चैवेत्यष्टौ शब्दाः प्रकीर्तिताः ॥१६२॥
भ्रुवोर्मध्यं यदा गच्छेत्, स्फोटशब्दस्तु जायते ।
बिन्दुं भेदयतो देवि ! शब्दो धुमधुमायते ॥१६३॥
कपिर्वै नारिकेलेन, ह्याचार्यः सह बिन्दुना ।
अभिन्नेन कुतो मोक्षः, स बाह्याभ्यन्तरं प्रिये ॥१६४॥
भित्त्वा बिन्दुं ततो देवि !, अर्धचन्द्रं विभेदयेत् ।
भिद्यतश्चार्धचन्द्रस्य, भालो झिमिझिमायते ॥१६५॥
अर्धचन्द्रं तु भित्त्वा वै, भेदयेत्तु निरोधिनीम् ।
तस्यास्तु भिद्यमानायाः, शब्दो मिमिमिमायते ॥१६६॥
अष्टधाऽनाहतः प्रोक्तः, शून्यादि-प्रतिभेदतः ।
शून्यं स्पर्शस्तथा नादो, ध्वनिर्बिन्दुस्तथैव च ॥१६७॥
शक्तिर्जीवाक्षरं चेति, ह्यष्टधाऽनाहतः स्मृतः ।
निरोधिनीं भेदयित्वा, ततो नादं व्रजेद् बुधः ॥१६८॥

वंशशब्दसमः शब्दस्तत्र सूक्ष्मः प्रजायते ।
भेदयेन्नादसंस्थानं, ब्रह्मरन्ध्रं सुदुर्भिदम् ॥१६९॥
भिद्यतो ब्रह्मरन्ध्रस्य, शब्दः शुभशुभायते ।
शक्तिमध्यगतः प्राणो, वंशनादेन संनिभः ॥१७०॥
साधको भेदयेच्छक्तिं, दुर्भेद्यां सर्वयोगिनाम् ।
भिद्यते च यदा शक्तिः, शाब्दः शुभशुभस्ततः ॥१७१॥
शक्तिं भित्त्वा ततो देवि, तच्छेषं व्यापिनी भवेत् ।
अनुभूतो भवेत्तत्र, स्पर्शो यद्वत् पिपीलिका ॥१७२॥
भित्त्वा वै व्यापिनीं देवि, समनायां मनस्त्यजेत् ।
मनसा तु मनस्त्यक्त्वा, जीवः केवलतां व्रजेत् ॥१७३॥
भित्त्वा क्रमेण सर्वाणि, ह्युन्मनान्तानि यानि तु ।
पूर्वोक्तलक्षणैर्देवि, त्यक्त्वा स्वच्छन्दतां व्रजेत् ॥१७४॥
जायते चोन्मनस्त्वं हि, देहेनानेन साधके ।
सङ्क्रामेत् परदेहेषु, क्षुत्तृड्भ्यां बाध्यते नहि ॥१७५॥
अतीतानागतं चैव, त्रैलोक्ये यत्प्रवर्तते ।
प्रत्यक्षं तद् भवेत्तस्य, सर्वज्ञत्वञ्च जायते ॥१७६॥
मनः संहृत्य विषयान्, मन्त्रार्थगतमानसः ।
न द्रुतं न विलम्बत्वं, जपेन्मौक्तिकपंक्तिवत् ॥१७७॥

जपः स्यादक्षरावृत्तिर्मानसोपांशु-वाचिकैः ।
धिया यदक्षरश्रेणीं, वर्ण-स्वर-पदात्मिकाम् ॥१७८॥
उच्चरेदर्थमुद्दिश्य, मानसः स जपः स्मृतः ।
जिह्वोष्ठौ चालयेत् किञ्चिद् देवतागतमानसः ॥१७९॥
किञ्चिच्छ्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः ।
षट्कर्मकृद् वाचिकः स्यात्, कायिकः कर्मसिद्धिकृत् ॥१८०॥
मानसः साधयेन्मोक्षं, ततोऽन्यः क्षुद्रकर्मकृत् ।
जपेन देवता नित्यं, स्तूयमाना प्रसीदति ॥१८१॥



जपात् सिद्धिर्जपात् सिद्धिर्जपात् सिद्धिर्न संशयः ।
कृत्वा जपं पुरा चैवं, तेजोरूपं समर्पयेत् ॥१८२॥
देवस्य दक्षिणे हस्ते, कुशपुष्पार्घवारिभिः ।

शक्तिविषये तु —

... ... ... ... ॥१८३॥

एवं जपं पुरा कृत्वा, गन्धाक्षतकुशोदकैः ।
जपं समर्पयेद् देव्या, वामहस्ते विचक्षणः ॥१८४॥

(पाठान्तरम्)—

चित्रा वज्रा च मेधा च, ब्रह्म-प्राणधरे तथा ।
सर्वज्ञानप्रदा चैव, मनःसंयमनी तथा ॥१८५॥
विशुद्धा च निरुद्धा च, वायुसञ्चारिणी तथा ।
तेजःशुष्करी च ततो, बलपुष्टिकरी तथा ॥१८६॥
बुद्धिसञ्चारिणी चैव, ज्ञानजृम्भणकारिणी ।
सर्वप्राणहरा चैव, पुनर्जीवनकारिणी ॥१८७॥
षोडशैतास्तु यो नाडीर्ज्ञात्वा प्राणप्रयोगतः ।
भिनत्ति स महायोगी, साक्षाद् ब्रह्ममयो भवेत् ॥१८८॥

२३. षट्चक्रेषु जपफलानि —

भूमिकामो जपेन्मन्त्रं, मूलाधारे चतुर्दले ।
स्वाधिष्ठाने जपादेव, महेन्द्रो जायतेऽचिरात् ॥१८९॥
मणिपूरे जपादेव, भवेत् स्वर्गस्य भाजनम् ।
अनाहते महापद्मे, जपाद् ब्रह्म परं व्रजेत् ॥१९०॥
विशुद्धाख्ये जपादेव, विष्णुलोके वसेद् ध्रुवम् ।
आज्ञाचक्रे जपाद् देवि, महाद्वीपे वसेत् सदा ॥१९१॥
सहस्रारे स्थिरो भूत्वा, यदि चाष्टशतं जपेत् ।
तत्फलात् कोटिभागैकं, भागं चान्यन्न विद्यते ॥१९२॥

पृथिव्यामव्ययो देही, भवत्येव न संशयः ।
... ... ... ... ॥१६३॥

२४. दशचक्रेषु जपध्यानफलानि —

मूलाधारे जपाद् ध्यानान्मन्त्रस्य चिन्मयं वपुः ।
जायते च ततो ध्येयस्यापि चिन्मयरूपता ॥१६४॥
स्वाधिष्ठाने जपाद् ध्यानाज्ज्ञानं मन्त्रप्रयोगजम् ।
भवत्यथ ततो ध्येयस्यापि ज्ञानं भवेदलम् ॥१६५॥
मणिपूरे जपाद् ध्यानाद्, मन्त्रे प्राणगतिर्भवेत् ।
तथा ध्येयस्य मनसि, सुरता जायते ध्रुवम् ॥१६६॥
अनाहते जपाद् ध्यानादैहिकञ्चेच्छितं फलम् ।
फलं दातुं समर्थः स्याद्, ध्येयश्चापि तथा भवेत् ॥१६७॥
विशुद्धेऽथ जपाद् ध्यानान्मन्त्र एकाग्रतां व्रजेत् ।
ध्येयश्च स्थिरतां याति, ध्यातुश्चित्ते निरन्तरम् ॥१६८॥
आज्ञाचक्रे जपाद् ध्यानान्मन्त्रे चैतन्यमुद्भवेत् ।
ध्येयस्यापि भवेत् तद्वच्चैतन्यं हृदि सर्वथा ॥१६९॥
नैर्ऋतेऽथ जपाद् ध्यानात्, कामक्रोधादयः समे ।
सर्वथा विलयं यान्ति, साधना च प्रवर्द्धते ॥२००॥
आग्नेयेऽथ जपाद् ध्यानाद्, दह्यन्ते कर्मराशयः ।
शुद्धो बुद्धो मुक्तज्ञानस्वरूपश्च भवेद् यतिः ॥२०१॥
ईशाने च जपाद् ध्यानादीशशक्तिरवाप्यते ।
वाञ्छितं पूर्त्तिमायाति, सकलं कल्पवृक्षवत् ॥२०२॥
वायव्येऽथ जपाद् ध्यानाद्, वायुवद् बलवान् भवेत् ।
दूरदृष्टिं खेचरत्वं, लभते नात्र संशयः ॥२०३॥
... ... ... ... ॥२०४॥



२५. बहिर्यागान्तर्यागपूर्वकः पूजाविधिः —

तथा च प्रक्रियाऽप्यस्या, ज्ञातव्या शास्त्रनोदिता ।
यया विना न सिद्धिः स्यात्, कल्पकोटिशतैरपि ॥२०५॥
बाह्यान्तर्यागयोस्तत्र, क्रमः पूजाविधिस्तथा ।
संक्षेपादुच्यते शिष्टं, ज्ञातव्यं गुरुवक्त्रतः ॥२०६॥
अनाहते बाह्ययागश्चान्तर्यागो मणौ स्मृतः ।
नैर्ऋत्ये च तदा पूजा, जायते सर्वसिद्धिदा ॥२०७॥
मणिपूरे बाह्ययागः, स्वाधिष्ठाने द्वितीयकः ।
आग्नेये च तदा पूजा, कर्तव्या सिद्धिमिच्छता ॥२०८॥
स्वाधिष्ठाने बाह्ययागश्चान्तर्यागो विशुद्धके ।
ईशाने च तदा पूजा, क्रियते साधकोत्तमैः ॥२०९॥
विशुद्धे च बहिर्यागोऽन्तर्यागस्त्वनाहते ।
वायव्ये च तदा पूजा, भवत्येषः क्रमो मतः ॥२१०॥
कालीकल्पक्रमो ह्येष, गदितोऽत्र यथोदितः ।
एतत्क्रमोत्तरं कुर्यात्, सुन्दरीकल्पसाधनाम् ॥२११॥
आज्ञाचक्रोत्तरं तत्र, दश स्थानानि सन्ति हि ।
एकैकाङ्गुलमूर्ध्वस्थान्युच्यन्ते तानि साम्प्रतम् ॥२१२॥

२६. देहे चतुर्णां पीठानां स्थितयः —

मूलाधारे कामराजं, जालन्धरमनाहते ।
आज्ञायां च पूर्णगिरिमुड्डयानं ब्रह्मरन्ध्रके ॥२१३॥
चत्वारि पीठान्येतानि, देहे तिष्ठन्ति सर्वतः ।
आराधनां विधायैषां, मुक्तो भवति मानवः ॥२१४॥

२७. देहे शाम्भवी-शाम्भवानां स्थितयः —

परेश्वर्या युतस्तिष्ठत्याज्ञाचक्रे परेश्वरः ।
विश्वेश्वर्या च सहितो, विश्वेशस्तु विशुद्धके ॥२१५॥

हंसेश्वर्याऽनाहते च, हंसेशः सह तिष्ठति ।
संवर्तेश्या च मणिके, संवर्तेशः सह स्थितः ॥२१६॥
द्वीपेश्वरी-द्वीपनाथौ, स्वाधिष्ठाने विराजतः ।
नवात्मकेश्वर्या युक्तो, मूलाधारे विराजते ॥२१७॥
नवात्मकेश्वरो नित्यं, शाम्भवो योगसिद्धिदः ।
षडन्वयेश्वरीयुक्तः षडन्वय-विभुस्तथा ॥२१८॥
सहस्रारे स्थितो नृणामिति प्रोक्तं महात्मभिः ।
शाम्भव्यः शाम्भवा देहे, यथा तिष्ठन्ति तत्क्रमः ॥२१९॥

२८. देहे बिन्दुनादमहालिङ्गानां स्थितयः —

आज्ञाचक्रे भवेद् बिन्दुर्नादः स्यात् तत उच्चकैः ।
सहस्रारे महालिङ्गमिति योगे विभावयेत् ॥२२०॥
एवं शिवालये देहे, शिवशक्तिनिकेतनम् ।
ज्ञात्वैव सर्वदा कार्या, साधना तत्त्वदर्शिभिः ॥२२१॥

२९. नादबिन्दुयोगलक्षणम् —

मणिपूरस्य पद्मस्य, कर्णिकायां महारजः ।
ताम्रवर्णं च भवति, पूरकेण तदुन्नतम् ॥२२२॥
कुण्डलीसहयोगेन. कृत्वा पश्चात् सहस्रके ।
पद्मेऽथ कर्णिकायां वै, शुद्धस्फटिककान्तिना ॥२२३॥
कोटिसूर्यप्रतीकाश-तेजोरूपेण बिन्दुना ।
मेलयेदेष वै "नाद-बिन्दु-योग" इतीरितः ॥२२४॥
योगिनः साधना सूक्ष्माऽपीयमेवास्ति वर्णिता ।
वीर्यमास्ते प्राणशक्तिस्तन्नाशे ह्रसतीह सा ॥२२५॥

३०. महारजोवीर्ययोगलक्षणम् —

अपानशक्तेरुत्थानादुदानाग्नेश्च योगतः ।
वीर्यस्य प्राणशक्तिस्तु, प्रभवत्यूर्ध्वगामिनी ॥२२६॥



न वै स्खलति तद्वीर्यं, योगिनस्तादृशस्य च ।
उदानवेगस्य बलात्, स्वप्नदोषादिषु स्रुतम् ॥२२७॥
वीर्यं तदुष्णता शक्त्या, योनिस्थानस्थितेन वै ।
रुधिरेण सम्मिलति, प्राणवेगश्च तद्बलात् ॥२२८॥
सुषुम्नायामूर्ध्वगतिं, कुरुते क्रिययाऽनया ।
"महारजोवीर्ययोगो", यतिभिः कथितो मुदा ॥२२९॥
गुरुं च देवतां मन्त्रं, तथा स्वात्मानमेव च ।
एकीभूतमिदं सर्वं, ध्येयं षोडशचक्रके ॥२३०॥
गुरूपदेशमार्गेण, सहसैव प्रकाशते ।
स्थूलं सूक्ष्मं परं चेति, त्रिविधं ब्रह्मणो वपुः ॥२३१॥
अणिमादिकमैश्वर्यमचिरं तस्य जायते ।
नास्ति[1] क्रमात् परो मन्त्रो, न देवः स्वात्मनः परः ॥२३२॥
सर्वज्ञं सर्वगं शान्तं, सर्वेषां हृदये स्थितम् ।
सुरैरवेद्यं श्रीगुरुं, ध्यायस्व यत[2]चेतसा ॥२३३॥
भिक्षाटनं जपः स्नानं, ध्यानं शौचं सुरार्चनम् ।
कर्त्तव्यानि षडेतानि, सर्वथा नृपदण्डवत् ॥२३४॥
प्रणवश्च मात्राश्चैव, शक्तयो ध्यान ......... ।
कर्त्तव्यानि षडेतानि, तारमात्राप्रचिन्तनम् ॥२३५॥

३१. मस्तिष्क-शरीर-नाडीनां विवरणानि —

मानवस्य शरीरेऽस्मिन्, पञ्च[3] स्थानेषु सर्वदा ।
सम्पूर्णावयवानाञ्च, चिकित्सा हि विधीयते ॥२३६॥
तदाऽस्मिन् प्रथमे स्थाने, शरीरे पादनामके ।
मेरुदण्डस्थितं पूर्णं, नाडीचक्रञ्च प्रसृतम् ॥२३७॥
अस्मादधोमुखी धारा, चोर्ध्वगा जायते तदा ।
पादान्मस्तकपर्यन्तं, द्वितीयं स्थानमुच्यते ॥२३८॥

१. क्रमदीक्षेति । २. सुरावेद्यं गुरुं मतात् सु देवेधि—इति पाठा० । ३. नव-इति पाठा० ।

हस्तयोः कर्णयोश्चक्षुस्तृतीयं स्थानमुच्यते ।
स्थानं तुरीयं मस्तिष्के, कथितं शास्त्रकोविदैः ।।२३९।।
तदस्य पञ्चमं स्थानमनाहतमितीरितम् ।
तत्रस्थं हि शरीरं तद्विपरीतमधोमुखम् ।।२४०।।
शिरश्चाधःस्थितं नित्यं, पादावुपरि संस्थितौ ।
एषु पञ्चसु स्थानेषु चाङ्गमुपरि संस्थितम् ।।२४१।।
कथ्यतेऽवयवो लोके, शास्त्रदृग्भिर्विचक्षणैः ।
एतच्छरीरं देहस्य, सम्पूर्णस्य प्रचालकम् ।।२४२।।
मूलाधारात्सहस्रार-पर्यन्तं चक्रवर्णनम् ।
यथा योगे तथा देहे, चक्राणि प्रभवन्ति वै ।।२४३।।
परकायचिकित्सायां, शल्यदाहौषधिस्तथा ।
सूचीवेध-क्वाथ-चाप[1]चिकित्साः सन्ति निश्चिताः ।।२४४।।
यदि पूर्णं शरीरं हि, पादे समवतिष्ठते ।
कथं न म्रियते तर्हि, पादच्छेदेन मानवः ? ।।२४५।।
सन्ति सङ्कुचिता नाड्यः, परा विकसितास्तथा ।
आघातेन समं चैताः, सङ्कुचन्ति प्रयत्नतः ।।२४६।।
शरीरे विद्यते नाडी, पुनर्जीवनकारिणी ।
आघातेन समं चैषा, द्रुतं सङ्कोचमेष्यति ।।२४७।।
यदि सङ्कुचिता न स्यान्नाडी जीवनकारिणी ।
[2]तदा मृत्युर्भवत्येव, प्राणिनो नात्र संशयः ।।२४८।।

---

१. चाप-चिकित्सेति स्वतन्त्रा पद्धतिः ।

२. पायूपस्थे अपानं चक्षुःश्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रतिष्ठते । मध्ये तु समानः । एष ह्य तदद्भुतमन्नं समं नयति तस्मादेतत् सप्तार्चिषि भवति हृदि ह्येष आत्मा अन्नैतत्तदेकशतं नाडीनां तासां शतं शतमेकैकस्यां द्वासप्ततिर्द्वासप्ततिः प्रतिशाखा नाडीसहस्राणि भवन्त्याशु व्यानश्चरति । अथैकयोर्ध्वम् उदानः पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलोकम्— इत्यन्यत्र पाठः ।



विचित्रश्चित्रकारेण, केनायं मस्तकः कृतः ।
सूक्ष्मचित्कोषसंयुक्तो, भिन्नाकारलयात्मकः ।।२४९।।
लूताजालमिवाबद्धो, नाडीभिः सूक्ष्मतन्तुभिः ।
अस्य संरचनां वीक्ष्य, विस्मयो जायते महान् ।।२५०।।
मस्तिष्काद्धि ऋते किञ्चित्कर्म कर्तुं न शक्यते ।
सर्वाः क्रियाः प्रवर्तन्ते, मस्तिष्कस्य प्रभावतः ।।२५१।।
यत्किञ्चिद् ज्ञानविज्ञानं, दृश्यते सर्वतोमुखम् ।
समुद्भूतं मस्तकाद्धि, मस्तके प्रविलीयते ।।२५२।।
संदृश्यते जगत्सर्वं, यत्किञ्चिद्धि प्रपञ्चितम् ।
तत्सर्वं मस्तकस्यास्ति, विषयः सर्वतोमुखः ।।२५३।।
स्थूलदृष्ट्या शरीरस्य, मस्तकोऽस्ति प्रचालकः ।
परं संसारचक्रस्य, सूक्ष्मदृष्ट्या प्रचालकः ।।२५४।।
अक्षोटकसमः स्थूलः, पञ्चभूत-प्रपञ्चितः ।
विभक्तः सप्तभागेषु, मानवस्यास्ति मस्तकः ।।२५५।।
तेषां नामानि कार्याणि, सर्वाणि च पृथक् पृथक् ।
भिन्नभागविभक्तोऽपि, संयुक्तो भिन्नशक्तिभिः ।।२५६।।
सप्तभागविभक्तोऽपि, सव्य-वामेति नामतः ।
द्वावेव भागौ प्रमुखौ, मस्तकस्य विशेषतः ।।२५७।।
द्वाभ्यां कराभ्यां यः कश्चित्स्वकार्यं कुरुते नरः ।
क्रियाशीलौ मनुष्यस्य, तस्य द्वावेव मस्तकौ ।।२५८।।
योऽस्यास्ति प्रथमो भागः, सप्तभागेषु विश्रुतः ।
विभक्तो ह्यूनपञ्चाशद्-भागेषु च विशेषतः ।।२५९।।
चत्वारिंशच्च द्वौ भागाः सर्वेषां कार्यसाधकाः ।
अवशिष्टाः सप्त भागाः, षड्भिः कार्यं प्रकुर्वते ।।२६०।।
चतुष्षष्टिविभागेषु, विभक्तोऽयं द्वितीयकः ।
कलादीक्षास्तथा मात्राश्चास्मिन् भागे प्रतिष्ठिताः ।।२६१।।

सप्तधा हि विभक्तोऽयं, तृतीयो भागनामकः ।
यस्मिंश्च सप्तभागेषु शक्तयः सप्तसंस्थिताः ॥२६२॥
अयं भागः सप्तशत्याश्चरित्रमुत्तमं स्मृतम् ।
नवाध्यायेषु यस्मिन् वै, संस्थिता नवशक्तयः ॥२६३॥
अस्य सप्त प्रधानाश्च, नायिकाः सम्प्रकीर्तिताः ।
वायव्याम्नाय-नैर्ऋत्यश्चास्मिन् सम्मिलितः खलु ॥२६४॥
चतुर्थभागश्चास्यास्ति, विभक्तः षड्विधः स्मृतः ।
अस्मिन् नरशरीरस्य, षट्चक्राणि सन्ति वै ॥२६५॥
योऽस्यास्ति पञ्चमो भागो, विभक्तः सोऽपि सप्तधा ।
अस्यापि समधिष्ठात्र्यः, शक्तयः सप्त कीर्तिताः ॥२६६॥
अस्मिन् भागे सप्तशत्याः, शक्तयः सप्त संस्थिताः ।
चतस्रस्तिस्रः संख्याकाश्चादिमध्यमयोः क्रमात् ॥२६७॥
षष्ठो भागोऽस्ति यः सोऽपि, विभक्तः पञ्चधा स्मृतः ।
ज्ञानयोगक्रियाचर्या-साक्षात्कारं बिभर्त्यसौ ॥२६८॥
योऽस्यास्ति सप्तमो भागो, विभक्तोऽस्ति द्विभागयोः ।
मध्ये यस्येतरलिङ्गं, विद्युत्पुञ्जं प्रतिष्ठितम् ॥२६९॥
चराचरजगत्सर्वं, विद्युत्पुञ्जं प्रकाशते ।
माधुर्यैश्वर्य-नाम्न्यौ च, शक्ती द्वे सुप्रतिष्ठिते ॥२७०॥
ऐश्वर्यनामिकाशक्तेः, कार्यमस्ति तथाद्भुतम् ।
अणिमामहिमादीनां, शक्तीनाञ्च प्रदर्शनम् ॥२७१॥
माधुर्यनामिकाशक्तेः, कार्यमेवास्ति सर्वतः ।
भ्रमस्योत्पादनं लोके, भूतबाधानिवारणम् ॥२७२॥
मस्तकान्निर्गताः नाड्यः, पादाङ्गुष्ठे हि लम्बिताः ।
मेरुदण्डं समाश्रित्य, स्वकार्यकरणे रताः ॥२७३॥
समस्तनाडीसंस्थानं, शक्तिकेन्द्रं शरीरिणाम् ।
मेरुदण्डस्य मध्यं हि, सुस्थितञ्च विराजते ॥२७४॥



भौतिकस्य शरीरस्य, स्थूला सूक्ष्मा च प्रक्रिया ।
नाडीसंस्थानयोगेन, सर्वदा हि प्रवर्तते ॥२७५॥
मानवस्य शरीरेऽस्मिल्लूताजालमिवावृताः ।
सार्धस्त्रिकोट्यो नाड्यश्च, सर्वतः सन्ति सङ्कुलाः ॥२७६॥
द्विसप्ततिसहस्राश्च, मुख्या नाड्यः प्रकीर्तिताः ।
तासु नाडीषु प्रमुखाः, द्विसप्तत्यः शरीरिणाम् ॥२७७॥
रक्तस्य शोधनं पूर्णं, शरीरे रक्तप्रापणम् ।
प्राणतत्त्वस्य ग्रहणं, नाडीकार्यं हि वर्तते ॥२७८॥
नूनं नियन्त्रिता नाड्यः, सर्वकामदुघा मताः ।
सम्यङ् नियमनाल्लोके, किन्न कर्तुं क्षमो नरः ॥२७९॥
मस्तकस्य विभागाभ्यां, द्वात्रिंशत्क्रमपूर्वकम् ।
शरीराधः प्रगच्छन्त्यश्चक्रनिर्माणतत्पराः ॥२८०॥
तत्सर्वं प्रथमं नाड्यो, द्वात्रिंशच्च पृथक् पृथक् ।
सङ्गता ललनाचक्रे, चतुष्षष्ट्यो भवन्ति ताः ॥२८१॥
यदा ता ललनाचक्राद्, विशुद्धं प्रतियान्ति हि ।
तदा षोडशसंख्याका, नाड्यो न्यूना भवन्ति वै ॥२८२॥
वायव्यकोणचक्रात्तु, तदा नाड्यश्चतुर्दश ।
आगत्य मिलितास्ताश्च, जायन्ते क्रमपूर्वकम् ॥२८३॥
न्यूना द्वादशसंख्याका, अनाहतपद्मनामके ।
नैर्ऋत्यकोणादागत्य, मिलन्त्येकादश पुनः ॥२८४॥
मणिपूरनामके चक्रे, न्यूना नाड्यश्च या दश ।
अष्टौ चाग्नेयकोणाद्वै, समागत्य मिलन्ति हि ॥२८५॥
स्वाधिष्ठाने हि चक्रेऽस्मिन्, न्यूनाः षड् याः प्रकीर्तिताः ।
ईशानकोणचक्राद्धि, मिलन्त्येकादश पुनः ॥२८६॥
मूलाधारे चतस्रस्ता, न्यूना नाड्यः प्रकीर्तिताः ।
आज्ञाचक्रे तु द्वे नाड्यौ, न्यूने जाते स्वभावतः ॥२८७॥

अष्टौ नाड्यश्च मिलिताश्चक्रेऽस्मिन् विषुनामके ।
षट् तथा कुलचक्रे तु, ह्येता नाड्यश्च सङ्गताः ।।२८८।।
इत्थं मुख्या द्विसप्ततयो, मस्तकाद्धि विनिर्गताः ।
मेरुदण्डस्थिता नाड्यो, जीवदेहनियन्त्रिताः २८९।।
अतिसूक्ष्माः प्रसर्पन्ति, सुप्ता नाड्यः प्रयत्नतः ।
योगेनोद्बोधिता नाड्यः, प्रबोधं यान्ति ताः खलु ।।२९०।।
भवन्ति योगेन यदा, सुप्ता नाड्यो नियन्त्रिताः ।
अभीष्टकार्यसिद्ध्यर्थं, नाडीतन्त्रं प्रबुद्ध्यते ।।२९१।।
कार्यं सम्पाद्य सा नाडी, स्वयमेव नियन्त्रिता ।
स्वस्वभावस्थिता सौम्या, जायते नात्र संशयः ।।२९२।।
चैतन्यभावमापन्ना, नाडी यत्नेन चैकदा ।
कामं शान्ता प्रजायेत, परं सुप्ता न जायते ।।२९३।।
सूक्ष्मवीक्षणयन्त्रेण, यत्नतो वीक्षणादपि ।
लूताजालानि लक्ष्यन्ते, सम्पृक्तानि समन्ततः ।।२९४।।
लूतेव नाडिका व्याप्ताः यथोक्ताश्च शरीरिणाम् ।
अधश्चोर्ध्वं गताः नाड्यो, द्विसप्ततिसंख्यकाः ।।२९५।।
आमूलं तत् क्रमं वक्ष्ये शास्त्रोक्तं तन्त्रसम्मतम् ।
तदेव योगतन्त्रं यस्तज्जानाति स वेदवित् ।।२९६।।
त्रिपुराया यास्तु नाड्यो, नित्याः षड्दशसंख्यकाः ।
नाड्यः पञ्चदश प्राहुः, काली नित्या सुविश्रुता ।।२९७।।
एका तु शाम्भवी नाडी, ललनातश्च जायते ।
परिव्याप्तं सहस्रारे, द्वात्रिंशत्तच्च जालकम् ।।२९८।।

---

१. प्रथमो भागः ७×७=४९ भागेषु विभक्तः। द्वितीयभागः ८×८=६४ भागेषु विभक्तः । ६४×३=१९२ टिप्पणी द्रष्टव्या । तृतीयभागसप्तमभागयो श्चतुर्थपञ्चमभागयोः षष्ठ ६ भागे सप्तमतृतीयभागयोश्च ।



आरोहावरोहतस्ताश्चतुःषष्टिर्यतो मताः ।
आज्ञायां विशतो द्वे च, विशुद्धे चैव षोडश ।।२९९।।
अधोमुखविशुद्धेच्च, निर्गच्छन्ति चतुर्दश ।
अनाहते विशन्त्येव, नाड्यो द्वादश संख्यकाः ।।३००।।
तदधोमुखतश्चैव, लसन्त्येकादशैव ताः ।
विशन्ति दश नाड्यस्तु, चक्रे वै मणिपूरके ।।३०१।।
तदधोमुखतश्चैता, अष्टनाड्यो भवन्ति वै ।
स्वाधिष्ठाने तु षड् नाड्यः, पुनश्चक्रे विशन्ति च ।।३०२।।
तदधोमुखतश्चैवमेकादश भवन्ति वै ।
मूलाधारे चतस्रश्च, नाड्यस्तु प्रविशन्ति च ।।३०३।।
विषुचक्रेऽष्टनाड्यस्तु, नाड्यः षट् च कुले तथा ।
आविर्भवन्ति चक्रेषु, प्रविशन्ति यथाक्रमम् ।।३०४।।
ताभ्यश्चैकसहस्रं तु, शाखाः प्राहुर्विचक्षणाः ।
द्विसप्ततिसहस्रं च, नाडीनां जालकं भवेत् ।।३०५।।
पञ्चाशत्-सहस्रं तु, नाड्यः सन्ति सहायिकाः ।
एताश्च सहयोगिन्यः, सदा कार्यं प्रकुर्वते ।।३०६।।
पञ्चाशत्-सहस्रं तु, चान्यस्मिन् सम्प्रविश्य वै ।
नाड्यः कार्यं प्रकुर्वन्ति, प्राणिनी-प्राणवाहिकाः ।।३०७।।
पञ्चाशत् - सहस्रं तु, परिवर्तनकारिकाः ।
एता नाड्यो मनोवृत्तिं, यथा परिणमन्ति ताः ।।३०८।।
पञ्चाशत्-सहस्रं तु, नाड्यः सन्ति शरीरिणाम् ।
विशेषतो दूरदृष्टेः, कार्यं संसाधयन्ति ताः ।।३०९।।
पञ्चाशत्-सहस्रं च, सन्ति नाड्यः सहायिकाः ।
तत्र गत्वा हितं कार्यं, द्रुतं सम्पादयन्ति ताः ।।३१०।।
पञ्चाशत्-सहस्रं, नाड्यो बोधकरा मताः ।
तत्तत्कार्यविधिना हि, विशेषेण प्रबोधकाः ।।३११।।

पञ्चाशत्सहस्रं तु, नाड्यश्चाकर्षिकाः स्मृताः ।
आकर्षन्ति मनोवृत्तिं, प्राणिनां नात्र संशयः[1] ॥३१२॥

अन्याश्च सहयोगिन्यो, नाड्यः सन्ति सहस्रशः ।
परमाभिर्विना नैताः, कार्य-सम्पादनक्षमाः ॥३१३॥

आसु नाडीषु वर्तन्ते, नाड्यः काश्चन विश्रुताः ।
औषधीनां परिज्ञाने, स्वयं हि प्रभवन्ति याः ॥३१४॥

परिज्ञाताश्चौषधयः, कार्यं तासां प्रकुर्वते ।
प्रविश्यान्यशरीरे ता, भेदने योजने रताः ॥३१५॥
... ... ... ... ॥३१६॥[2]

रश्मिपञ्चकरूपा या, षट्त्रिंशन्मन्त्ररूपिणी ।
प्रतीकस्मृति-विद्या सा, प्रथितागमवेदिषु ॥३१७॥

प्रतीकस्मृति-विद्येयं, जन्म-जन्मान्तरोद्भवम् ।
ज्ञानं ददाति सततं, सिद्धयेच्छाम्भवविद्यया ॥३१८॥

नाड्यः स्मरणमात्रेण, प्रबुद्धा अन्यनाडिभिः ।
मिलित्वाऽनेकशः सर्वाः, सक्रियाः सम्भवन्ति हि ॥३१९॥

सूर्यवद् भ्राजते भक्तः, प्रतीकस्मृति-विद्यया ।
मार्गं दर्शयतीयं तु, राजमार्गवदान्तरम् ॥३२०॥

व्यासो युधिष्ठिरायादात्, स हि पार्थाय चादिशत् ।
इन्द्रलोकं गतस्तस्याः, पार्थो दिव्यप्रभावतः ॥३२१॥

यानि नामानि विद्याया, अस्याः सन्ति विभागशः ।
तान्येव नाडीनामानि, देवानां च तथैव हि ॥३२२॥

एतास्वपि च नाडीषु, प्रमुखा दश संस्मृताः ।
... ... ... ... ... ... ... ॥३२३॥

---

१–विरमन्ति ताः । इति पाठा० २–अग्रिमोंशश्च खण्डित इति पठितुं न पारितः ।



३२. वीर्यसंरक्षणप्रक्रिया —

नासाभ्यां प्राणमाकृष्य, ह्यपाने योजयेद् बलात् ।
तावदाकुञ्चयेद् गुदं, शनैरश्विनीमुद्रया ॥३२४॥
वीर्यसंरक्षणस्यान्यो विधिः सम्प्राप्यतेऽपि च ।
नासामूले च मध्ये च, ध्यानाद् बिन्दुःस्थिरो भवेत् ॥३२५॥
गुरूपदिष्टमार्गेण, प्रत्यहं यः समाचरेत् ।
बिन्दुसिद्धिर्भवेत्तस्य, महासिद्धिप्रदायिका ॥३२६॥
कुण्डल्येव भवेच्छक्तिस्तां तु सञ्चालयेद् बुधः ।
स्वस्थानादाभ्रुवोर्मध्ये, शक्तिचालनमुच्यते ॥३२७॥
तत्र नाड्यस्तु यावत्यस्तिर्यङ्मध्यमधः स्थिताः ।
समानेन समाकृष्टा, एकीभूता भवन्ति ताः ॥३२८॥

तासु ये वायवस्तेऽपि प्राणे समरसे श्रिताः ।
सामरस्यात् सुषुम्नाया, एकीभूता व्यवस्थिताः ॥३२९॥

कुम्भकेन ह्यसंरुद्धा, विकसन्ति समन्ततः ।
सरस्वती तु या नाडी, जिह्वान्ते सा प्रसर्पति ॥३३०॥

यावद् गच्छेत् सुषुम्नायां, सम्यक् तावत् प्रकाशते ।
साधने लभते सिद्धिं, वायोः सौक्ष्म्याददीर्घतः ॥३३१॥

ग्रन्थिपद्मगता नाड्यो, देहे याः संव्यवस्थिताः ।
रेचकेन समाक्षिप्ता, ऊर्ध्वमार्गा भवन्ति ताः ॥३३२॥

मन्त्र आत्मा तथा नाडी, चैवं समरसीभवेत् ।
रसं रसायनं दिव्यं, सिद्धिं दिव्यां लभन्ति ते ॥३३३॥

महामुद्रा-महाबन्धे, महावेधस्तथाश्विनी ।
विपरीतकृतिर्मुद्रा - शक्तिसञ्चालनं तथा ॥३३४॥

मुद्रा - मन्त्र - क्रिया - योग - महोपकरणेन च ।
मन्त्रयोगेन देवेशि, शीघ्रं सिद्ध्यति मानवः ॥३३५॥

महामुद्रा-महाबन्धौ, निष्फलौ वेधवर्जितौ ।
तस्माद्योगी प्रयत्नेन, करोति त्रितयं क्रमात् ॥३३६॥
एतत्त्रयं प्रयत्नेन, चतुर्वारं करोति यः ।
षण्मासाभ्यन्तरं मृत्युं, जयत्येव न संशयः ॥३३७॥
एतत्त्रयस्य माहात्म्यं, सिद्धो जानाति नेतरः ।
यज्ज्ञात्वा साधकाः सर्वे, सिद्धिं सम्यग्लभन्ति वै ॥३३८॥
गोपनीया प्रयत्नेन, साधकैः सिद्धिमीप्सुभिः ।
अन्यथा च न सिद्धिः स्यान्मुद्राणामेष निश्चयः ॥३३९॥

३३. महामुद्राकथनम् —

महामुद्रां प्रवक्ष्यामि, तन्त्रेऽस्मिन् मम वल्लभे ।
यां प्राप्य सिद्धाः सिद्धिं च, कपिलाद्याः पुरा गताः ॥३४०॥
अपसव्येन सम्पीड्य, पादमूलेन सादरम् ।
गुरूपदेशतो योनिं, गुदमेढ्रान्तरालगाम् ॥३४१॥
सव्यं प्रसारितं पादं, धृत्वा पाणियुगेन वै ।
नव द्वाराणि संयम्य, चिबुकं हृदयोपरि ॥३४२॥
चित्तं चित्तपथे दत्त्वा, भेदयेद् वायुचालनम् ।
महामुद्रा भवेदेषा, सर्वतन्त्रेषु गोपिता ॥३४३॥
वामाङ्गेन समभ्यस्य, दक्षाङ्गेनाभ्यसेत् पुनः ।
प्राणायामं समं कृत्वा, योगी नियतमानसः ॥३४४॥
अनेन विधिना योगी, मन्दभाग्योऽपि सिद्ध्यति ।
सर्वासामेव नाडीनां, चालनं बिन्दुधारणम् ॥३४५॥
जीवनं तु कषायस्य, पातकानां विनाशनम् ।
कुण्डली-तापनं वायोर्ब्रह्मरन्ध्र-प्रवेशनम् ॥३४६॥
सर्वरोगोपशमनं, जठराग्नि-विवर्धनम् ।
वपुषः कान्तिरमला, जरामृत्युविनाशनम् ॥३४७॥



वाञ्छितार्थफलं सौख्यमिन्द्रियाणां च मारणम् ।
एतदुक्तानि सर्वाणि, योगारूढस्य योगिनः ॥३४८॥
भवेदभ्यासतोऽवश्यं, नात्र कार्या विचारणा ।
... ... ... ... ॥३४९॥
गोपनीया प्रयत्नेन, मुद्रेयं सुरपूजिते ।
यां तु प्राप्य भवाम्बोधेः, पारं गच्छन्ति योगिनः ॥३५०॥
मुद्रा कामदुधा ह्येषा, साधकानां मयोदिता ।
गुप्ताचारेण कर्तव्या, न देया यस्य कस्यचित् ॥३५१॥

३४. महाबन्धकथनम् —

ततः प्रसारितं पादं, विन्यस्येत्तमुरूपरि ।
... ... ... ... ॥३५२॥
गुदयोनिं समाकुञ्च्य, कृत्वा चापानमूर्ध्वगम् ।
योजयित्वा समानेन, कृत्वा प्राणमधोमुखम् ॥३५३॥
बन्धयेदूर्ध्वगत्यर्थं, प्राणापानेन[1] यः सुधीः ।
कथितोऽयं महाबन्धः, सिद्धिमार्ग-प्रदायकः ॥३५४॥
नाडीजालाद् रसव्यूहो, मूर्धानं याति योगिनः ।
उभाभ्यां साधयेत् पद्भ्यामेकैकं सुप्रयत्नतः ॥३५५॥
भवेदभ्यासतो वायुः, सुषुम्नामध्यसङ्गतः ।
अनेन वपुषः पुष्टिर्दृढबन्धोऽस्थिपञ्जरे ॥३५६॥
सम्पूर्णहृदयो योगी, भवन्त्येतानि योगिनः ।
बन्धेनानेन योगीन्द्रः, साधयेत् सर्वमीप्सितम् ॥३५७॥

३५. महावेधकथनम् —

अपानप्राणयोरैक्यं, कृत्वा त्रिभुवनेश्वरि ! ।
महाबन्धस्थितो योगी, कुक्षिमापूर्य वायुना ॥३५८॥

---

१. प्राणापानेनेत्यत्र प्राणस्य | आसमन्तात् पानम्—अपाने योजनं तेनेत्यर्थः ।

स्फिचौ सन्ताडयेद्धीमान्, वेधोऽयं कीर्तितो मया ।
... ... ... ... ॥३५९॥
वेधेनानेन संविध्य, वायुना योगि-पुङ्गवः ।
ग्रन्थिं सुषुम्णा-मार्गेण, ब्रह्मग्रन्थिं भिनत्त्यसौ ॥३६०॥
यः करोति सदाभ्यासं, महावेधं सुगोपितम् ।
वायुसिद्धिर्भवेत्तस्य, जरामरणनाशिनी ॥३६१॥
चक्रमध्ये स्थिता देवाः, कम्पन्ते वायुताडनात् ।
कुण्डल्यपि महामाया, कैलासे सा विलीयते ॥३६२॥

३६. विपरीतकरणीमुद्रा —

भूतले स्वशिरो दत्त्वा, खे नयेच्चरणद्वयम् ।
विपरीतकृतिश्चैषा, सर्वतन्त्रेषु गोपिता ॥३६३॥
एतस्याः कुरुते नित्यमभ्यासं याममात्रतः ।
मृत्युं जयति योगीशः, प्रलये नैव सीदति ॥३६४॥
कुरुतेऽमृतपानं यः, सिद्धानां समतामियात् ।
स सेव्यः सर्वलोकानां, बन्धमेनं करोति यः ॥३६५॥
नाभेरूर्ध्वमधश्चापि, तानं पश्चिममाचरेत् ।
उड्ड्यानबन्ध एष स्यात्, सर्वदुःखौघनाशनः ॥३६६॥
उदरे पश्चिमं तानं, नाभेरूर्ध्वं तु कारयेत् ।
उड्ड्यानाख्योऽत्र बन्धो यो, मृत्युमातङ्गकेशरी ॥३६७॥
नित्यं यः कुरुते योगी, चतुर्वारं दिने दिने ।
तस्य नाभेस्तु शुद्धिः स्याद्येन शुद्धो भवेन्मरुत् ॥३६८॥
षण्मासमभ्यस्यन् योगी, मृत्युं जयति निश्चितम् ।
तस्योदराग्निर्ज्वलति, रसवृद्धिः प्रजायते ॥३६९॥
अनेन सुतरां सिद्धिर्विग्रहस्य प्रजायते ।
रोगाणां संक्षयश्चापि, योगिनो भवति ध्रुवम् ॥३७०॥



गुरोर्लब्ध्वा प्रयत्नेन, साधयेत् तु विचक्षणः ।
निर्जने सुस्थिते देशे, बन्धं परमदुर्लभम् ॥३७१॥

३७. शक्तिचालनमुद्रा —

आधारकमले सुप्तां, चालयेत् कुण्डलीं दृढाम् ।
अपानवायुमारुह्य, बलादाकृष्य बुद्धिमान् ॥३७२॥
शक्तिचालनमुद्रेयं सर्वशक्तिप्रदायिनी ।
... ... ... ... ... ... ... ॥३७३॥
वायुना शक्तिचालेन, प्रेरितं च यथा रजः ।
याति बिन्दुस्तदैकत्वं, भवेद्दिव्यं वपुस्तदा ॥३७४॥
शक्तिचालनमेवं हि, प्रत्यहं यः समाचरेत् ।
आयुर्वृद्धिर्भवेत्तस्य, रोगाणां च विनाशनम् ॥३७५॥
विहाय निद्राभुजगी, स्वयमूर्ध्वे भवेत् खलु ।
तस्मादभ्यसनं कार्यं, योगिना सिद्धिमिच्छता ॥३७६॥
यः करोति सदाभ्यासं, शक्तिचालनमुत्तमम् ।
येन विग्रहसिद्धिः स्यादणिमादिगुणप्रदा ॥३७७॥
गुरूपदेशविधिना, तस्य मृत्युभयं कुतः ।
मुहूर्तद्वयपर्यन्तं, विधिना शक्तिचालनम् ॥३७८॥
बिन्दुं चन्द्रेण संयुक्तो, रजः सूर्येण सङ्गतम् ।
तयोः समरसैकत्वं, यो जानाति स योगवित् ॥३७९॥
यः करोति प्रयत्नेन, तस्य सिद्धिरदूरतः ।
युक्तासनेन कर्तव्यं, योगिभिः शक्तिचालनम् ॥३८०॥
एतत्समुद्रादशकं, न भूतं न भविष्यति ।
एकैकाभ्यासतः सिद्धिः, सिद्धो भवति नान्यथा ॥३८१॥

३८. अश्विनीमुद्रा —

मुद्रा या ह्यश्विनी प्रोक्ता, तथा या शक्तिचालनी ।
समानीय तु पक्षौ द्वावूर्ध्वरेतस्त्वसाधना ॥३८२॥

आकुञ्चयेद् गुदद्वारं, प्रकाशयेत् पुनः पुनः ।
सा भवेदश्विनी मुद्रा, शक्ति-बोधनकारिणी ।।३८३।।

अश्विनी परमा मुद्रा, गुह्यरोगविनाशिनी ।
बलपुष्टिकरी चैव, ह्यकालमरणं हरेत् ।।३८४।।
मर्मस्थानानि नाडीनां, स्थानानि च पृथक् पृथक् ।
वायुसंस्थानकर्माणि, विदित्वा ध्यानमाचरेत् ।।३८५।।

पृथिवी लयतां याति, जलं तेजोमयं भवेत् ।
तेजो वायुस्तथा वायुराकाशं तत्प्रकाशकम् ।।३८६।।
सिद्धासनं समासाद्य, कर्णचक्षुर्नसो मुखम् ।
अङ्गुष्ठा-तर्जनी-मध्यानामिकाभिश्च साधयेत् ।।३८७।।

प्राणं संस्कृत्य काकाभिः, समाने योजयेत्ततः ।
षट्चक्राणां क्रमं ध्यात्वा, हूँ हंसमनुना सुधीः ।।३८८।।
[1]सुषुम्णामार्गेण बिन्दुस्थाने शिरसि गच्छति ।
अश्विनीमुद्रया अपि वीर्यस्योर्ध्वीकरणं भवति ।।
यस्याः स्मरणमात्रेण, शिवता जायते नृणाम् ।
ज्ञात्वा समस्तं पुरुषो, लभेन्मुक्तिं चतुर्विधाम् ।।३८९।।
[2]वाणी चित्रायते तेन, वाचः सिद्धिः प्रजायते ।
स्थिरवीर्येण सरस्वतीनाडी विकसति तेन वाग्मित्वम् ।।
[3]पाण्डित्यं कवित्वं च सम्पद्यते ।
मन्त्रजाप्येन प्राणशक्तिः शीघ्रं वर्धते ।।३९०।।

१–२–३ अत्र खण्डितपाठस्य शुद्धो-भाव एतैः पद्यैर्बोद्धव्यः ।।
सुषुम्नामार्गमाश्रित्य, बिन्दुस्थानं स गच्छति ।
वीर्यस्य चोर्ध्वीकरणे, मुद्रापि चाश्विनी मता ।।
वीर्यस्थैर्येण या नाडी, भारत्याख्या महेश्वरि! ।
प्रकाशमेति तेनास्य, वाग्मित्वं च प्रजायते ।।
वैदुष्यं च कवित्वं च, शीघ्रं सम्पद्यते नृणाम् ।
मन्त्रं जपेत् तया रीत्या, प्राणशक्तिर्विवर्धते ।।



३९. मूत्रोत्सर्गमुद्रा —

नासाभ्यां प्राणमाकृष्य, ह्यपाने योजयेच्छनैः ।
बलादाकुञ्चयेद् सम्यगश्विनीमुद्रया गुदम् ।।३९१।।
स्वमूत्रोत्सर्गकाले यो, बलादाकृष्य वायुना ।
स्तोकं स्तोकं त्यजेत् मूत्रमूर्ध्वमाकृष्य तत्पुनः ।।३९२।।

४०. कुण्डलिनीजागरणविधिः —

वन्दे गुरूणां चरणारविन्दे, सन्दर्शित-स्वात्मसुखावबोधे ।
जनस्य ये जाङ्गलिकायमाने, संसारहालाहलमोहशान्त्यै ।।३९३।।
गुरोः सकाशादधिगत्य दीक्षां, स्वसाधनायां प्रविविक्षुरादौ ।
ध्यायेद्[1] गुरोः श्रीचरणारविन्दं, समर्चयेन्[2] मानसिकोपचारैः।३९४।
गुरुं सहस्रारगतं तमेवं, ध्यात्वा तदाज्ञामुपलभ्य पश्चात् ।
प्रविश्य यत्नान् मणिपूरचक्रे, जपं चरेत् साधक आत्मतन्त्रः ।।३९५
चक्राच्च चक्रान्तरसम्प्रवेशे, सार्धं त्रिरावृत्त्य परिक्रमेत्तु[3] तत् ।
सञ्चिन्तयन्नूर्ध्वमुखं च चक्रमधोमुखं चापि समन्त्रजापम् ।३९६।।

चक्रं यदेतन्मणिपूरसंज्ञं, तद्दक्षिणाम्नायमुशन्त्यभिज्ञाः ।
भवेज्जपादत्र मनुः सजीवस्तथात्र संसिद्ध्यति 'भक्तियोगः' ।३९७।।
काल्याख्यनाड्या मणिपूरचक्राद्, विनिर्गतः कालधमन्यभिख्याम् ।
नाडीं प्रविश्य प्रजपन् 'स्वमूलाधारं' विशेच्चाधरमार्गचक्रम् ।३९८।
भवेज्जपादत्र मनोः शरीरं, पुष्टं क्रियाचार-विधिक्षमं च ।
वाक्शक्तिरत्र स्फुरति स्वतन्त्रा, ब्रूतेऽत्र मन्त्रः स्वयमीरयेच्च[4]।३९९।
विश्रान्तियोगोऽत्र भवेत् सुसिद्ध, इलातलायास्तत एत्य नाड्याः ।
आधारपद्मे कुलकुण्डलिन्या, ध्यानं सुयोगी कुरुते तदा सा ।४००।
यत् सर्वदेहावयवात्मकं सद्, विभाति तत्पादतलं प्रविश्य ।
तत्र स्थितान्यप्यथ पङ्कजानि, सञ्चेतयन्ती कुरुते विकासम् ।।४०१

१. ध्यायन्, २. समर्चयन्, ३. त्रिवारं परितः क्रमेण तत्, ४. मन्त्रो जनमीरयेच्च ।

तदङ्गुली-चारुपथेन भूयः, सुषुम्नयाऽऽज्ञां विशति प्रकामम् ।
गन्धारिकां चाप्यनुसृत्य नाडीं, विशेत् तदाज्ञाभिधमूर्ध्वचक्रम्॥४०२
आज्ञाभिधं चक्रमतिप्रसिद्धमाम्नायमूर्ध्वं कथितं तदत्र ।
मन्त्रस्वरूपं विदितं जपात् स्याद्, 'विज्ञानयोगश्च' भवेत् सुसिद्धः ॥
ततो विनिर्गत्य च हस्तिजिह्वानाड्याःसमाश्रित्य च मातृकाख्याम् ।
विशुद्धिचक्रं प्रविशेत् सुयोगी, यदुत्तराम्नायपथानुदर्शी ॥४०४॥
जपादिह ज्ञानजयोगसिद्धिर्मन्त्रस्वरूपार्थविनिश्चयश्च ।
ततश्च तिक्तापथमाश्रितः सन्, वामे करे तद्गतनाडिकानाम् ४०५
चैतन्यमापाद्य पुनः प्रविश्य, भ्रम्याऽथ सव्ये गतिमत्र कुर्यात् ।
दक्षे करे तद्गतनाडिकानां, चैतन्यमापाद्य पुनः प्रविश्य ॥४०६॥
ततश्च बालाभिधनाडिकायां, विनिर्गतस्तद्द्रवन्तिकाख्याम् ।
आश्रित्य नाडीं प्रविशेत् पुनः स्वाधिष्ठानचक्रं तत एव योगी ॥४०७
पूर्वाभिधाम्नायगते[5]ऽत्र चक्रे, जपाद् भवेन्मन्त्रजयोगसिद्धिः ।
ज्ञायेत मन्त्रावयवस्वरूपं, यथार्थतश्चात्र जपप्रभावात् ॥४०८॥
ततो विनिर्गत्य च शङ्खिनीति, प्रसिद्धनाड्याम[6]नुविश्य पीताम् ।
अनाहतं चक्रमियात् प्रसिद्धं, यत् पश्चिमाम्नायमुशन्ति सन्तः ॥४०९
जपात् पुनः स्यादिह "कर्मयोगसिद्धि"र्मनोर्दिव्यतनोः क्रमेण ।
ततो विनिर्गत्य सुखेन नीलानाड्याः सकोणामनुविश्य ताराम् ४१०
नैर्ऋत्यमाम्नायमुपैतुमादौ, [7]पुनर्विशेत् तन्मणिपूरमादौ ।
अनाहतं यन्मणिपूरकञ्च, तदन्तरे निर्ऋतिकोणचक्रम्॥४११॥
अधोमुखं पद्ममनाहतस्य, समन्वयः स्यादिह कर्मभक्त्योः ।
जपादिह स्युर्विजिताश्च सर्वे, कामादयो[8]ऽभीष्टफलागमश्च ॥४१२
भोगेन सर्वेष्वपि भौतिकेषु, सुखेषु जाते सुदृढं विरागे ।
स्याद् भक्तियोगोदय[9]इष्टलाभाभिलाषतो मन्त्रतनौ प्रवेशः ॥४१३

५. मते । ६. विनिविश्य । ७. निर्यन् । ८. कामक्रोधादयो । ९. योगः ।



मन्त्रार्थतत्त्वप्रविवेकशक्तिः, कामादिवृत्तेः सुतरां जयश्च ।
ततः स्वतः सत्त्वगुणस्य वृद्धौ, रजस्तमोवृत्तिपराभवश्च ॥४१४॥
निर्यंस्ततो विज्जलिकाख्यनाड्या, विश्वां श्रयेद् दक्षिणपूर्वमार्गम् ।
ततश्च गत्वा पुनरग्रतः स्वाधिष्ठानचक्रं प्रविशेत् सुयोगी ॥४१५॥
चक्रं तदेतन्मणिपूरकस्वाधिष्ठानयोर्मध्यगतं सकोणम् ।
अधोमुखं पद्ममिति प्रसिद्धं, स्थानं तदेतन्मणिपूरकस्य ॥४१६॥
आग्नेयमाम्नायमिमं वदन्ति, स्यादत्र भक्त्या सह कर्मयोगः ।
दग्धं भवेदत्र जपात् समग्रं, नरस्य पूर्वार्जित-कर्मजालम् ॥४१७॥
ततश्च जीवो भवति स्वभावाच्छुद्धश्च बुद्धश्च स नित्यमुक्तः[1] ।
ऐश्वर्यरक्षा भवति प्रकामं, मातोन्मुखी वृत्तिदमश्च तत्र ॥४१८॥
शनैरिदन्ताप्रशमोऽत्र दृष्टोऽहम्भावशान्तिश्च सहैव दृष्टा[2] ।
सिद्ध्यर्थिनां साधनमार्गशुद्धिः, समागमोऽलौकिकपूरुषैश्च ॥४१९॥
ततश्च सूत्राभिधयाऽन्यनाड्या, निर्गत्य नाडीममृतां निविश्य ।
तयोत्तराम्नायविशुद्धिचक्रमीशानकोणं प्रविशन्नुपेयात् ॥४२०॥
ईशानमाम्नायमितीर्यते स्वाष्ठिानसम्बद्ध[3] विशुद्धिचक्रम् ।
अधोमुखं पद्ममुशन्ति च स्वाधिष्ठानचक्रस्य तदेतदार्याः ॥४२१॥
ज्ञानाधियोगस्य च मन्त्रयोगस्य चापि जायेत तदात्मताऽत्र ।
जपादिह स्यान्नर ऊर्ध्वरेताः, कामे दुरन्ते विजयश्च तस्य ।४२२।
अल्पज्ञतां [4]स्वात्मगतां व्युदस्य, त्रिशक्तयः स्वात्मगता हि तस्य ।
ओजस्वितामेत्य च दिव्यभावो, जीवोऽधि[5]गच्छेत् परमात्मनैक्यम् ॥
ओजस्विता दैवतभावयोग, एकात्मता स्वात्मपरात्मनोश्च ।
एकात्मभावः परमात्मना यः, सोऽस्यावभासेत हृदीशदेवः ।४२४।
यथोपलब्धस्मृतिमात्रतोऽपि, परस्य च स्वस्य च रुङ्निवृत्तिः ।
ततो विनिर्गत्य सरस्वतीतो, वृन्दां श्रितोऽनाहतचक्रमीयात् ।४२५।

१. सदैव मुक्तः २. सह प्रविष्टः ३. संयुक्त ४. जीवगतां, ५. सशिवाशिवस्य (देवतात्मा जीवरूपो वा) ।

प्रतीच्युदीचीद्वयमध्यकोणं,  निर्याति वृन्देति विदां प्रवादः ।
विशुद्धिसंयुक्तमनाहतं यद्, वायव्यकोणस्य निदेशकं तत् ।४२६।
अधोमुखं पद्ममिदं प्रसिद्धं,  विशुद्धिचक्रस्य न चान्यदेतत् ।
ज्ञानाधियोगस्य च कर्मयोगस्य चात्र जायेत तदात्मभावः ।४२७।
सम्यक् जपाच्चिन्तनतोऽपि चात्र, श्रीप्राप्तिरुक्ता किल साधकस्य[1]
स्वोपासकानामभिलाषपूर्तौ, कल्पद्रुवत् स्यात् स तदा[2] समर्थः ॥
स्याज्ज्ञानविज्ञानसमृद्धिरत्र[3]  यथोपलब्ध-प्रतिपादनं  च ।
ततः सुषुम्नास्थितब्रह्मनाड्या[4] , यायाच्च योगी ललनाख्यचक्रम् ॥
तदा ह्युपाम्नायचतुष्टयस्य, समन्वयात् कल्पितमेकपद्मम्[5] ।
अत्र प्रवेशात् सहजां दशां स्वां, जीवः समेतीशकृपावशेन ।४३०।
नैर्ऋत्यमैश्वर्यसुखं समग्रमाग्नेयमारोग्यसुखाद्यचिन्त्यम् ।
ईशानजाचिन्त्यफलादिकं च,  वायव्यजज्ञान-सकर्मयोगः ।४३१।
सर्वं तदेतल्ललनाख्यचक्रे, दृढीभवत्याशु सुयोगभाजाम् ।
आज्ञोपरिस्थं ललनात[6]उद्यन्, मनः स्वचक्रं स्फुरदूर्ध्वचक्रम् ।४३२
उपास्यमानं परतः क्रमेण, जीवं शिवं तद् विदधाति नूनम् ।
सम्प्राप्यतेऽस्मादणिमादिकाद्याः, सिद्धीश्च सर्वा निखिलाश्च शक्तीः।
ततः[7]समर्चा त्रिपुराम्बिकायाः,  प्रारभ्यते तत्र यथाक्रमेण ।
बिन्द्वर्धचन्द्रावथ रोधिनीं च, नादं च नादान्तमथापि शक्तिम् ।४३४।
तां व्यापिकाख्यां समनोन्मने च, प्राप्य त्रिकं जायत एकरूपम् ।
अहं गुरुः[8]सा त्रिपुरेति कश्चिन्न साधकस्यात्र विभाति भेदः[9] ।४३५
आज्ञां प्रविष्टस्य ततश्च[10]भूयो, न साधकस्यानुविधेयमस्ति ।
यास्तस्य बाह्यान्तरसाधनास्ताः, प्रवर्तिताः स्युः स्वत एव सर्वाः ॥

१. ऽखिल०  २. सततं०  ३. विवृद्धि०  ४. स्थितयाद्यनाड्या  ५. चक्रम्०
६. समुद्यन्  ७. ततश्च पूजा ।
८. सोऽहं  ९. न साधकस्यस्यात्र विभाति कश्चित् सोऽहं गुरुःसा त्रिपुरेति भेदः
पाठा० ।  १०. समेत्य ।



चक्राणि षट् चोर्ध्वमुखानि नित्यं, चत्वारि चाप्येवमधोमुखानि ।
चिन्त्यानि सम्यक् ललनायुतानि, यावन्न जायेत परानुभूतिः ।४३७।
ततः परं सैव परोर्ध्वचक्रेष्वथो भ्रमन्ती तनुते सुखानि ।
क्रमस्तदीयोऽपि विशिष्य बोध्यो, योग-प्रविष्टेन सुसाधकेन ।४३८।
समेति नाडी ललनाख्यचक्रात्, ततश्च शक्तौ परतश्च बिन्दौ ।
ततोऽर्धचन्द्रे च ततः प्रयाति, नादान्तमध्येऽतति रोधिनी च ।४३९।
सा व्यपिकायां व्रजति प्रकामं, ततोऽपि सेयात् समनाख्यचक्रे ।
गत्वोन्मनायां च ततस्ततः सा, संयाति नित्यं गुरुपद्ममध्ये ।४४०।
ततो महाबिन्दुमनुप्रविष्टा, स्वेष्टस्वरूपेण विराजमाना ।
तत्रैव जीवात्मपरात्मनोश्च, सम्पादयेत् सा किल सामरस्यम् ।४४१।
विसतन्तुतनीयसी  परा,  विदधात्येवमलं  गतागतम् ।
तदनुक्रमतश्च साधकोऽप्यनुचिन्त्यैति सुसिद्धिमीप्सिताम् ।४४२।
...  ...  ...  ...  ...  ।४४३।

सदाशिवोक्तानि सपाद-लक्षलयावधानानि हि सन्ति लोके ।
नादानुसन्धानसमाधिमेकं, मन्यामहे मान्यतमं लयानाम् ।४४४।
सरेचपूरैरनिलस्य कुम्भैः,  सर्वासु नाडीषु विशोधितासु ।
अनाहताख्यो बहुभिः प्रकारैरन्तः प्रवर्तेत सदा निनादः ।४४५।
नादानुसन्धान नमोस्तु तुभ्यं, त्वत्साधनं तत्त्वपदस्य जाने ।
भवत्प्रसादात् पवनेन साकं,  विलीयते विष्णुपदे मनो मे ।४४६।
जालन्धरोड्ड्याणसुमूलबन्धान्, जल्पन्ति कण्ठोदरपायुमूले ।
बन्धत्रयेऽस्मिन् परिचीयमाने,बन्धःकुतो दारुणकालपाशात् ।४४७।
ओड्ड्याणजालन्धरमूलबन्धैरुन्निद्रितायां सुरनायिकायाम् ।
प्रत्यङ्मुखात् सम्प्रविशन् सुषुम्नां,गमागमौ मुञ्चति गन्धवाहः।४४८
उत्थापिताधारहुताशनोत्थैराकुञ्चनैः  शश्वदपानवायोः ।
सन्तापिता चन्द्रमसं पतन्तीं,  पीयूषधारां पिबतीह धन्यः ।४४९।

बन्धत्रयाभ्यासविपाकजातां, विवर्जिता रेचकपूरकाभ्याम् ।
विशोषयन्ती विषमप्रवाहं, विद्यां भजे केवलकुम्भरूपाम् ।४५०।
अनाहते चेतनसावधानैरभ्यासशूरैरनुभूयमाना ।
संस्तम्भितश्वासमनःप्रचारा, सा जृम्भते केवलकुम्भकश्रीः ।४५१।।
सहस्रशः सन्तु हठेषु कुम्भः, सम्मान्यते केवलकुम्भ एव ।
कुम्भोत्तमे यत्र तु रेचपूरौ, प्राणोऽस्य न प्राकृतवैकृताख्यौ ।।४५२।।
त्रिकूटनाम्नि स्तिमितेऽन्तरङ्गे, खेऽस्तं गते केवलकुम्भकेन ।
प्राणार्पितौ भानुशशाङ्कनाड्यौ, विहाय सद्यो विलयं प्रयातः ।।४५३
प्रत्याहृता केवलकुम्भकेन, प्रबुद्धकुण्डल्युपभुक्तशेषः ।
प्राणः प्रतीचीनपथेन मन्दं, विलीयते विष्णुपदान्तराले ।।४५४।।
निरङ्कुशानां श्वसनोद्भवानां, निरोधनैः केवलकुम्भकाख्यैः ।
उदेति सर्वेन्द्रियवृत्तिशून्यो, मरुल्लयः कोऽपि महामतीनाम् ।।४५५।।
न दृष्टिलक्ष्याणि न चित्रबन्धो, न देशकालौ न च वायुरोधः ।
न धारणाध्यानपरिश्रमो वा, समेधमाने सति राजयोगे ।।४५६।।
अशेषदृश्योज्झितहृद्द्वयानामवस्थितानामिह राजयोगे ।
न जागरो नापि सुषप्तिभावो, न जीवितं नो मरणं विचित्रम् ४५७
अहंममत्वाद्यपहाय सर्वं, श्रीराजयोगे स्थिरमानसानाम् ।
न द्रष्टृता नास्ति च दृश्यभावः, सा जृम्भते केवलसंविदेव ।।४५८।।
नेत्रे यथोन्मेषनिमेषशून्ये, वायुर्यथा वर्जितरेचपूरः ।
मनश्च सङ्कल्पविकल्पशून्यं, मनोन्मनी सा मयि संनिधत्ताम्।।४५९।
चित्तेन्द्रियाणां चिरनिग्रहेण, श्वासप्रचारे शममेति तेषाम् ।
निर्वाणदीपा इव निश्चलाङ्गा, मनोन्मनीमग्नधियो भवन्ति ।।४६०
उन्मन्यवस्थाधिगमाय विद्वन्नुपायमेकं तव निर्दिशामः ।
पश्यन्नुदासीनतया प्रपञ्चं, सङ्कल्पमुन्मूलय सावधानः ।।४६१।।
प्रसह्य सङ्कल्पपरम्पराणां, सम्भेदने सन्ततसावधानम् ।
आलम्बनाशाय प्रचीगमानं, शनैः शनैः शान्तिमुपैति चेतः ।४६२।



निःश्वासलोपैर्निभृतैः शरीरैर्नेत्राम्बुजैरर्धनिमीलितैश्च ।
आविर्भवन्तीममनस्कमुद्रामालोकयामो मुनिपुङ्गवानाम् ।।४६३।।
अमी यतीन्द्राः सहजाऽमनस्कादहंममत्वे शिथिलायमाने ।
मनोऽतिगं मारुतवृत्तिशून्यं, गच्छन्ति भावं गगनावशेषम् ।।४६४।।
निवर्तयन्तीं निखिलेन्द्रियाणि, प्रवर्तयन्तीं परमात्मयोगम् ।
संविन्मयीं तां सहजाऽमनस्कां, कदा गमिष्यामि गतान्यभावः।।४६५
प्रत्यग्विमर्शातिशयेन पुंसां, प्राचीनगन्धेषु पलायितेषु ।
प्रादुर्भवेत् काचिदजाड्यनिद्रा, प्रपञ्चचिन्तां परिवर्जयन्ती ।।४६६।।
विच्छिन्नसङ्कल्पविकल्पमूले, निःशेषनिर्मूलितकर्मजाले ।
निरन्तराभ्यासनितान्तभद्रा, सा जृम्भते योगिनि योगनिद्रा ।।४६७।
विश्रान्तिमासाद्यतुरीयतल्पे, विश्वाद्यवस्थात्रितयोपरिस्थे ।
संविन्मयीं कामपि सर्वकालं, निद्रां सखे निर्विश निर्विकल्पाम् ।।४६८
प्रकाशमाने परमात्मभानौ, नश्यत्यविद्यातिमिरे समस्ते ।
अहो बुधा निर्मलदृष्टयोऽपि, किञ्चिन्न पश्यन्ति जगत्समग्रम् ।।४६९

सिद्धिं तथाविधमनोविलये समाधौ,
श्रीशैलशृङ्गकुहरेषु कदोपलक्ष्ये ।
गात्रं यदा मम लताःपरिवेष्टयन्त्यः,
कर्णे यदा विरचयन्ति खगाश्च नीडान् ।।४७०।।

(इतोऽग्रे केचन श्लोका अपठिताः सन्ति । अतस्तेषां गणनाऽत्र न विहिता ।)

विचरतु मतिरेषा निर्विकल्पे समाधौ,
कुचकलशयुगाढ्येकृष्णसारेक्षणानाम् ।
चतुरजडमते वा सज्जनानां मते वा,
मतिकृतगुणदोषा मां विभुं न स्पृशन्ति ।।४७१।।

४१. मणिपूरचक्रम् —

चक्राग्रगण्ये मणिपूरचक्रे, भवन्ति चत्वारि दलानि पूर्वे ।
दलानि चत्वारि तु पश्चिमे वा उदीच्यवाच्योर्दलमेकमेकम् ।।४७२।

धूलिध्वजो नाम फवर्णयुक्तस्थवर्णकश्चाक्षलिनामवायुः ।
दवर्णसंज्ञश्च प्रकम्पनोऽयं, धवर्णनामास्ति समानवायुः ॥४७३॥
पवर्णयुक्तो हि नभःस्थवायुस्तथा णवर्णो मृगवाहनश्च ।
खलूद्वहोऽयं हि नवर्णनामा, डवर्णयुक्तोऽस्ति च कम्पलक्ष्मा ॥४७४
वासो हि नामास्ति ढवर्णयुक्तस्तवर्णवान् वाति प्रसिद्धनामा ।
गतिं प्रकुर्वन्ति यथालवाले, प्रचालयन्तो मणिपूरचक्रम् ॥४७५॥

४२. मूलाधारचक्रम् —

कन्दर्पवायुर्वहति स्वयम्भूलिङ्गस्य वै नित्यमधोविभागे ।
समन्ततस्तिष्ठति प्राणरूपः, स मूलचक्रस्य गतिं विधत्ते ॥४७६॥
मूलस्थितः कोऽपि समीरनामा, ववर्णयुक्तो वहति प्रकामम् ।
सदाग्निकोणस्थित एष वायुः, प्रचालयंस्तिष्ठति प्राणमूलम् ॥४७७
शवर्णयुक् चैह्यजगद्धि नामा, नैर्ऋत्यकोणे स्थितिमाबबन्ध ।
प्राणाः प्रकुर्वन्ति नु जन्ममृत्यू प्रवाति वायुः श्वसनात्मकोऽयम्॥४७८
प्रकम्पनो नाम षवर्णयुक्तः, सर्वात्मना तिष्ठति वायुकोणे ।
इडा सुषुम्ना खलु पिङ्गला च, त्रयः स्वरा यासु चलन्ति नित्यम् ॥
ईशानकोणस्थित आवकोऽसौ, स वर्णयुक्तः प्रगतिं दधानः ।
विभिन्नकोणेषु विराजितास्ते, मूलस्वरूपं प्रविचालयन्ति ॥४८०॥

४३. आज्ञाचक्रम् —

चक्रं ह्यथाज्ञा कथितं मुनीन्द्रैः, प्रवर्तयत्येष समस्तचक्रम् ।
निःश्वासिनी नाम हवर्णसंज्ञः, क्षवर्णयुक्तोऽस्ति महाबलोऽयम् ॥[1]

---

**मनश्चक्राणि—**

मनश्चक्राणि त्रीणि सन्ति । यथा १–आज्ञाचक्रस्योपरि, २-हृत्पद्मस्य दक्षभागे कुक्षौ तथा ३–गुरुपद्मस्य दक्षभागे । एतेषु द्वे अष्टदलरूपे तृतीयं च द्वादशदलात्मकम् । आज्ञाचक्रस्य मनश्चक्रे १–मनुवह, २–शब्दवह, ३–स्पर्शवह ४–रूपवह । ५–रसवह । ६–गन्धवह । ७–स्वप्नवह-सार्थक । ८–स्वप्नवहनिरर्थकनामकान्यष्टौ दलानि भवन्ति ।

**सप्तकोषाः—**

१–इन्दु, २–बोधनि, ३-नाद, ४-अर्द्धचन्द्र, ५–महानाद, ६–काल, ७–उन्मनी-संज्ञकाः सन्ति । इतोऽधिकं गुरुगम्यम् ।



४४. विशुद्धचक्रम् —

विशुद्धचक्रं नृशरीरचक्रे, शुभ्रं सदा षोडशवायुयुक्तम् ।
नभःस्वरप्राणपरावहश्च, विहङ्गवायुर्वहतीह शश्वत् ।४८२।
अवर्णयुक्तोऽस्ति विहङ्गनामा, आ-वर्णवानस्ति नभः स्वरश्च ।
इ-वर्णवान् प्राणविशिष्टनामा, ई-वर्णसंज्ञो हि परावहश्च ।४८३।
उवर्णसंज्ञो ह्यजगत्प्रसिद्ध, ऊवर्णनामा पवमान एषः ।
ख्यातो नभःप्राण ऋवर्णसंज्ञ, ॠवर्णवानस्ति हरिः प्रसिद्धः ।४८४।
लृवर्णकः सार इति प्रसिद्धस्तनुलॄवर्णः खलु सर्वव्यापी ।
एकारवानस्ति इडा प्रसिद्धा, ऐकारसंज्ञो हि सदागतिश्च ।४८५॥
ओकारवान् पृषदश्वः स्मृतोऽयं, औकारवर्णः खलु गन्धवाहः ।
अं वर्णयुक्तोऽस्ति च वाह-नामा, अः वर्णयुक्तोऽस्ति नु भौगिकान्तः।।

४५. स्वाधिष्ठानचक्रम् —

चक्रं ह्यधिष्ठानमथ प्रसिद्धं, बवर्णवाँश्चञ्चलवायुरेषः ।
वृषाम्पतिर्दक्षिणदिग्विभागे, स्थितः समाश्रित्य भवर्णयुक्तः ।४८७।
मसंज्ञकश्चैष ह्यपानवायुर्नैर्ऋत्यकोणे स्थितिमाबबन्ध ।
यवर्णकोऽयं विवहात्मकश्च, प्रभञ्जनो वाति सदा प्रतीच्याम् ॥
र-नामधेयः खलु वातसंज्ञो, वायुः सदा वाति हि चोत्तरस्याम् ।
प्रभञ्जनो नाम लसंज्ञकश्च, प्राच्यां स्थितो वाति शरीरभागे ॥

४६. अनाहतचक्रम् —

अनाहतं चक्रमिदं शरीरे, ख्यातं परं द्वादशवायुयुक्तम् ।
ईशानकोणे स्थिरतां विधत्ते, नैर्ऋत्यवायव्यधनञ्जयेषु ॥४९०॥
उदाननामास्ति जवर्णयुक्तो, व्यानः प्रसिद्धो हि कवर्णसंज्ञः ।
गवर्णनामाऽऽशुगमः स्मृतोऽयं, निःश्वासनामास्ति छवर्णयुक्तः ॥
ङवर्णसंज्ञः पवनः प्रसिद्धो, गान्धारिनामा कथितो झवर्णः ।
स्वश्वासवायुर्हि टवर्णयुक्तः, खवर्णसंज्ञः कथितो ह्युदानः ॥

घवर्णवान् वै मरुतो ञवर्णः, समीरणोऽयं हि जगत्प्रसिद्धः ।
फणिप्रियानाम चवर्णयुक्तः, सुखासनामास्ति ठवर्णसंज्ञः ।४६३।

४७. चक्रनामानि —

अथ चक्राणि वक्ष्यन्ते, स्थितिर्येषां शरीरगा ।
अधःसहस्रारं पूर्वं, मूलाधारं ततः परम् ॥४६४॥
स्वाधिष्ठानं तदग्रे तु, ततस्तु मणिपूरकम् ।
स्वस्तिकं चैवानाहतं, विशुद्धं चैव लम्बिका ॥४६५॥
आज्ञाचक्रमिति प्रोक्तान्यूर्ध्ववक्त्राणि वर्ष्मणि ।
स्वाधिष्ठानं मणिपूरमनाहतमथापि वा ॥४६६॥
विशुद्धं चेति चक्राणि, सन्त्यधोमुखगानि हि ।
एवं द्वादश चक्राणि, कालीकल्पे भवन्ति वै ॥४६७॥
आज्ञाचक्रं विभक्तं स्यात्, कल्पयोरुभयोरपि ।
तेषां नामानि वर्ण्यन्ते, योगतन्त्रानुसारतः ॥४६८॥
आज्ञाचक्रं मन[1]श्चक्रं, सप्तकोशाख्यमेव च ।
बिन्दुः कला रोधिनी च, नादो नादान्त एव च ॥४६६॥
शक्तिश्च व्यापिका चैव, समनाग्रे तथैव हि ।
गुरोः पद्मं ततोऽग्रे च, दलैर्द्वादशभिर्युतम् ॥५००॥
अधोमुखं मनश्चक्रं, पत्रैर्द्वादशभिर्युतम् ।
उन्मनी षोडशदलमधोवक्त्रं च नीरजम् ॥५०१॥
महाबिन्दुस्तदग्रे च चक्राण्येतानि सन्ति वै ।
एतान्यावृत्य लसति, सहस्रारमधोमुखम् ॥५०२॥
आज्ञाचक्रादूर्ध्वभाग, एकैकाङ्गुलकोपरि ।
प्रोक्ता षोडश चक्राणां, संस्थितिर्योगिसम्मता ॥५०३॥

---

१. अस्य स्पष्टताविषये सम्पादकीयं द्रष्टव्यम् ।



महाषोडशी चेयं तु, कूटैः षोडशभिर्युता ।
आम्नायक्रमतश्चैषां, ध्यानं कर्त्तव्यमेव हि ॥५०४॥
आधारनादसूत्रेण, ध्यायेद् वर्णमणीन् क्रमात् ।
अकुलं च महाबिन्दुश्चोन्मना समना तथा ॥५०५॥
व्यापिका शक्तिनादान्त-नादरोधार्धचन्द्रकाः ।
बिन्दुराज्ञा ततश्चैवं, लम्बिकाथ विशुद्धिका ॥५०६॥
अधोमुखविशुद्धिश्च, शुद्धिश्चानाहतं ततः ।
अधोमुखं मणीपूरं, मणिपूरमधोमुखम् ॥५०७॥
स्वाधिष्ठानं ततोऽधश्च, मूलाधारं तथैव च ।
विषुवं कुलसंज्ञं च, कुलत्थेति प्रकीर्तितम् ॥५०८॥

४८. चक्राणां मानव्यस्था —

अधश्चोर्ध्वं सुषुम्नायाः, सहस्रदलसंयुतम् ।
रक्तं श्वेतञ्च साहस्रं, दलं तच्छक्तिभिर्युतम् ॥५०६॥
ऊर्ध्वाऽधोमुखमीशानि, कर्णिकाकेसरान्वितम् ।
शक्तिरूपं महेशानि !, कुलाकुलमयं शुभम् ॥५१०॥
पङ्कजद्वयमीशानि, स्थितं शाश्वतमव्ययम् ।
शक्तिरूपं शिवाकारं, शर्वाण्याः सन्निजालयम्[1] ॥५११॥
तयोर्मध्ये सुषुम्नातस्त्रिदशाधारपङ्कजम् ।
तेषां रूपं क्रमञ्चैव, क्रमाद् वक्ष्येऽधुना शृणु ॥५१२॥
अधः पद्मं सहस्रारं, कर्णिकाकेसरान्वितम् ।
तैजसं रक्तवद्दीप्तं, तद्दलस्थितशक्तिभिः ॥५१३॥
प्रतिकिञ्जल्कसंस्थाभिः, शक्तिभिश्चावृतं प्रिये ।
कर्णिकामध्यतो देवि, कुलदेवी च संस्थिता ॥५१४॥

---

१. शिवशक्त्योः प्रकाशविमर्शरूपत्वात् तयोश्चाविनाभावरूपत्वेनैक्येऽपि शर्वाण्या आत्मतत्त्वेन विवक्षायां शिवाकारत्वव्यपदेशः, शिवाधारिका शक्तिरिति प्रसिद्धेः ।

तत्पद्मोर्ध्वं सुषुम्नायां, मध्ये त्वेकाङ्गुलोपरि ।
पद्ममष्टदलैर्युक्तमष्टग्रन्थिसमन्वितम् ॥५१५॥
रक्तं सुकर्णिकोपेतं, रक्तकिञ्जल्कशोभितम् ।
ग्रन्थ्यग्रस्थत्रिशृङ्गे च, ब्रह्माण्याद्यष्टभैरवैः ॥५१६॥
अष्टपद्मस्थितग्रन्थिस्थितवर्णोक्तशक्तिभिः ।
तदन्यशक्तिभिश्चैव, सङ्गताभिः समावृतम् ॥५१७॥
तन्मध्ये कौलशक्त्या च, सेवितं संस्मरेत् ततः ।
एकाङ्गुलिप्रमाणोर्ध्वं, षड्दलं कुलपङ्कजम् ॥५१८॥
गुदमेढ्रान्तरे देवि, पञ्चाङ्गुलसमुच्छ्रितम् ।
गुदमेकाङ्गुलं मध्ये, चाङ्गुलद्वयविस्तृतम् ॥५१९॥
तस्य मूले महायोनिस्त्रिकोणाकाररूपिणी ।
सुषुम्नायोनिमध्यस्था, तस्य मूले महेश्वरि ॥५२०॥
आधारपङ्कजं पीतं, चतुष्पत्रं सकेसरम् ।
अधोमुखं च तन्मध्ये, कुण्डली परमेश्वरी ॥५२१॥
तयोर्मध्ये सुषुम्नान्तस्त्रिदशाधारपङ्कजम् ।
तेषां रूपं क्रमञ्चैव, क्रमाद् वक्ष्येऽधुना शृणु ॥५२२॥
मर्माण्यङ्गुष्ठगुल्फाङ्घ्रिपृष्ठजङ्घाख्यजानुषु[1] ।
ऊरुसीवनिकामुष्कमेढ्रनाभिषु पार्श्वयोः ॥५२३॥
हृदयस्तनकण्ठांसककारीकर्णमूर्द्धसु ।
शङ्खयोः पल्लनासादिमध्यान्तस्य कपोलतः ॥५२४॥
अष्टत्रिंशदिति प्रोक्तान्येषु वायोस्तु धारणात् ।
परकायप्रवेशश्च, स्वेच्छोत्क्रान्तिश्च सिद्ध्यति ॥५२५॥
स्वयं भ्रूमध्यगा चिन्त्या, वराभीतिसमन्विता ।
पार्थिवं पङ्कजं बाह्ये, तस्याधः पङ्कजं परम् ॥५२६॥

---

१. अत्र सप्तम्यन्तपाठे मर्मत्वव्यवहार इत्यर्थः ।



तैजसं परमेशानि, तन्मध्यस्थितशक्तयः ।
निष्कलाः परमेशानि, विद्युत्पुञ्जनिभाः स्मरेत् ॥५२७॥
तदूर्ध्वं कर्णिकामध्ये, वह्निबिम्बं तदूर्ध्वगम् ।
पूर्णपीठञ्च तस्योर्ध्वं, शाकिनी संस्थिता प्रिये ॥५२८॥
आधारपङ्कजस्योर्ध्वं, सार्द्धद्वयङ्गुलकोपरि ।
तैजसं साष्टपत्रं च, पीतकर्णिकया युतम् ॥५२९॥
हृल्लेखाकर्णिकामध्ये, स्थिताऽनङ्गादिसेविता ।
एतस्माद् द्वयगुलादूर्ध्वं, स्वाधिष्ठानं षडस्रकम् ॥५३०॥
अधोमुखानि चक्राणि, मिश्रणाच्च तथा द्वयोः ।
भवन्ति तेषां नामानि, व्यवस्थां च प्रदर्शये ॥५३१॥
अधोमुखस्य पद्मस्य, कर्णिकावर्तनं भवेत् ।
अधोमुखे त्वधिष्ठाने, सम्प्रोक्ताश्चक्रवेदिभिः ॥५३२॥

४९. मूलाधारचक्रं तद्वर्णास्तथा वायवः —

ववर्णवान् संवहोऽयं, स्वयम्भूलिङ्गनामकः ।
ह्यधोमुखो हि वहति, चाग्निकोणस्थितः सदा ॥५३३॥
सदा नैर्ऋत्यकोणस्थः, शयुक्तो ह्यजगन्मतः ।
जन्ममृत्यू प्रवर्तेते, यत्प्रभावेण जन्मिनाम् ॥५३४॥
सावित्रीपरनामायं, वायुरस्ति प्रकम्पनः ।
सावित्र्या ह्यनया सत्यं, प्रचलन्ति स्वरास्त्रयः ॥५३५॥
षकाराक्षरसंयुक्ता, सुषुम्ना-पिङ्गले इडा ।
सकार – वर्णसंयुक्तो, वायुरावकनामकः ॥
सुप्रसिद्धोऽस्ति हीशानकोणस्थानकृतालयः ॥५३६॥
स्वाधिष्ठानगताश्चैवं, त्रयो वर्णाः समीरिताः ।
विशुद्धस्याष्टवर्णाः स्युरेवमेकादश स्थिताः ॥५३७॥
अष्टौ वर्णाः प्रलुप्ताश्च, विशुद्धस्य भवन्ति हि ।

म य र ओ औ अं अः अ आ इ ई च सुवर्णकाः ।
व भ ल उ ऊ ऋ ॠ ऌ ॡ ए ऐ च सुवर्णकाः ।।
वर्णा एकादश ध्येया, ईशाने मण्डले सदा ।
तत्र चाबधिपो विष्णुस्त्रिपुरा मञ्चदेवता ।।५३८।।
स्वाधिष्ठानमधःपद्मं, महाकाल्या युतं मतम् ।
अप्सु च बन्धिनीशक्ति, पूर्वाभिः शक्तिभिर्वृताम् ।।५३९।।
काकिनीमभिचिन्त्याथ, नाभावष्टाङ्गुलोपरि ।
मणिपूरं दशदलञ्चाधःपद्माष्टकं तथा ।।५४०।।
अधोमुखे मणिपूरे, प्रोक्तास्तु तत्त्वदर्शिभिः ।
स्वाधिष्ठानस्य वर्णाः स्युस्त्रयो हि मणिपूरगाः ।।५४१।।
पञ्चवर्णाः समाख्याता, एवमष्टौ भवन्ति ते ।
भ ब ल त थ द ध ना, वर्णाश्चैव सुवर्णकाः ।
ड ढ ण म य र प फा, वर्णाश्चैव सुवर्णकाः ।।५४२।।
एवमष्टौ चिन्तनीया, वर्णाश्चाग्नेयमण्डले ।
तत्र तेजःपती रुद्रस्त्रिपुरा मञ्चदेवता ।।५४३।।
महालक्ष्म्या युतं ध्येयं, मणिपूरमधोमुखम् ।
मणिपूरमूर्ध्वमुखं, दशपत्रं सुशोभनम् ।।५४४।।

५०. अधोमुखस्वाधिष्ठानचक्रं वर्णास्तथा वायवः —[1]

ब-वर्णश्चञ्चलः प्रोक्तो, भ-वर्णः पृषताम्पतिः ।
उवर्णो हि जगत्प्राण, ऊवर्णः पवमानकः ।।५४५।।
ऋवर्णश्च नभःप्राण, ॠ-वर्णो हरिनामकः ।
ऌवर्णश्च स्मृतः सारो, ॡ वर्णस्तनुव्यापकः ।।५४६।।

[1]—चक्राणां मानव्यवस्थायां मूलतः प्रसिद्धानां षट्चक्राणां तथा चतुर्णामधोमुख-चक्राणां वर्णनं विवरणं चात्र प्रस्तुतमस्ति । एतेषु चक्रेषु प्रत्येकं दलस्य भिन्न-भिन्ना वर्णाः सन्ति तैर्वर्णैः सम्बद्धस्य प्रत्येकं प्रकारस्य भिन्न-भिन्नानां वायूनां पृथक्-पृथग् नामानि, स्थितयः स्थानानि च विद्यन्ते । एतत्सम्बद्धं ज्ञातव्यमत्र प्रस्तूयते ।



इला एवर्णसंयुक्तश्चैवर्णो हि सदागतिः ।
प्रभञ्जनो लवर्णो हि, भेदाश्चैकादश स्मृताः ।।५४७।।

५१. स्वाधिष्ठानचक्रं वर्णास्तथा वायवः—

बवर्णश्चञ्चलो वायुश्चाग्निकोणस्थितः सदा ।
याम्ये भवर्णयुक्तश्च, स्थितोयं पृषताम्पतिः ।।५४८।।
ह्यपानोऽयं हि नैर्ऋत्ये, स्थितो नित्यं मवर्णवान् ।
यवर्णयुक्तो विवहः, पश्चिमायां सदा स्थितः ।।५४९।।
र-वर्णवान् वाति वायुर्वातिनामा सदोत्तरे ।
लवर्णयुक्तः पूर्वस्यां, स्थितो वायुः प्रभञ्जनः ।।५५०।।

५२. अधोमुखमणिपूरचक्रं वर्णास्तथा वायवः —

डवर्णः कम्पलक्ष्मा हि ढवर्णो वाद्यसंज्ञकः ।
यवर्णो विवहः प्रोक्तो, णवर्णो मृगवाहनः ।।५५१।।
लाकिनीमध्यगं तच्च, डामर्यादिभिरावृतम् ।
चतुर्दशाङ्गुलाद्बध्वेऽनाहताख्यं च पङ्कजम् ।।५५२।।
अनाहतं चोर्ध्वमुखं, दलैर्द्वादशभिर्युतम् ।
अधोमुखेऽनाहताख्ये, वर्णाः प्रोक्ता महर्षिभिः ।।५५३।।
पञ्चार्णा मणिपूरस्यानाहतस्थास्तु षट् तथा ।
संयोजने तु ते जाता, एवमेकादशार्णकाः ।।५५४।।
ड ढ ण घ ङ च छ ज झ ञश्चैव पफौ तथा ।
क ख ग च छ ज झ ञश्चैव तथा ।
चक्रे सदा चिन्तनीया, नैर्ऋत्येऽत्र भवन्ति हि ।।५५५।।
वाय्वधिपतिस्तत्र ईश्वरो मञ्चदेवता ।
अधोमुखस्य, च मणेश्चामुण्डा देवता मता ।।५५६।।
तदूर्ध्वं स्वस्तिकं चक्रे, दलाष्टकविभूषितम् ।
अ क च ट त प य शा, वर्णाः कर्णिकायां शुभाः ।।५५७।।

तन्मध्ये प्रेतबीजं च, सर्वदैव प्रकाशते ।
नैर्ऋत्यकोणचक्रेऽपि, स्वस्तिकं मन्यते बुधैः ।।५५८।।
अनाहतं चोर्ध्वमुखं, दलैर्द्वादशभिर्युतम् ।
राकिनीमध्यगं, तच्च, द्वादशारमनाहतम् ।।५५६।।
मवर्णवानपानश्च, र-वर्णो वातसंज्ञकः ।
धूलिध्वजः फवर्णश्च, पवर्णो हि नभःस्थगः ।।५६०।।
डवर्णः कम्पलक्ष्मा हि, ढवर्णो वाद्यसंज्ञकः ।
यवर्णो विवहः प्रोक्तो, णवर्णो मृगवाहनः ।।५६१।।

५३. मणिपूरचक्रं वर्णास्तथा वायवः —

दक्षिणोत्तरयोरेकं, पूर्वे चत्वारि पश्चिमे ।
दलानि दश चक्रेऽस्मिन्, प्रवदन्ति हि योगिनः ।।५६२।।
वातिस्तवर्णयुक्तोऽयमक्षतिर्हि थवर्णवान् ।
उद्वहो हि नवर्णः स्याद्, दवर्णश्च प्रकम्पनः ।।५६३।।
धवर्णवान् समानोऽयं, मवर्णो मृगवाहनः ।
कम्पलक्ष्मा डवर्णश्च नभःस्थानः पवर्णवान् ।।५६४।।
धूलिध्वजः फवर्णोऽयं, ढवर्णो वास उच्यते ।
इत्थं हि मणिपूरस्य, विश्रुतानि दलानि वै ।।५६५।।

५४. अधोमुखमनाहतचक्रं, वर्णास्तथा वायवः —

कवर्णवान् स्मृतो व्यानो, ह्युदानश्च खवर्णकः ।
गवर्णश्चाशुगः प्रोक्तो, घश्वासो हि टवर्णवान् ।।५६६।।
सुखासोऽयं ठवर्णो हि, ञवर्णश्च समीरणः ।
यवर्णश्चाक्षतिः प्रोक्तस्तवर्णो वातिसंज्ञकः ।।५६७।।
समानोऽयं धवर्णः स्याद्, दवर्णश्च प्रकम्पनः ।
नवर्णश्चोद्वहः प्रोक्तो, भेदाश्चैकादश स्मृताः ।।५६८।।
पत्रस्थकालरात्र्यादिशक्तिभिश्च समावृतम् ।
मध्यस्थसूर्यबिम्बे तु, नादोड्ड्यानाख्य-पीठकम् ।।५६६।।



तस्मादेकाङ्गुलादूर्ध्वं, विशुद्धाख्यमधोमुखम् ।
अस्मिन्ननाहतस्योक्ता, वर्णाः शिष्टाः षडेव हि ।।५७०।।
विशुद्धस्याष्ट-मिलिताश्चत्वारो दश एव च ।
उ ऊ ऋ ॠ ऌ ॡ ए ऐ ठ ट क ख ग घास्तथा ।
अ आ इ ई घ ङ च छ ज झ ओ औ अं अस्तथा ।।५७१।।
·········श्चैवेति विज्ञेया, अधोमुखविशुद्धके ।
चतुर्दशैवात्र चिन्त्या, वर्णा वायव्यकोणके ।।५७२।।
पृथिव्यधिपतिस्तत्र, ब्रह्मा वै मञ्चदेवता ।
महासरस्वती ध्येया, चक्रेऽस्मिन् साधकैः सदा ।।५७३।।
कण्ठदेशे विशुद्धन्तु, दलैः षोडशभिर्युतम् ।
मध्यगा डाकिनी बाह्यपत्रेषु परमेश्वरी ।।५७४।।
अमृताद्यक्षरान्तस्था, चन्द्रबिम्बं तदूर्ध्वतः ।
आकाशश्च विशुद्धाख्ये, चक्रे वायुरनाहते ।।५७५।।
साधनायां क्रमश्चायं, स्वयं विपरिवर्तते ।
स्वाधिष्ठाने जलञ्चैव, मणिपूरे च पावकः ।।५७६।।
वयसो वृद्धिमायाते, स्वयं विपरिवर्त्तते ।
ये सुषुम्नास्पर्शवन्त, ऊर्ध्वाधोमध्यवर्तिनः ।।५७७।।
द्वयोश्चक्रयोर्वर्णाः स्युर्यावत् संख्यान्विता इह ।
तेषामर्धाः सदा चिन्त्याः, क्रमो ह्येष सुनिश्चितः ।।५७८।।
यथा विशुद्धानाहतयोर्वर्णयोगोऽष्टविंशतिः ।
चतुर्दश तदर्द्धाः स्युर्वायव्ये मण्डले ततः ।।
एतेनैव क्रमेणात्र, चक्रेष्वन्येष्वपि स्थिताः ।।५७६।।
बाह्योदीच्याःपश्चिमायास्तथान्तर्यागो वायव्यस्य मध्ये प्रविष्टः
बाह्यः प्राच्या दक्षिणायास्तथान्तर्यागो नैर्ऋत्यस्य मध्ये
ऽथ बोध्यः ।।५८०।।

५५. अनाहतचक्रं वर्णास्तथा वायवः —

स्थिता नैर्ऋत्यवायव्यकोणे यस्य सुधासरित् ।
ईशाने कल्पवृक्षो हि, चाग्निकोणे जलस्थलम् ॥५८१॥
कवर्णवानयं व्यानो, ह्युदानश्च खवर्णकः ।
गवर्णश्चाशुगः प्रोक्तो, घवर्णोऽयं मरुत्स्मृतः ॥५८२॥
ङवर्णः पवनः प्रोक्तश्चवर्णस्तु फणिप्रियः ।
छवर्णयुक्तो निःश्वासो, ह्युदानो हि जवर्णवान् ॥५८३॥
झवर्णवान् हि गान्धारी, ञवर्णो हि समीरणः ।
टवर्णनामा खश्वासः, सुखासश्च ठवर्णकः ॥५८४॥
बाह्यो यागो दक्षिणायाश्च प्राच्याअन्तर्योगोवह्निकोणे प्रदिष्टः
बाह्यःप्राच्या उत्तरस्यास्तथान्तर्यागः प्रोक्तः शम्भुकोणे
सुधीभिः ॥५८५॥
सम्प्रदायप्रभेदाद् वा, गुरुनिर्दिष्टमार्गतः ।
लुप्तवर्णेषु भेदोऽपि, यत्र तत्र प्रजायते ॥५८६॥
वर्णाश्चिन्तनमायान्ति, तत्र कार्यो न संशयः ।
तस्मादष्टदलं पद्मं, रसिकादिभिरावृतम् ॥५८७॥
आज्ञाचक्रं द्विपत्राब्जं, हक्षद्विदलसंयुतम् ।
हंसवती क्षमापार्श्वद्वये मध्ये तु हाकिनी ॥५८८॥
ततो ललाटगं वृत्तं, बिन्द्वावरणमूर्ध्वतः ।
सूर्यकोटिप्रतीकाशमतिदीप्तं महद्गुणम् ॥५८९॥
तन्मध्ये दशकोटीनां, संख्ययोजन-पङ्कजम् ।
कण्ठोर्ध्वे परमेशानि, लम्बिका चतुरङ्गुले ॥५९०॥
चतुःषष्टिदले पद्मे, राजन्ते ह्यक्षरास्तथा ।
महाकाली महालक्ष्मीर्महापूर्वा सरस्वती ॥५९१॥
त्रिशक्तिचामुण्डा मध्ये, लम्बिकायां सुशोभिताः ।
त्रिषष्टिश्चतुःषष्टिर्वा, वर्णाः शम्भुमते मताः ॥५९२॥



५६. अधोमुखविशुद्धचक्रं वर्णास्तथा वायवः —

अवर्णो हि विहंगोऽयमावर्णश्च नभःस्वरः ।
इवर्णवान् स्मृतः प्राण, ईवर्णश्च परावहः ॥५९३॥
घवर्णश्च मरुत् प्रोक्तो, ङवर्णः पवनः स्मृतः ।
फणिप्रियश्चवर्णश्च, निःश्वासोऽयं छवर्णकः ॥५९४॥
जवर्णवानुदानश्च, गान्धारी हि झवर्णकः ।
औवर्णो गन्धवातः स्यादोवर्णश्च समीरणः ॥५९५॥
अंवर्णो वाहसंयुक्तो, भोगिकान्तो नु ह्यः स्मृतः ।
एवं विशुद्धचक्रस्य, प्रोक्ता वर्णाश्चतुर्दश ॥५९६॥

५७. विशुद्धचक्रं वर्णास्तथा वायवः —

अवर्णवान् विहंगो हि, चवर्णश्च नभःस्वरः ।
इवर्णः कथितः प्राण, ईवर्णो हि परावहः ॥५९७॥
उवर्णो ह्यजगत्प्राण, ऊनामा पवमानकः ।
ऋवर्णवान्नभःप्राण, ॠयुक्तो हरिरुच्यते ॥५९८॥
लृसारो लॄस्तनुव्यापी, इला एवर्णसंयुतः ।
ओवर्णः पृषदश्वः स्याद्, ऐयुक्तोऽयं सदागतिः ॥५९९॥
औवर्णो गन्धवाहोऽयं, अंयुक्तो वाह उच्यते ।
अःसंयुक्तो भोगिकान्तो, वायुः ख्यातः क्रमादिह ॥६००॥

५८. आज्ञाचक्रं वर्णास्तथावायवः —

श्वासिनीनामको वायुर्हवर्णेन हि संयुतः ।
महाबलो क्षवर्णश्च, ह्याज्ञाचक्रप्रचालकौ ॥६०१॥
प्राकृते संस्कृते वापि स्वयं प्रोक्ताः स्वयम्भुवा ।
अनुस्वारो विसर्गश्च क⌣पौ चापि पराश्रयौ ॥६०२॥
दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च ।
चतुर्णामेव चक्राणामैक्याद् यल्ललनाभिधम् ॥६०३॥
चक्रं सम्पद्यते तस्य, चतुःषष्टि-दलानि वै ।
भवन्ति मातृकास्तत्र, तावत्यः समुपासिताः ॥६०४॥

ताराया मातृका एव, वर्णरूपेण संस्थिताः ।
त्रिषष्टिवर्णा विख्याताः, सन्ति तत्र महौजसः ॥६०५॥
महाबिन्दुस्तथा पूर्णश्चतुःषष्ट्यङ्गको मतः ।
वियतोऽधिपतिस्तत्र, देवता तु सदाशिवः ॥६०६॥
तत्कर्णिकासमासीनः, शान्त्यतीतेश्वरः प्रभुः ।
पञ्चवक्त्रो दशभुजो, विद्युत्पुञ्जनिभाकृतिः ॥६०७॥
निवृत्तिश्च प्रतिष्ठा च, विद्याशान्तिरनुक्रमात् ।
परिवार्य स्थिताश्चैताः, शान्त्यतीतस्य सुन्दरि ॥६०८॥
वामभागे समासीनाः, शान्त्यतीता मनोन्मनी ।
पञ्चवक्त्रधराः सर्वा, दशबाह्विन्दुभूषणाः ॥६०९॥
बिन्दुतत्त्वं समाख्यातं, कोट्यबुर्दशतैर्वृतम् ।
सहस्रारं महापद्मं, सप्तभाग-विभाजितम् ॥६१०॥
भागाः सप्त समाम्नाता, मस्तिष्कस्य मनीषिभिः ।
एको भागस्तु सर्वेषां, निसर्गात् सक्रियो मतः ॥६११॥
अर्धमन्यस्य भागस्य, यत्नैर्भवति सक्रियम् ।
सुषुप्तमिव शिष्टं तु, भागान्तं सार्धपञ्चकम् ॥६१२॥
शक्तिपुञ्जं भवेज्जाग्रन्न विना तत्त्वसाधनम् ।
शाम्भवादिक्रमेणैवं, साधने सक्रियो भवेत् ॥६१३॥

५९. आधारचक्रस्य भुवनानि --

१- भुवनानि --

शार्वं हि भुवनं ख्यातं, व-वर्णस्य विशेषतः ।
गन्धतत्त्वञ्च सम्प्रोक्तं, तन्त्रशास्त्रविशारदैः ॥६१४॥
स्थाण्वादिभुवनान्यष्टौ, शवर्णस्य स्मृतानि वै ।
आकाशतत्त्वं सम्प्रोक्तं, तन्त्रशास्त्रविशारदैः ॥६१५॥
भीमादिभुवनान्यष्टौ, षवर्णस्य स्मृतानि वै ।
वायुतत्त्वं च सम्प्रोक्तं, तन्त्रशास्त्रविशारदैः ॥६१६॥



भैरवादिभुवनान्यष्टौ, स-वर्णस्य स्मृतानि वै ।
तेजस्तत्त्वञ्च सम्प्रोक्तं, तन्त्रशास्त्रविशारदैः ॥६१७॥

२. ध्यानफलम् —

वक्ता श्रेष्ठो मनुष्येषु, सर्वविद्याविशारदः ।
आरोग्यानन्दचित्तश्च, जायते काव्यकोविदः ॥६१८॥
चतुष्कोणं हि यन्त्रञ्च, स्थानं योनिः स्मृतं सदा ।
नामतत्त्वञ्च पृथिवी, हस्ती वै बीजवाहनः ॥६१९॥
देवो ब्रह्मा देवशक्तिर्डाकिनी रक्तवर्णकः ।
लोके चाधारचक्रस्य, भुवनानि स्मृतानि वै ॥६२०॥

६०. स्वाधिष्ठानचक्रस्य भुवनानि --

१. भुवनानि --

मित्रस्य भुवनं ख्यातं, ब-वर्णस्य विशेषतः ।
कश्यपं भुवनं प्रोक्तं, भ-वर्णस्य च सुन्दरम् ॥६२१॥
भीमं हि भुवनं ख्यातं, म-वर्णस्य विशेषतः ।
ईशानभुवनं प्रोक्तं, य-वर्णस्य मनोरमम् ॥६२२॥
भुवनं वै पाशुपतं, र-वर्णस्य मनोहरम् ।
भवस्य भुवनं ख्यातं, ल-वर्णस्य विशेषतः ॥६२३॥

२. ध्यानफलम् —

अहङ्कारविनाशश्च, श्रेष्ठो योगिषु जायते ।
निर्मोही गद्यपद्यानां, रचनासु प्रशिक्षितः ॥६२४॥
चन्द्राकारं हि यद्यन्त्रं, जलं तत्त्वं दलानि षट् ।
स्थानं मेढ्रञ्च सिन्दूरो, वर्णः शक्तिर्हि डाकिनी ॥६२५॥

६१. मणिपूरचक्रस्य भुवनानि –

१. भुवनानि –

स्थलेश--भुवनान्यष्टौ, ढ-वर्णश्च प्रकीर्तितः ।
चन्द्रस्य भुवनं चित्ते, श्रोत्रे दिग्भवनं तथा ॥६२६॥

सूर्यस्य भुवनं नेत्रे, तद्वायोर्भुवनं त्वचि ।
पृथिव्या भुवनं घ्राणे, जिह्वायां वरुणस्य च ॥६२७॥
तदग्नेर्भुवनं वाचि, चेन्द्रस्य भुवनं करे ।
तद्विष्णोर्भुवनं पादे, भुवनानि स्मृतानि वै ॥६२८॥

२. ध्यानफलम् –

संहारपालने शक्तश्चतुरो वचनेषु च ।
सरस्वती च जिह्वायां, सदा तस्य प्रनृत्यति ॥६२९॥
बीजस्य वाहनं मेषः, तत्त्वमग्निर्दलं दश ।
देवश्चेन्द्रो देवशक्तिर्लाकिनीनीलवर्णकः ॥६३०॥
यन्त्रं त्रिकोणं नाभिश्च, स्थानं प्रोक्तं मनीषिभिः ।
... ... ... ... ... ... ... ॥६३१॥

६२. अनाहतचक्रस्य भुवनानि —

१. भुवनानि –

तत्त्वं वायुर्देवशक्तिः, काकिनी वाहनं मृगः ।
दलं द्वादशसंज्ञञ्च, यन्त्रं षट्कोणनामकम् ॥६३२॥
स्थानञ्च हृदयं देवश्चेशानोऽरुणवर्णवान् ।
.......................................॥६३३॥

२. ध्यानफलम् —

वचनेषु समर्थश्च, सिद्धिरीशत्वभाग्भवेत् ।
योगीश्वरो ज्ञानवाँश्च, राज्यशर्क्तिजितेन्द्रियः ॥६३४॥
परकायाप्रवेशे हि, समर्थः पृथिवीतले ।

६३. चक्राणां भेदनप्रक्रमेण नादोपत्तिः —

आत्मनो ग्रहणं कुर्याद्, दीक्षाकाले गुरुर्धियाम् ।
प्रविभज्यात्मनात्मानं, सृष्ट्वा भावान् पृथग्विधान् ॥६३५॥
सर्वशक्तिसुसम्पन्नः, स्वप्ने भोक्ता प्रपद्यते ।
भित्त्वा बिन्दुं ततो देवि, अर्धचन्द्रं विभेदयेत् ॥६३६॥



भिद्यतश्चार्धचन्द्रस्य, ललाटे भिमभिमायते ।
अर्द्धचन्द्रं सुभित्त्वा वै, भेदयेत्तु निरोधनीम् ॥६३७॥
तस्यां तु भिद्यमानायां, शब्दः सिमसिमायते ।
ततः सद्यो भवेदात्मा, तां तां गतिमवाप्नुयात् ॥६३८॥
निरोधनीं भेदयित्वा, ततो नादं व्रजेदधः ।
वंशशब्दसमः शब्दस्तत्र सूक्ष्मः प्रजायते ॥६३९॥
भेदयेन्नादसंस्थानं, ब्रह्मरन्ध्रं सुदुर्भिदम् ।
शक्तिं भित्त्वा ततो देवि, यथेष्टं व्यापिनी भवेत् ॥६४०॥
अनुभवो भवेत्तत्र, स्पर्शो यद्वत् पिपीलिका ।
भित्त्वा वै व्यापिनीं देवि, समनायां मनस्त्यजेत् ॥६४१॥
मनसा तु मनस्त्यक्त्वा, जीवः केवलतां व्रजेत् ।
उन्मना सा तु विज्ञेया, मनः सङ्कल्प उच्यते ॥६४२॥
सङ्कल्प्य क्रमतो ज्ञानमुन्मनायुगपत् स्थितम् ।
... ... ... ... ... ... ... ... ......॥६४३॥
मूलाधारस्थवह्न्यात्मतेजोरूपा व्यवस्थिता ।
जीवशक्तिः कुण्डलाख्या, प्राणाकारेण तेजसा ॥६४४॥
पूर्वाम्नायो बिन्दुरूपं, षट्कोणं दक्षिणः स्मृतः ।
अष्टपत्रं पश्चिमं तूत्तरं स्यात् षोडशच्छदम् ॥६४५॥
ऊर्ध्वत्रिकोणरूपं स्यात्, पातालं च त्रिवृत्तकम् ।
उपाम्नायपराम्नाया, वलयद्वयरूपिणः ॥६४६॥
आनन्दं भूपुरस्यैकं, रहस्यं वलयद्वयम् ।
... ... ... ... ... ... ... ... ... ॥६४७॥
चिन्तनं प्रथमे चक्रे, कुण्डलीक्रम उच्यते ।
चिन्तनं द्वितीये चक्रे, मिश्रणाख्यो भवेत्क्रमः ॥६४८॥
तृतीयं लम्बिकाचक्रं, तत्तुर्याक्रमचिन्तनम् ।
संवरोधिक्रमश्चैव, कथ्यते बिबुधैः सदा ॥६४९॥

शाम्भवक्रमतश्चैव, चिन्तयेत् परमेश्वरीम् ।
तत्पञ्चमोर्ध्वचक्रमाज्ञायां हंसक्रमेण वै ॥६५०॥
बैन्दवादि-महाबिन्दु-क्रमेण वै सुचिन्तयेत् ।
पूर्ववद् भ्रमयेद् देवि, तत्कुण्डलीक्रमेण च ॥६५१॥
षष्ठं वै चिन्तयेद् देवि, गुरुपद्मे तु लम्बिकाम् ।
सप्तमं चिन्तयेद् देवि, समाधिं सौविकल्पितम् ॥६५२॥
महावैभवसंयुक्तः, साक्षाच्छिवमयो भवेत् ।
तेनातिमन्दभाग्योऽपि, कुबेरस्याधिपो भवेत् ॥६५३॥
क्रमदीक्षासमायुक्तो, चिन्तयेच्चक्रमुत्तमम् ।
सर्वपापविनिर्मुक्तं, सर्वैश्वर्यप्रदायकम् ॥६५४॥

६४. शिरःस्थ–नाडीविवरणम् —

सुषुम्नान्तर्गतं विश्वं, तस्मिन् सर्वं प्रतिष्ठितम् ।
नानानाडीप्रस्रवणं, सर्वभूतान्तरात्मनि ॥६५५॥
ऊर्ध्वमूला अधःशाखा, वायुमार्गे च सर्वगाः ।
द्विसप्ततिसहस्राणि, नाड्यः स्युर्वायुगोचराः ॥६५६॥
एतासु मुख्या या नाड्यस्तासां मन्त्रनिदर्शनम् ।
क्रियते साधना कर्मसमृद्ध्यै मुख्यरूपतः ॥६५७॥
वलयाकाररूपेण, रसनोपस्थ एव हि ।
पृथग् भूत्वा क्रमेणैवं, श्रोत्रं चक्षुश्च मस्तकम् ॥६५८॥
सर्वस्य प्राणिनो लोके, यदा वै जन्म जायते ।
तदा कुण्डलिनी तस्य, प्रबुद्धैव सदा भवेत् ॥६५९॥
जन्मकाले तु जिह्वायामुपस्थे सक्रिया सती ।
बालस्यादौ भावयते, ज्ञानं सा स्वादजं तदा ॥६६०॥
नेत्रयोः सा कुण्डलिनी, जायते सक्रिया ततः ।
तत्र दृष्टिभवं ज्ञानमुत्पादयति नित्यशः ॥६६१॥
कर्णयोश्च ततो बुद्धा, श्रुतिसौख्यं प्रयच्छति ।
ततो नासिकायां प्राणशक्तिमुत्पादयत्यहो ! ॥६६२॥



मस्तिष्के च ततो ज्ञानं, विद्यां वर्धयते ततः ।
क्रमादुपस्थे सक्रियतां, व्रजतीति सुनिश्चितम् ॥६६३॥
तदैव साधनां कृत्वा, वीर्यसंरोधकारिणीम् ।
निरुद्धां बोधयेत् तर्हि, वीर्यमोचनकारिणी ॥६६४॥
चित्राऽवरुद्धा भवति, ततो वीर्यं निरोधयेत् ।
महारजसि तत् तुन्दे, शुक्रं मिलति निश्चितम् ॥६६५॥
तन्मेलनादूर्ध्वरेता, जायते क्रमशस्तदा ।
ओजस्तेजश्च वर्धेते, तत्प्रभावात् पुनस्तदा ॥६६६॥
........................................ ॥६६७॥
मस्तिष्काग्रेऽणिमादीनां, भागो जागर्ति सर्वथा ।
तत एव च संसिद्धिं, लभते मोक्षरूपिणीम् ॥६६८॥
कुण्डलिन्याः स्वरूपं तु, पारदाभं प्रचक्षते ।
यतः पारदवन्नित्यं, भिद्यते युज्यते सदा ॥६६९॥
तथाऽप्येकाकारैव, तिष्ठन्ती योगिनोऽधिपा ।
शरीरे बोधमापन्ना, सिद्धिं यच्छति सर्वदा ॥६७०॥
सर्वपापहरा नाडी, नासातो राजदन्तगा ।
सव्यापसव्यमार्गेण, सर्वपापक्षयङ्करी ॥६७१॥
विभक्तसर्वतत्त्वा च, राजदन्ता स्थितोदरे ।
कुरुते सर्वजीवानां, शरीरपोषणं ततः ॥६७२॥
सूक्ष्मतत्त्वं प्राणिदेहे, रसनोपस्थभागयोः ।
... ... ... ... ... ... ... ... ... ... ॥६७३॥
सर्वशास्त्रार्थबोधिनी, नाडीष्वन्यतमा स्मृता ।
मस्तकात् पादपर्यन्तं, निष्क्रम्य व्याप्यते सदा ॥६७४॥
घातावघातयोर्योगक्रिययोद्बोध्यते सदा ।
ग्रन्थानां स्पर्शमात्रेण, ज्ञानं वै जायते तदा ॥६७५॥

---

१–मणिपूरे ।

नाडीष्वेका विशिष्टात्मतत्त्वज्ञानप्रबोधिनी ।
यया तत्त्वगतं ज्ञानं, समस्तं जायते किल ॥६७६॥
तत्त्वज्ञानेन तेषां वै, तत्त्ववीक्षणशक्तता ।
क्षमत्वमाधिपत्येऽपि, भवतीति सुनिश्चितम् ॥६७७॥
निद्रापहारिणी नाडी, यया निद्राधिपो भवेत् ।
सहस्रवर्षपर्यन्तमिच्छानिद्रा नु जायते ॥६७८॥
तत्त्वेषु ननु न्यूनेषु, पूरणे पोषणे क्षमा ।
तत्त्वपूरणिका ख्याता, सर्वतत्त्वप्रपोषिणी ॥६७९॥
भोजनादिषु तत्त्वानां, या वै विभजने क्षमा ।
विभक्तसर्वतत्त्वा वै, तत्त्वातत्त्वविभाजनात् ॥६८०॥
शीतोष्णसुखदुःखानां, भावनाक्षयकारणात् ।
द्वन्द्वक्षयकरी नाडी, द्वन्द्वव्यूहविमुक्तिदा ॥६८१॥
सर्वेषामतिसूक्ष्माणां, तत्त्वानां ग्राहणे क्षमा ।
निम्नातिनिम्नगमनादूर्ध्वं सम्प्रेषणात्तथा ॥६८२॥
अतीन्द्रियसुखं सर्वमिन्द्रियाणां यतो हि या ।
अनुभावयते नाडी, सर्वानन्दकरी तु सा ॥६८३॥
एतासां ज्ञानतो योगाभ्यासः सम्पद्यते नृणाम् ।
गुदलिङ्गान्तरे चक्रमाधाराख्यं चतुर्दलम् ॥६८४॥
प्रकृतिर्महदहङ्कारतन्मात्रा दलानि हि ।
परमाः सहजास्तावदानन्दो धीरपूर्वकः ॥६८५॥
योगानन्दश्च तस्य स्यादैशानादिदले फलम् ।
तत्र कुण्डलिनी ब्रह्मशक्तिराधारपङ्कजे ॥६८६॥
आब्रह्मरन्ध्रमृजुतां, नीते या साऽमृतप्रदा ।
स्वाधिष्ठानं लिङ्गमूले, षट्पत्रं चक्रमस्य तु ॥६८७॥
पत्राणि विषयाभासौ, वृत्तिः कान्तिः स्थितिर्लयः ।
पूर्वादिषु दलेष्वाहुः, फलान्येतान्यनुक्रमात् ॥६८८॥



प्रश्रयः क्रूरतागर्वनाशौ मूर्च्छा ततः परम् ।
अवज्ञा चाप्यविश्वासः, कामशक्तेरिदं गृहम् ॥६८९॥
नाभौ दशदलं चक्रं, मणिपूरकसंज्ञकम् ।
विकृतिप्रत्ययौ बिम्बचैतन्यं सूक्ष्मदर्शनम् ॥६९०॥
उत्कण्ठोपाधिनिर्बन्धशिक्षाव्याजा दलानि च ।
सुषुप्तिरथ तृष्णा स्यादीर्ष्या पिशुनता तथा ॥६९१॥
लज्जा भयं घृणा मोहः, कषायोऽथ विषादिता ।
क्रमात् पूर्वादिपत्रेषु, स्याद् भानुभवनं च तत् ॥६९२॥
हृदयेऽनाहतं चक्रं, शिवस्य प्रणवाकृतिः ।
पूतास्थानं तदिच्छन्ति, दलैर्द्वादशभिर्युतम् ॥६९३॥
अवहेला विसंवादो, व्याहारोऽप्यवलम्बनम् ।
शरीरस्याध उत्सेधः, प्रकर्षः संविभागिता ॥६९४॥
कैतवं दान-वैक्लव्ये, सर्वशेषे विचारणा ।
फलं च साम्प्रतं वच्मि, तत्र तत्र समुद्भवम् ॥६९५॥
लौल्यं प्रणाशः कपटं, वितर्कोऽथानुतापिता ।
आशाप्रकाशश्चिन्ता च, समीहा समता तथा ॥६९६॥
क्रमेण दम्भो वैक्लव्यं, विवेकोऽहम्मदस्ततः ।
फलान्येतानि पूर्वादिदलस्थस्यात्मनो जगुः ॥६९७॥
कण्ठोऽस्ति भारतीस्थानं, विशुद्धिषोडशच्छदम् ।
क्रमेण वक्ष्यमाणानि, छदनानि निशामय ॥६९८॥
क्षयः प्रभावो विच्छेदजीवनग्लानियुक्तयः ।
भावना रचना स्वादविभ्रमौदास्यबुद्धयः ॥६९९॥
विक्रमः स्वैरता चित्तविह्वलत्वं विरोधिता ।
वक्ष्येऽधुना फलान्येषां, तत्तद्दलकलाजुषाम् ॥७००॥
बोधः प्रणव उद्गीथो, नैर्मल्यं शान्तता तथा ।
स्वाहा नमोऽमृतं षड्ज, ऋषभस्तदनन्तरम् ॥७०१॥

गान्धारो मध्यमश्चापि पञ्चमो धैवतस्तथा ।
निषादः सर्वशेषे स्यात्, क्रमेण सुरवन्दिते ॥७०२॥
इति पूर्वादिपत्रस्थे, फलान्यात्मनि षोडश ।
ललनाख्यघण्टिकायां, चक्रं षोडश[1]पत्रकम् ॥७०३॥
पर्णान्यमुष्य वक्ष्येऽहं, क्रमेणैव सुरेश्वरि ।
विरागोन्मादनिर्वेदाऽवहेलामर्षभीतयः ॥७०४॥
तितिक्षास्फीतितानर्थलालसोदारतास्तथा ।
स्वभावं साम्प्रतं वक्ष्ये, फलानि क्रमतः प्रिये ॥७०५॥
मदो मानस्तथा स्नेहः, शोकः खेदश्च लुब्धता ।
अरतिः सम्भ्रमश्चोर्मिः, श्रद्धा तोषोऽपराधिता ॥७०६॥
फलानि ललनाचक्रे, स्युः पूर्वादिदलेष्विति ।
भ्रूमध्ये त्रिदलं चक्रमाज्ञासंज्ञं दलानि तु ॥७०७॥
आविर्भाव-तिरोभावौ तत्परं च विकारिता ।
सत्त्वं रजस्तम इति, फलानि कथितानि ते ॥७०८॥
ततोऽप्यस्ति मनश्चक्रं, षड्दलं तद्दलानि तु ।
कामः क्रोधस्तथा लोभो, मोहो द्वेषोऽप्यसूयता ॥७०९॥
स्वप्नं रसोपयोगश्च, घ्राणं रूपोपलम्भनम् ।
स्पर्शनं शाब्दबोधश्च पूर्वादिषु दलेष्विति ॥७१०॥
ततोऽपि षोडशदलं, सोमचक्रमितीरितम् ।
एतद्दलानां नामानि, क्रमेण विनिबोध मे ॥७११॥
आशयोपशमप्रज्ञा, स्मृतयः सदसत्तथा ।
लयो निमित्तः सत्ता च, प्रमाणाक्षयवासनाः ॥७१२॥
अद्वैतयोगं भूमिश्च, पिण्डाविद्या निवृत्तयः ।
दलेषु षोडशस्वस्य, कलाः षोडश संस्थिताः ॥७१३॥

---

१. ललनाचक्रे चतुष्षष्टिदलानि भवन्ति ।



कृपा क्षमार्जवे धैर्यं, वैराग्य-धृति-सम्पदः ।
हास्यरोमाञ्चनिचयो, ध्यानञ्च स्थिरता तथा ॥७१४॥
गाम्भीर्यमुद्यमश्छन्नमौदार्यैकाग्रते तथा ।
फलान्येतानि जीवस्य, पूर्वादिदलगामिनः ॥७१५॥
चक्रं सहस्रपत्रं तु, ब्रह्मरन्ध्रे सुधाधरम् ।
तत्सुधासारधाराभिरभिवर्द्धयते तनुम् ॥७१६॥
सहस्रदलपद्मस्य, दलानामस्य नाम हि ।
फलानां चैव नामानि, नाब्रुवं विस्तृतेभर्यात् ॥७१७॥
गुदाच्च द्वयङ्गुलादूर्ध्वमाधाराद् द्वयङ्गुलादधः ।
एकाङ्गुलं देहमध्यं, तप्तजाम्बूनदप्रभम् ॥७१८॥
तत्रास्ते अग्निशिखा तन्वी, चक्रात्तस्मान्नवाङ्गुलैः ।
देहस्य कन्दोत्थसेधायामाभ्यां चतुरङ्गुलम् ॥७१९॥
ब्रह्मग्रन्थिरिति प्रोक्तं, तस्य नाम पुरारिणा ।
तन्मध्ये नाभिचक्रं तु, द्वादशारमवस्थितम् ॥७२०॥
लूतेव तन्तुजालस्था, तत्र जीवो भ्रमत्यसौ ।
सुषुम्णया ब्रह्मरन्ध्रमारोहत्यवरोहति ॥७२१॥
जीवः प्राणसमारूढो, रज्ज्वाङ्क्तोऽजाविकस्तथा ।
सुषुम्णां परितो नाड्यः, कन्दादौ ब्रह्मरन्ध्रतः ॥७२२॥
क्रोडीकृत्य स्थिताः कन्दशाखा इव महीरुहम् ।
सूक्ष्मातिसूक्ष्मरूपेण, तस्मात् सूक्ष्मतरेण च ॥७२३॥
चतुर्विंशतिसाहस्रा, नाड्यस्तस्याः समीपगाः ।
तासां भूरितराणां तु, मुख्याः प्रोक्ताश्चतुर्दश ॥७२४॥
सुषुम्णेडा पिङ्गला च, कुहूस्था च सरस्वती ।
गान्धारी हस्तिजिह्वा च, वारणा च यशस्विनी ॥७२५॥
विश्वोदरा शङ्खिनी च, ततः पूषा पयस्विनी ।
अलम्बुषेति तत्राद्यास्तिस्रो मुख्यतमा मताः ॥७२६॥

सुषुम्णा तिसृषु श्रेष्ठा, शाङ्करी मुक्तिमार्गगा ।
कन्दमध्ये स्थिता तस्या, इडा सव्येऽथ दक्षिणे ॥७२७॥
पिङ्गले द्वे पिङ्गलयोश्चतत्रश्चन्द्रभास्करौ ।
क्रमात् कालगतेर्हेतुः, सुषुम्णा कालशोषिणी ॥७२८॥
सरस्वती कुहूश्चास्ते, सुषुम्णायास्तु पार्श्वयोः ।
इडायाः पृष्ठपूर्वस्थे, गान्धारी हस्तिजिह्वके ॥७२९॥
क्रमात् पूषायशस्विन्यौ, पिङ्गला पूर्वपृष्ठयोः ।
विश्वोदरा मध्यदेशे, स्यात् कुहूहस्तिजिह्वयोः ॥७३०॥
मध्ये कुहू-यशस्विन्योर्वारणा संस्थिता मता ।
पूषा सरस्वतीमध्यमधिशेते पयस्विनी ॥७३१॥
अङ्गुष्ठाद् दक्षिणाङ्घ्रिस्था, देहे विश्वोदराखिले ।
शङ्खिनी सव्यकर्णान्ते, पूषा त्वावामनेत्रतः ॥७३२॥
यशस्विनी तु वितता, दक्षिण-श्रवणावधि ।
अलम्बुषा ह्यधोमूले, नवलक्षव्यवस्थिता ॥७३३॥
पुनरन्याः शतं चैका, नाडीर्विग्रहगामिनीः ।
जगाद भगवान् रुद्रस्ता अपि व्याहरामि ते ॥७३४॥
सर्गा विसर्गा धमनी, कम्पिनी बन्धिनी हिता ।
निम्नाऽथ भासुरा सङ्कोचिनी दूता प्रकाशिनी ॥७३५॥
प्रबुद्धा क्षेपिणी च स्यादालस्याथ विलम्बिता ।
घर्घरा वेशिनी पूर्णा, क्षिप्ता रूक्षा च भोगिनी ॥७३६॥
क्लिन्ना स्निग्धा तथा चण्डा, चण्डा भानुमती ध्रुवा ।
केकरा कुटिला शुद्धा, धरित्री दर्दुराकुला ॥७३७॥
काकतुण्डी मनोमाला, चित्रा तेजस्विनी सती ।
अव्यक्ता मालिनी मन्दा, द्राविणी मधुमत्यपि ॥७३८॥
चेतना मुदिता भ्रामिण्यतो रसवहापि च ।
सौवीरी कपिला कर्षिण्युत्तरा रञ्जिनी तथा ॥७३९॥



सुमुखी रेवती विश्वदूता चाप्यायनी ततः ।
चन्द्रा हेमा च मैत्री च, नन्दा चापि कपर्दिनी ॥७४०॥
तन्द्रावती विशाला च, विचित्रा माण्डवी तथा ।
कल्पा सुकल्पा तदनु, लोहिनी पूतनाऽपि च ॥७४१॥
धारिणी घोरणी धीरा, सुरभिर्वेगवत्यपि ।
विवर्णा कृन्तनी चैव, विकल्पा कोटराऽचला ॥७४२॥
तपिनी तापिनी धूम्रा, मरीचिर्ज्वालिनी रुचिः ।
अग्निज्वाला च सम्मोहा, मूला स्वप्नावहापि च ॥७४३॥
तन्द्रावती लम्बिका च, घण्टिकाऽविग्रहापि च ।
कैवल्या च तुरीया च, विभ्रान्तिश्च प्रशान्तया ॥७४४॥
योगिनी श्रेण्यापि ततो, निर्वाणा चापुनर्भवा ।
अमृता सर्वशेषे च, क्रमेणैताः प्रकीर्तिताः ॥७४५॥
योगैरेतासु सम्प्रेष्य, प्राणादिदशमारुतान् ।
यच्चिकीर्षति तत्सर्वं, संसाधयति योगवित् ॥७४६॥

६५. सहस्रारचक्रनाड्यो वायवश्च —

अङ्गुष्ठमात्रः पुरुषो, विपरीताङ्गो हि संस्थितः ।
मस्तिष्कमध्ये तस्यैव, शरीराङ्गविनिःसृताः ॥७४७॥
सन्ति नाड्यो विभिन्ना याः, सूक्ष्माः केश इवाश्रिताः ।
एकैककेशसंस्थाश्च, नाड्यः षोडश षोडश ॥७४८॥
इच्छानाड्यस्तु ताः प्रोक्ता, वैशिष्ट्येन समन्विताः ।
क्रियाकाले प्रवर्धन्ते, लुप्यन्ते च ततः परम् ॥७४९॥
कयाऽपि दृष्ट्या नेक्ष्यन्ते, साधनैरपि नैव च ।
यदा सक्रियतां यान्ति, तदैवानुभवो भवेत् ॥ ७५०॥
मूलस्रोतः संस्कृताख्या, नाडी रागास्तु तद्भवाः ।
ष-रि-ग-म-प-धा-नीति, रागाणां सारसूत्रिका ॥७५१॥

यस्मात् कस्मादतो वाद्यात्, स्वराः सप्तैव शब्दिताः ।
भवन्ति नान्ये सर्वत्र, तथेयं सुरभारती ॥७५२॥
यत्र कुत्रापि प्रोच्येत, समानैव तदोच्यते ।
वेदादीनां तथा पाठः, सर्वत्रैकस्वरेण हि ॥७५३॥
जायते नात्र सन्देहो, यथा वेदेषु भाषितः ।
यया नाड्या च भाष्यन्ते, तया साकं परा अपि ॥७५४॥
नाड्यो भवन्ति तासां तु, जननी संस्कृता [1]स्मृता ।
सैव जिह्वेति सम्प्रोक्ता, ह्यु च्चावचक्रियान्विता ॥७५५॥
संयोगादन्यनाडीनामन्या भाषास्तयोच्यते ।
एवं यदाऽपरा नाड्यः, सक्रियाः प्रभवन्ति हि ॥७५६॥
तदा पृथक् पृथग् भाषा, उच्चार्यन्ते क्रमेण ताः ।
यदाऽन्यो मनुजो वक्ति, तदा जागर्तिमास्थिता ॥७५७॥
उच्चारणं प्रारभते, तद्भाषारूपसंयुता ।
यां भाषां नैव जानीमो, न च तां गदितुं क्षमाः ॥७५८॥
न श्रुता नावगच्छामः, परं सा ध्यानतो यदि ।
श्रूयते चेत्तदा नाडी, चैतन्यं साऽधिगच्छति ॥७५९॥
तत्प्रभावाद् वयं भाषां, श्रूमस्तामप्रयत्नतः ।
चतुःषष्टि समाख्याता, एता नाड्यो व्यवस्थिताः ॥७६०॥
चतुःषष्ट्यक्षररूपा, मातृकाशक्तयः स्मृताः ।
जिह्वायां लिङ्गमध्ये च, योनौ वा नाडिका भृशम् ॥७६१॥
स्थित्वैताः प्राणिनं नैकानानन्दान् प्रापयन्ति च ।
ललनाचक्रमागत्य, नाड्य एताः पुनः पुनः ॥७६२॥
चक्षुर्नासाहस्तपादेष्विन्द्रियेषु प्रसारिताः ।
सङ्कोचमाप्ताः सर्वत्र, प्रवर्तन्ते यथा तथा ॥७६३॥

१. नम्बुपस्थे । पाठा०



तेषामेवाश्रयेणात्र, सुखानि प्रददन्ति ताः ।
श्रीयन्त्रस्य च यावत्यः, सन्त्यावरणदेवताः ॥७६४॥
तासां नामानि नाडीनां, स्वरूपाण्येव सन्ति हि ।
श्रीयन्त्रावरणे मुख्ये, देवते प्रतिपादिते ॥७६५॥
कालिका सुन्दरी चेति, सर्वसौख्यप्रदे उभे ।
कालिका कृष्णवर्णत्वात्, सुन्दरी रक्तवर्णतः ॥७६६॥
एवं नाड्यां संस्कृतायां, वर्धते ज्ञानमुत्तमम् ।
पठनान्मननाच्चैव, चिन्तनादपि नित्यशः ॥७६७॥
साधनातो गुरूणां च, कृपातः प्राप्यते सदा ।
एतदेवाक्षरं ब्रह्म, सृष्टि-स्थिति-लयादिकान् ॥७६८॥
अकरोत् कुरुते नित्यं, करिष्यति न संशयः ।
साधनायै स्वरूपं तन्मननाच्चिन्तनाच्च यत् ॥७६९॥
प्रबुद्धं सत् स्वरूपं स्वं, प्रकटय्येष्टमृच्छति ।
... ... ... ... ... ... ... ... ... ॥७६९॥ (अ)
विवेचनी च श्रमिका, मनोबुद्धि-प्रवर्तिका ।
विषयग्राहिणी नाडी, विद्यते सत्प्रवर्तनी ॥७७०॥
स्वयं संरक्षणी नाडी, तथा स्वोत्कर्षणी स्मृता ।
एवं शास्त्रेषु नाडीनां, सप्त भेदाः प्रकीर्तिताः ॥७७१॥
शक्तिर्विवेचनी नाम, चतुर्धा परिकीर्तिता ।
न्यायोपमानसत्ताख्ये, मनुष्यत्वेतिनामिका ॥७७२॥
तथा मृदुलता शक्तिः, क्रमशः परिकीर्तिता ।
... ... ... ... ... ... ... ... ... ... ॥७७३॥
नाडी च श्रमिका चेयं, मुनिभिः पञ्चधा[1] स्मृता ।
मैत्रीसत्ता स्नेहसत्ता, पितृसत्ताऽपरिच्छदा ॥७७४॥
वासानुरागसत्तेयं, सत्ता सम्मिलनात्मिका ।
... ... ... ... ... ... ... ... ... ... ॥७७५॥

१. स्नेहसत्तायां सम्मिलनात्मिका मिलितेति कृत्वा पञ्चधेति जगुः ।

मनःप्रवर्तिका शक्तिः, पञ्चधा परिकीर्तिता ।
काव्यानुवर्तनयुता, सुप्रतीकात्मिका तथा ॥७७६॥
प्रमोदरचनासत्ता, प्रथिता पृथिवीतले ।
... ... ... ... ... ... ... ... ... ... ... ॥७७७॥

विषयग्राहिणी शक्तिर्नित्यं द्वादशधा स्मृता ।
रूपाङ्ककालवृत्तान्तवर्णस्थानव्यवस्थिता ॥७७८॥
प्रमाणगुरुतारागवाग्व्यापारात्मिकाः खलु ।
अविभक्तप्रमाणाख्या, कथिता क्रमशो बुधैः ॥७७९॥
... ... ... ... ... ... ... ... ... ... ... ... ।

शास्त्रेषु कथिता शक्तिः, पञ्चधा सत्प्रवर्तिका ॥७८०॥
अन्तःकरणशुद्धचर्था, सत्ता चैवैषणात्मिका ।
आत्मज्ञानात्मिका भक्तिः, सत्ता चोपकृतिः स्मृता ॥७८१॥
... ... ... ... ... ... ... ... ... ... ... ।

सेयं संरक्षणी शक्तिः, षड्भेदात्मिका मता ॥७८२॥
[1]प्राणोपार्जन-संहार-शौर्य-पोषण-संयुता ।
गोपनाख्या च सत्तेयं, क्रमशः परिकीर्तिता ॥७८३॥
... ... ... ... ... ... ... ... ... ... ...... ।

सेयं स्वोत्कर्षणी शक्तिश्चतुर्धा मुनिभिर्मता ॥७८४॥
आत्मश्लाघात्मिका सत्ता, सावधानात्मिका खलु ।
सम्मानसत्तानाम्नीयं, सत्ता दार्ढ्यात्मिका स्मृता ॥७८५॥
सर्वशास्त्रार्थबोधिनी, तत्त्वज्ञानप्रबोधिनी ।
निद्रापहारिणीनाम्नी, सर्वतत्त्वप्रपोषणी ॥७८६॥
विभक्तसर्वतत्त्वा च, द्वन्द्वक्षयकरी तथा ।
सूक्ष्मातिसूक्ष्मतत्त्वानां ग्राहिणी चोर्ध्वगामिनी ॥७८७॥

१. प्राणस्नेहसत्ता हि प्राणशब्देन गृह्यते ।



सर्वानन्दकरी सेयमधोगामिनीसंज्ञका ।
यां ज्ञात्वा तु महायोगी, साक्षाद् ब्रह्ममयो भवेत् ॥७८८॥
विवेचनी चाश्रमिका, मनोबुद्धिप्रवर्तिका ।
विषयग्राहिणी नाडी, विद्यते सत्प्रवर्तिनी ॥७८९॥
अथ संरक्षणी नाडी, तथा स्वोत्कर्षणी स्मृता ।
एवं शास्त्रेषु नाडीनां, सप्त भेदाः प्रकीर्तिताः ॥७९०॥
नाडी चाश्रमिका चेयं, मुनिभिः पञ्चधा स्मृता ।
मैत्रीसत्ता स्नेहसत्ता, पितृसत्ता परिच्छदः ॥७९१॥
वासानुरागसत्तेयं, सत्ता सम्मिलनात्मिका ।
सेयं संरक्षणी शक्तिः, षड्भेदात्मिका मता ॥७९२॥
प्राणोपार्जनसंहार-शौर्यपोषणसंयुता ।
गोपनाख्या च सत्तेयं, क्रमशः परिकीर्तिताः ॥७९३॥
सेयं स्वोत्कर्षणी शक्तिश्चतुर्धा मुनिभिर्मता ।
आत्मश्लाघात्मिका सत्ता, सावधानात्मिका खलु ॥७९४॥
सम्मानसत्तानाम्नीयं, सत्ता दार्ढ्यात्मिका स्मृता ।
शास्त्रेषु कथिता शक्तिः, पञ्चधा सत्प्रवर्तिका ॥७९५॥
अन्तःकरणशुद्धचर्था, सत्ता वै चैषणात्मिका ।
आत्मज्ञानात्मिका भक्तिः, सत्ता चोपकृतिः स्मृता[1]॥७९६॥
मनःप्रवर्तिका शक्तिः, पञ्चधा परिकीर्तिता ।
काव्यानुवर्तनयुता, सुप्रतीकात्मिका तथा ॥७९७॥
प्रमोदरचनासत्ता, प्रथिता पृथिवीतले ।
विषयग्राहिणी शक्तिर्नित्यं द्वादशधा स्मृता ॥७९८॥
रूपाङ्ककालगुरुता, — वर्णस्थानव्यवस्थिता ।
प्रमाणगुरुता राग—वाग्व्यापारात्मिका खलु ॥७९९॥

१. अत्र सार्धचतुःपद्यानां पूर्ववदेवावर्तनं विद्यते ।

अविभक्तप्रमाणाख्या, कथिता क्रमशो बुधैः ।
शक्तिविवेचनी नाम, चतुर्धा परिकीर्तिता ॥८००॥
न्यायोपमानसत्ताख्ये, मनुष्यत्वेतिनामिका ।
तथा मृदुलताशक्तिः, क्रमशः परिकीर्तिता ॥८०१॥
कण्ठोर्ध्वे परमेशानि, लम्बिका चतुरङ्गुले ।
चतुःषष्टिदले पद्मे, चाक्षराण्यपि सन्त्यलम् ॥८०२॥
महाकाली महालक्ष्मीर्महापूर्वा सरस्वती ।
त्रिशक्तिश्चामुण्डामध्ये, लम्बिकाक्त सुशोभिताः ॥८०३॥
त्रिषष्टिश्चतुःषष्टिर्वा, वर्णाः शम्भुमते मताः ।
प्राकृते संस्कृते वापि, स्वयं प्रोक्ताः स्वयम्भुवा ॥८०४॥
अनुस्वारो विसर्गश्च, क ⌣ पौ चापि पराश्रयौ ।
दुःस्पृष्टश्चेति विज्ञेयो, लृकारः प्लुत एव च ॥८०५॥
चतुर्णामेव चक्राणामैक्याद् यल्लम्बिकाभिधम् ।
चक्रं सम्पद्यते तस्य, चतुःषष्टिदलानि वै ॥८०६॥
भवन्ति मातृकास्तत्र, तावत्यः समुपासिताः ।
ताराया मातृका एव, वर्णरूपेण संस्थिताः ॥८०७॥
त्रिषष्टिवर्णाः विख्याताः, सन्ति तत्र महौजसः ।
महाबिन्दुस्तथा पूर्णचतुःषष्ट्यङ्को मतः ॥८०८॥
वियतोऽधिपतिस्तत्र, देवता तु सदाशिवः ।
तत्कर्णिकासमासीनः, शान्त्यतीतेश्वरः प्रभुः ॥८०९॥
पञ्चवक्त्रो दशभुजो, विद्युत्पुञ्जनिभाकृतिः ।
निवृत्तिश्च प्रतिष्ठा च, विद्याशान्तिरनुक्रमात् ॥८१०॥
परिवार्य स्थिताश्चैता, शान्त्यतीतस्य सुन्दरि ।
वामभागे समासीना, शान्त्यतीता मनोन्मनी ॥८११॥
पञ्चवक्त्रधराः सर्वा, दशबाह्विन्दुभूषणाः ।
बिन्दुतत्वं समाख्यातं, कोटयर्बुदशतैर्वृतम् ॥८१२॥



... ... ... ... ... ... ... ... ... ... ।
सहस्रारं महापद्मं सप्तभागे व्यवस्थितम् ॥८१३॥

६. आज्ञाचक्रं नाड्यो वायवश्च

हस्तिजिह्वा च गान्धारी, तथा चालम्बुषा पुनः ।
आज्ञाचक्रस्य[1] नाड्यः स्युर्द्वौ वायू च तथोदितौ ॥८१४॥

६७. विशुद्धचक्रनाड्यो वायवश्च —

पूषा यशस्विनी नाड्यौ, कर्णयोर्विशतः सदा ।
स्कन्धयोर्वारुणा चैव, व्याप्ता वै मारिका[2] तथा ॥८१५॥
अन्यास्तु मातृकास्तिस्रा, शिवा बाला सरस्वती[3] ।
अमृता श्रीरवन्ती च, तथैव च कुमारिका ॥८१६॥
निःसृता दलमध्याभ्यां, शोभिताश्च यथाक्रमम् ।
मध्ये स्कन्धे च शीतापि, प्रादुर्भूता च नाडिका ।
वायवः षोडश ज्ञेया, विशुद्धे च यथाश्रुतम् ॥८१७॥

६८. अनाहतचक्रनाड्यो वायवश्च —

वृन्दा च शारदा[4] नीला, पीता द्वादश-वायवः ।
अनाहते भवन्त्येवं, नाड्यो वायुक्रमश्च वै ॥८१८॥

६९. मणिपूरचक्रनाड्यो वायवश्च —

तारका माधवी तारा, मुक्ता काली बिजौलिका ।
इल्ता शुक्रेल्तिकातीतास्तारा च तारका तथा ॥८१९॥
विश्वोदरी शारदा च, नाड्यौ वै मणिपूरके ।
स्तनयोर्नाडिकास्तिस्रो, निःसरन्ति विनिश्चितम् ॥८२०॥
दशैव वायवः प्रोक्ता, मणिपूरे सदैव हि ।
... ... ... ... ... ... ... ... ... ... ॥८२१॥

---

१— चक्रे तु २— एमारिका ३— पयस्विनी ४— अवन्तिका ।

७०. स्वाधिष्ठानचक्रनाड्यो वायवश्च —

शङ्खिनी चैव सूत्रा च, विश्वा चार्वन्तिका तथा ।
उपस्थे च कुहू व्याप्ता, इमा नाड्यस्तु विश्रुताः ॥८२२॥
षडेव वायवो ज्ञेयाः, स्वाधिष्ठाने यथोदिताः ।
... ... ... ... ... ... ... ... ... ... ॥८२३॥

७१. मूलाधारचक्रनाड्यो वायवश्च —

कालधमनील्तिले[1] च, तथा नाडी च शङ्खिनी ।
पायोर्निःसृत्य संव्याप्ता, सहस्रारावधौ हि सा ॥८२४॥
चत्वारो वायवो ज्ञेया, मूलाधारे यथाक्रमम् ।
... ... ... ... ... ... ... ... ... ... ॥८२५॥

७२. मिश्रचक्रनाड्यो वायवश्च —

मिश्रचक्रेषु नाड्यस्तु, वायवश्च यथाक्रमम् ।
सम्पूज्य भान्ति चक्रस्थाः, शास्त्रानुमोदितं यथा ॥८२६॥

७३. पञ्चीकरण-शक्तयः —

पृथिव्यापस्तथा तेजो, वायुराकाश एव च ।
पञ्चभूतात्मको देहो, ज्ञातव्यो हि वरानने ॥८२७॥
अस्थि मांसं त्वचा नाडी, रोम चैव तु पञ्चमम् ।
पृथ्वी पञ्चगुणा चोमा, दुर्गा च जयपूर्विका ॥८२८॥
उग्रचण्डा तथा दुर्गा, वनदुर्गा च शक्तयः ।
कीर्तिरस्त्रान्वितञ्चैव, ठःद्वयं साहसन्तथा ॥८२९॥
सफलताग्निजाया च, मृत्युञ्जयस्तथैव च ।
विजयो निर्भयश्चैव, वायव्यं खलु सर्वदा ॥८३०॥
दुर्गायाः सर्गबीजं च, दुर्गाबीजन्तथैव च ।
सर्वतः सिद्धविद्या वै, पृथ्वीतत्त्वं च वै शृणु ॥८३१॥

१—कालधमनीस्तले । पाठा०



ब्रह्मा देवश्च वर्णश्च, पतिश्चाधो विशुद्धकम् ।
... ... ... ... ... ... ... ... ... ... ॥८३२॥
शुक्रशोणितमज्जाश्च, मूत्रं लाला च पञ्चमम् ।
आपः पञ्चगुणाः प्रोक्तास्तारा दक्षिणकालिका ॥८३३॥
भैरवी छिन्नमस्ता च, तथा धूमावती शुभा ।
दयाकूर्च्चवधूप्रेमकुन्ती (काली) स्मृतिस्तथैव च ॥८३४॥
प्रोक्ता शक्तिस्तथा ह्यत्र, कुलकुण्डलिनी ननु ।
योगिन्यथ रागो धूम्रं महाविद्या प्रकीर्तिताः ॥८३५॥
ऐशान्यां जलतत्त्वं च, विष्णुदेवस्तथा शृणु ।
श्यामवर्णन्तथा चाधश्चक्रं स्वाधिष्ठानकम् ॥८३६॥
क्षुधा तृष्णा तथा निद्रा, कान्तिरालस्यमेव च ।
तेजः पञ्चगुणं प्रोक्तं, त्रिपुरा बगला तथा ॥८३७॥
कमला चैव मातङ्गी, शक्तिश्च भुवनेश्वरी ।
अथाकर्षणशक्तिश्च, स्थिरभासा च वैभवम् ॥८३८॥
पद्मबीजं च ह्स्सौ[1]नु, प्रसादबीजं वै परा ।
ध्वनिमातङ्गबीजं च, मायाबीजं तथैव च ॥८३९॥
महाविद्या भवन्त्येता, आग्नेये रुद्रदेवताः ।
अग्निस्तत्त्वं तथा रक्तवर्णञ्चाहुर्विचक्षणाः ॥८४०॥
अधोमुखे मणिपूरे, ज्ञेया देव्यो ह्यनुक्रमम् ।
... ... ... ... ... ... ... ... ... ... ॥८४१॥
धावनं चलनं चेष्टा, सङ्कोचन-प्रसारणे ।
वायुः पञ्चगुणः प्रोक्तो, देवी सिद्धकरालिका ॥८४२॥
प्रत्यङ्गिरा सिद्धिलक्ष्मीर्भद्रकाली तथा पुनः ।
हृयमङ्कुशमोजश्च, शोषणं बीजमेव च ॥८४३॥
विज्ञेया दुःखघ्नी शक्तिः, शिवः प्रसादो वै तथा ।
अहङ्कारश्च रावश्च, कामो हि कामबीजकम् ॥८४४॥

१. ह्स्सौ-पराप्रसाद इति ।

सिद्धविद्या भवन्त्येता, वायुस्तत्त्वं तथेश्वरः।
नैर्ऋत्ये श्वेतवर्णश्च, ह्यधोवक्त्रमनाहतम् ॥८४५॥
देवी कामकला काली, इत्येताः शक्तयः क्रमात्।
रागद्वेषौ तथा लज्जा, भयं मोहश्च पञ्चमः ॥८४६॥
नभः पञ्चगुणं प्रोक्तं, कुब्जा चामुण्डिका तथा।
महाकाली महालक्ष्मीर्महापूर्वा सरस्वती ॥८४७॥
भयः सर्वगतश्चैव, विच्चेबीजं च सिद्धिदम्।
मोहश्च योगनिद्रा च, वाक् कामबीजं वै सदा ॥८४८॥
क्रोध ऐश्वर्यलज्जे च, तथेच्छा च लक्ष्मीः खलु।
विद्या ज्ञेयाः तथा कामवाग्बीजं शोक एव च ॥८४९॥
शक्तिः कुण्डलिनी चैव, खेचरीबीजमेव च।
सिद्धविद्या भवन्त्येता, देवोऽयं च सदाशिवः ॥८५०॥
आकाशस्तत्त्वमाहुश्च, ललनास्थानमेव च।
सूर्यश्चैव प्रकाशश्च, ओमिति ब्रह्मरूपिणम् ॥८५१॥
प्रणवो हि परं तत्त्वं, त्रिवेदं त्रिगुणात्मकम्।
त्रिदैवतं त्रिधामस्थं, त्रिप्रज्ञं त्रिरवस्थितम् ॥८५२॥
त्रिमात्रञ्च त्रिकालञ्च, त्रिलिङ्गं कवयो विदुः।
सर्वमेतत्त्रिरूपेण, व्याप्तं हि प्रणवेन तु ॥८५३॥
अग्निः सोमश्च सूर्यश्च, त्रिधामेति प्रकीर्तितम्।
अन्तःप्रज्ञं बहिःप्रज्ञं, घनप्रज्ञमुदाहृतम् ॥८५४॥
हृत्कण्ठे तालुके चेति, त्रिस्थानमिति कीर्त्यते।
अकारोकारमकारैस्त्रिमात्रः स उच्यते ॥८५५॥
कर्मारम्भेषु सर्वेषु, त्रिमात्रं तं प्रकीर्तयेत्।
स्थित्वा सर्वेषु शब्देषु, सर्वं व्याप्तमनेन हि ॥८५६॥
अकारो ब्रह्मणो रूपम्, उकारो विष्णुरूपवत्।
मकारो रुद्ररूपः स्यादर्धमात्रं परात्मकम् ॥८५७॥



वाच्यं तत्परमं ब्रह्म, वाचकः प्रणवः स्मृतः।
वाच्यवाचकसम्बन्धस्तयोः स्यादौपचारिकः ॥८५८॥
श्रीदेव्याः परमं स्थानं, हृदयं परिकीर्तितम्।
शिवस्थानं महेशानि ! सहस्रारं प्रकीर्तितम् ॥८५९॥
स्थानभेदान्नामभेदाद्, रूपभेदान्महेश्वरि।
कथमैक्यं महादेवि, तस्मादिह तु भावना ॥८६०॥
स्थान-भेदे रूपभेदे, नामभेदेन वै मम।
तात्पर्यं विद्यते देवि ! किन्तु चैतन्य-भावना ॥८६१॥

गुरुमहिमा —

गुरु-मुख्याः क्रियाः सर्वा, निर्वाणं गुरुरूपकम्।
निर्वाणं परमं ब्रह्म, निर्वाणं तु गुरोः पदम् ॥८६२॥
गुरुः शक्तिर्गुरुर्विद्या, गुरुर्देवो महेश्वरः।
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्विराट् स्वरूपवान् ॥८६३॥
गुरुर्मन्त्रो हि चैतन्यः, किं बहु ब्रह्म केवलम्।
चैतन्य एव तात्पर्यं, ध्यानं तु भावनैव हि ॥८६४॥
केन दृष्टं ध्येयरूपं, भावनामात्रगोचरम्।
दृढ-भावनया युक्ते, प्रत्यक्षं दर्शनं भवेत् ॥८६५॥
चैतन्यं सर्वदा भाव्यं, गुरौ देवि ! न संशयः।
गुरुं विना न विद्याप्तिर्न च मन्त्राप्तिरेव च ॥८६६॥
गुरुस्थानं श्रेष्ठभूतं, गुरौ सर्वस्य भावना।
गुरुदैवत-मन्त्राणामैक्यं सम्भावयन् धिया ॥८६७॥
मन्त्रार्थं हृदि निश्चित्य, गुरुरूपं परामृशन्।
सर्वं गुरौ विलीनं वै, ज्ञात्वा तु प्रजपेत् प्रिये ॥८६८॥
स्वाभिन्नत्वेन सम्भाव्य, त्रितयं त्रितयं त्रिषु।
सर्वचक्षुः सर्वमुखं, सर्वस्यैव स्वरूपिणम् ॥८६९॥

चैतन्यं च विभाव्याऽथ, महातेजः स्मरेच्छिवे ॥८७०॥
गुरुकृपा भवेद् देवि ! देवरूपो गुरुः स्मृतः ।
गुरु-रूपो भवेदात्मा, आत्मरूपो मनुर्भवेत् ॥८७१॥
मनुरूपं तु सकलं, विभाव्या मूर्तिकल्पना ।
स्वयं भावना या देवि ! ताद्रूप्यत्वं प्रजायते ॥८७२॥
चैतन्यमूर्तिं सञ्चिन्त्य, किं न सिद्ध्यति भूतले ।
त्रयाणामेकगं तेजस्तत्सर्वत्र मूर्तिकल्पना ॥८७३॥
ध्यानोक्तदेवतां ध्यात्वा, स्वस्वरूपं विभावयेत् ।
अर्धनारीश्वरमपि, मन्त्रचैतन्यविग्रहम् ॥८७४॥
गुरुदैवतमन्त्राणामैक्यं सम्भावयन् धिया ।
चैतन्यं चैव सर्वेषां, तेजःपुञ्जं विभावयेत् ॥८७५॥
उपदेष्टा गुरुर्देवि, मन्त्रचैतन्यबोधनम् ।
चैतन्यस्य स्वरूपं वै, गुरुरूपं विभावयेत् ॥८७६॥
मन्त्रदेवगुरूणां हि त्वैक्यं सम्भावयन् धिया ।
तेजःपुञ्जनिभं सर्वं, ह्यक्षरस्य स्वरूपकम् ॥८७७॥
तेजःपुञ्जाक्षराणि च, सर्वेष्वैक्यं विभावयेत् ।
सर्वं चैतन्यजं तेज, कोटिसूर्यसमप्रभम् ॥८७८॥
देवतागुरुमन्त्राणामैक्यं सम्भावयन् धिया ।
सर्वतेजोमयं भाव्यं, जगत्स्थावरजङ्गमम् ॥८७९॥
एवं यो भावयेत् तस्य, देवता वरदा भवेत् ।
प्रत्यक्षं दर्शनं देवि !, प्रीतौ लीना हि वर्तते ॥८८०॥
प्रत्यक्षदर्शनं देवि !, प्रीतौ प्रीता हि वर्तते ।
तथा वाक्यादिसंसिद्धिप्रीत्यर्थं विनियोगकम् ॥८८१॥
बीजं विना तु निर्बीजं, शववत् परिकीर्तितम् ।
बीजयुक्तं भवेद्यन्त्रं, निश्चितं सिद्धि-दायकम् ॥८८२॥
बीजाभावे मातृकार्णान्, संलिखेद् बिन्दुभूषितान् ।
यन्त्रमध्ये तु लिखितं, तद्यन्त्रं पूजयेच्छिवे ॥८८३॥



त्रैलोक्यमोहने चक्रे, पञ्चाशद्वर्णविग्रहे ।
चतुरस्रं मातृकावर्णैर्मण्डितं सिद्धिहेतवे ॥८८४॥
मुक्तामाणिक्यघटितं, समस्थलविराजितम् ।
त्रैलोक्यमोहनं नाम, कल्पद्रुमफलप्रदम् ॥८८५॥
तत्त्वाक्षर-समायुक्तं, देवीसप्ताक्षरात्मिका ।
मातृकावर्णैर्मण्डितं सम्पूर्णं सिद्धिहेतवे ॥८८६॥
यन्त्रराजं यजेद्देवि, सर्वकामार्थसिद्धिदम् ।
देवीं मातृकायुक्तैः क्षिप्रं पूजाफलं लभेत् ॥८८७॥
बिन्दु-ध्वनि-सकाशात् तु, प्रत्येकं वर्णजातयः ।
मातृकावर्णा [1]उच्यन्ते अक्षरेति च संज्ञया ॥८८८॥
श्रीचक्रे शिवयो रूपं, विराड्रूपे तु साम्यगा ।
तेजःपुञ्ज-निभा रेखा, सर्वचैतन्यरूपिणी ॥८८९॥
चैतन्यं भावयेत् सर्वं, बिन्द्वादिभूपुरान्तकम् ।
उत्तरोत्तर-बीजं च, बिन्दोरस्य विभावयेत् ॥८९०॥
भावनाप्रेषणं देवि, देवेन क्रियते शिवे ।
प्रतापं शृणु देवेशि, यत् सर्वं क्रियते सदा ॥८९१॥
भावनैव तु सम्प्रोक्ता, भावना सिद्धिदा मता ।
भावना यदि नो सिद्धा, तत्प्रत्यक्षं कथं भवेत् ॥८९२॥
सर्वं दर्पणवद् भाव्यं, स्वप्रकाशस्वरूपकम् ।
मूलतेजःप्रकाशेन, नाभिन्नं भावयेत् प्रिये ॥८९३॥
आकीटाद् ब्रह्मपर्यन्तं, सर्वं शक्तिमयं जगत् ।
शक्तिपूजनतो देवि, ब्रह्माण्डं पूजितं भवेत् ॥८९४॥

श्रीमदाद्यशङ्कराचार्यविरचितश्रीयतिदण्डैश्वर्यविधानान्तर्गतः

साधनापादः

टिप्पणी — अस्मिन् पादे ८९४ श्लोकाः सन्ति तेषु १७ श्लोकास्तथा ३२ अर्द्ध-श्लोका अपठिता विद्यन्ते ।

---

१—मातृकावर्णशब्देन उच्यन्तेऽक्षरेण च ।

# यतिदण्डैश्वर्यविधाने

## सिद्धिपादः

१. चक्रराजापरपर्याये श्रीयन्त्रे पश्चिमाम्नायशक्तीनां विवरणम् —

निगमागमसंशुद्धश्चक्रराजो हि वस्तुतः ।
ख्यातिं श्रीयन्त्रनाम्नैव, गतः सर्वत्र दृश्यते ॥ १ ॥
परिपूर्णतमस्यास्य, श्रीचक्रस्य विशेषतः ।
पश्चिमस्था तु चामुण्डा, दक्षिणस्था च चण्डिका ॥ २ ॥[1]
ते चोभे अधराम्नायभूते सत्यौ निरन्तरम् ।
दक्षिणस्यां तु काष्ठायां, तिष्ठतश्चैकरूपतः ॥ ३ ॥
चामुण्डा भद्रकाली च, तदा नैर्ऋत्यनायिका ।
सञ्जायते स्वयं शुद्धा, साधकेभ्यः सुखप्रदा ॥ ४ ॥
दक्षिणस्था तु सा तारा, देवी स्यात् पूर्वदिग्भवा ।
महालक्ष्मीस्तथा चोभे, संयुक्ते भवतो यदि ॥ ५ ॥
तदा त एव जायेते, महालक्ष्मीः सुविश्रुता ।
ददाति सत्फलं भूता, साऽऽग्नेयाम्नायनायिका ॥ ६ ॥
तथा भगवती देवी, पूर्वस्था रक्तदन्तिका ।
उत्तरस्था पञ्चवक्त्रा, महाकाली च विश्रुता ॥ ७ ॥
मिलित्वा तिष्ठतो यत्र, तदा भवति सेश्वरी ।
दशवक्त्रा महाकाली, चेशानाम्नायनायिका ॥ ८ ॥
एवं कुबेरदिक्संस्था, विपरीतेति पूर्विका ।
प्रत्यङ्गिरा भद्रकाली, भक्तानां सिद्धिसाधिका ॥ ९ ॥
पश्चिमस्थाऽत्र सा देवी, या मातङ्गीति शब्द्यते ।
मोहिनीशब्दपूर्वा सा, सिद्धिदात्री सरस्वती ॥ १० ॥
द्वे इमे मिलिते सत्यौ, वायव्याम्नायनायिका ।
महासरस्वती देवी, भूत्वा तत्रैव तिष्ठति ॥ ११ ॥

१—प्रयोगविशेषमाश्रित्य प्रसिद्धव्युत्क्रमः ।



भद्रकाली महालक्ष्मीः, पूर्वोक्ते द्वे इमे तथा ।
दशवक्त्रा महाकाली, सैषा महासरस्वती ॥ १२ ॥ १२ ॥
देव्यश्चेमाश्चतस्रोऽपि, समष्ट्या मिलिताः स्वतः ।
देवी त्रिशक्तिचामुण्डा, भवत्यत्र स्वरूपतः ॥ १३ ॥
वाग्बीजस्यास्ति या शक्तिरधिष्ठात्री स्वरूपिणी ।
भवत्यभयदा सैषा, सप्तशत्याः सुधामयी ॥ १४ ॥
सा हि पूर्वचरित्रस्य, महाकालीति विश्रुताम् ।
सादाख्यां लभते भूता, सेशानाम्नायनायिका ॥ १५ ॥
मायाबीजस्य या शक्तिरधिष्ठात्रीति शब्दिता ।
सा मध्यमचरित्रस्यसाररूपाऽत्र विद्यते ॥ १६ ॥
यां वदन्ति महालक्ष्मीं, साऽऽग्नेयाम्नायनायिका ।
मूले तिष्ठति सन्तुष्टा, भोगैश्वर्यप्रदाऽनिशम् ॥ १७ ॥
तथैव कामबीजस्याधिष्ठात्री शक्तिरुत्तमा ।
साह्युत्तमचरित्रस्य, सारभूतेति कथ्यते ॥ १८ ॥
महासरस्वती सैषा वायव्याम्नायनायिका ।
महाज्ञानप्रदा नित्यं, सन्तोष्टव्या स्वभक्तितः ॥ १९ ॥
चामुण्डा भद्रकाली सा, नैर्ऋत्याम्नायनायिका ।
विच्चे तु पश्चिमाम्नायनायिका कुब्जिकैव हि ॥ २० ॥
तद्बीजजपमन्त्रोक्ता, चामुण्डा च तथेश्वरी ।
बिच्चे च कुब्जिका चैव, पञ्चेमा दिव्यशक्तयः ॥ २१ ॥
तिष्ठन्ति पश्चिमाम्नाये, देव्या कुब्जिकया सह ।
समष्ट्या सङ्गताः सर्वाश्चैकीभूता विशेषतः ॥ २२ ॥

२. नवार्णमन्त्रदेवीनां परं स्वरूपम् ( पूर्वोक्तं समासतः स्फुटयति )

वाग्बीजं प्रथमं तद्धि, महाकालीति कथ्यते ।
मायाबीजं महालक्ष्मीः, सुप्रसिद्धैव वर्तते ॥ २३ ॥

महासरस्वती देवी, कामबीजं प्रकीर्त्यते ।
चामुण्डायै भद्रकाली, चामुण्डैव निगद्यते ॥ २४ ॥
विच्चेपदं कुब्जिका स्यात्, पञ्चेमाः सङ्गता इह ।
नवार्णरूपे तन्मन्त्रे, निषीदन्त्येकरूपतः ॥ २५ ॥
तदन्ते कुब्जिका देव्या, विद्यमानतया पुनः ।
सर्वासां पश्चिमाम्नाये, समावेशोऽस्त्यभीष्टकृत् ॥ २६ ॥

३. पश्चिमाम्नायस्य श्रेष्ठत्वं तद्देवीनां सादिकूट-सूचकत्वं च —

श्रेष्ठोऽतः पश्चिमाम्नायस्तत्रत्यः शाम्भवोऽस्ति यः ।
स एव शाम्भवस्तासां, मत आगमवेदिनाम् ॥ २७ ॥
एताः समष्टिरूपेण, तत्रैकीभूतविग्रहाः ।
सादिकूटस्य सङ्केत-बोधिकाः प्रभवन्त्यहो ॥ २८ ॥
उग्रचण्डा भद्रकाली, कात्यायनी तथैव च ।
महालक्ष्म्याः स्वरूपं ता, धारयन्ति स्थिता इह ॥ २९ ॥
(यत्तृतीयं ततोऽग्रे तु, वाणीदैवतमुत्तमम् ।)
चामुण्डा प्रस्तुता देवी, भोगैश्वर्यप्रदायिनी ।
तिष्ठत्यनाहते चक्रे, विशुद्धे याति चान्ततः ॥ ३० ॥
ततोऽस्मिँल्ललनाचक्रे, गत्वा स्थैर्येण तिष्ठति ।
फलं ददात्यसौ भूयोऽनाहतस्यैव नित्यशः ॥ ३१ ॥
अतो हि पश्चिमाम्नायो, भोगभाग्भिरहर्निशम् ।
सेव्यते पूज्यते भक्त्याऽऽगमतत्त्वज्ञसाधकैः ॥ ३२ ॥
तदेव ज्ञायते सृष्टेः पूर्वरूपं स्वतः स्फुरत् ।
सृष्टिसूत्रकमत्रत्यं, वाग्बीजात्मकमव्ययम् ॥ ३३ ॥
यद्द्वितीयं ततो मायाबीजात्मकमनुत्तमम् ।
तन्मध्यमचरित्रं तु यदध्यायत्रयात्मकम् ॥ ३४ ॥
दृश्यते तत्तु सत्तत्वं, सृष्टिस्थितिलयात्मकम् ।
सत्वरजस्तमोयुक्तं, ध्यानगम्यार्थदर्शनम् ॥ ३५ ॥



तदुत्तमचरित्रन्तु, नवाध्यायैः प्रपूरितम् ।
अव्यक्तमपि जानन्ति, व्यक्तमागमवेदिनः ॥ ३६ ॥
नवतत्त्वात्मकं सृष्टिः, सृष्टिः सृष्टिः स्थितिः पुनः ।
तथा सृष्टिलयश्चैव, स्थितिसृष्टिः स्थितिः स्थितिः ॥ ३७ ॥
एवं स्थितिलयश्चासौ, लयसृष्टिर्लयस्थितिः ।
लयलयात्मकञ्चैव, नवरूपं भवत्यदः ॥ ३८ ॥
विषयेष्वेषु सर्वेषु, पूर्वमात्मकृपा क्षमा ।
या परा भवशक्तिः साऽपेक्षते विबुधैः सदा ॥ ३९ ॥
ततो गुरुकृपाप्राप्तिः, सा देवशक्त्यात्मिका मता ।
पुनश्चेष्टकृपालभ्या, [1]साऽनुग्रह—स्वरूपिणी ॥ ४० ॥
सप्तशत्याः पराम्बायाः, स्तोत्रस्यैतस्य वस्तुतः ।
नवार्णस्यापि मन्त्रस्य, विज्ञेयं तत्त्वमुत्तमम् ॥ ४१ ॥
महात्रिपुरसुन्दर्या, जगन्मातुः कृपां विना ।
न ज्ञायतेऽतिगुप्तं तत्, तयैवाऽत्र प्रकाशितम् ॥ ४२ ॥
एकेन्द्रियमनोवृत्त्या, निगमागमवेदिभिः ।
अवलोक्य हृदाकाशे, ध्येयं पूज्यं प्रयत्नतः ॥ ४३ ॥

४. षट्चक्राणां विभिन्नमुखेन ध्यानविधानम् —

अधोमुखे द्वादशपत्रमेकं,
विचिन्त्य चक्रं हृदये निगूढम् ।
विभावये तत्र परां त्रिशक्ति—
माम्नायविद्याश्च यथाक्रमेण ॥ ४४ ॥
विभावयेच्चापि पुनस्तदन्त—
श्चक्रं षडस्रं शुभकर्णिकावत् ।

---

१—यदि तु गुरुदैवतयोरैक्यं वस्तुतो विभाव्यते तदा शक्त्योर्व्युत्क्रमोऽपि शोभन एव, व्युत्क्रम एव वा तयोरैक्यव्यञ्जकमिति ध्येयम् ।

द्वयोस्तदित्थं स्थितितो यथावत्,
सङ्केतितं स्यादपि सादिकूटम् ॥ ४५ ॥

देव्युवाच —

देव देव महादेव, सृष्टिस्थित्यन्तकारक ।
मूर्ध्नि पद्मं सहस्रारं, रक्तवर्णमधोमुखम् ॥ ४६ ॥
तस्य मध्ये स्थितं ध्यायेद्, गुरुं शान्तं सशक्तिकम् ।
मूलाधारे महाशक्तिं, कुण्डलीरूपधारिणीम् ॥ ४७ ॥
अधोवक्त्र-क्रमेणैव, सर्वपद्मेषु भावना ।
तदा कथं भवेत्तत्र, चिन्तनं गुरुदेवयोः ॥ ४८ ॥
आधारतत्त्वे स्थितिः सा त्वमधोभागे कथम्भवेः ।
... ... ... ... ... ... ... ... ... ... ॥ ४९ ॥

महादेव उवाच —

यथैवोक्तं त्वया देवि, तथैव वीरवन्दिते ॥ ५० ॥
एवमेवानुसन्देहो, जायते नात्र संशयः ।
कथ्यते परमेशानि, सन्देहोच्छेदकारणम् ॥ ५१ ॥
तानि पद्मानि देवेशि, सुषुम्नान्तःस्थितानि च ।
परब्रह्मस्वरूपाणि, शब्दब्रह्ममयानि च ॥ ५२ ॥
तत्सर्वं पङ्कजं देवि, सर्वतोमुखमेव च ।
प्रवृत्तिश्च निवृत्तिश्च, द्वौ भावौ जीवसंस्थितौ ॥ ५३ ॥
प्रवृत्तिमार्गः संसारो, निवृत्तिः परमात्मनि ।
प्रवृत्तिभावचिन्तायामधोवक्त्राणि चिन्तयेत् ॥ ५४ ॥
निवृत्तिमार्गे चिन्त्यानि, सदैवोर्ध्वमुखानि च ।
प्रवृत्तौ च निवृत्तौ च, द्विधा पद्मानि चिन्तयेत् ॥ ५५ ॥
तस्मादूर्ध्वमधोमुखं, भुक्ति-मुक्ति-फलप्रदम् ।
... ... ... ... ... ... ... ... ... ... ॥ ५६ ॥



[१]तत्सर्वं पङ्कजं देवि सर्वतोमुखमेव च ।
प्रवृत्तिभावचिन्तायामधोवक्त्राणि चिन्तयेत् ॥ ५७ ॥
निवृत्तिभावमार्गेषु, सदैवोर्ध्वमुखानि च ।
ऊर्ध्वाधश्चिन्तयेत्प्राज्ञो, भोगमोक्षाभिलाषुकः ॥ ५८ ॥

इत्थं च —

अधोमुखं द्वादशपत्रचक्रं
षट्कोणगर्भं हृदि चिन्तयित्वा ।
विभावयेत् तत्र परां त्रिशक्ति—
माम्नायविद्याश्च यथाक्रमेण ॥ ५९ ॥
तच्चक्रमादौ विभजेच्चतुर्धा,
समन्ततस्तत् त्रिदलक्रमेण ।
ततश्च पूर्वादिदिशश्चतस्रः,
प्रकल्पिताः स्युर्विदिशश्च तत्र ॥ ६० ॥
पूर्वतो भुवनां तत्र, स्वाधिष्ठाननिवासिनीम् ।
ध्यायेद् यथाक्रमं देवि, सृष्टिचक्राधिदेवताम् ॥ ६१ ॥
दक्षिणे दक्षिणां कालीं, मणिपूरनिवासिनीम् ।
ध्यायेत् तथैव सुभगे, स्थितिचक्राधिनायिकाम् ॥ ६२ ॥
पश्चिमे कुब्जिकां देवीमनाहतनिवासिनीम् ।
ध्यायेत् कुण्डलिनीरूपां, संहारक्रमनायिकाम् ॥ ६३ ॥
उत्तरे गुह्यकालीं च, विशुद्धान्तर्व्यवस्थिताम् ।
उपासीत यथायोगमनाख्याचक्रनायिकाम् ॥ ६४ ॥
ऊर्ध्वं पूर्वेशयोर्मध्ये, श्रीबालात्रिपुरां भजेत् ।
आज्ञाचक्रसमासीनामूर्ध्वाम्नायाधिदेवताम् ॥ ६५ ॥
अधःपश्चिमकाष्ठायां, मध्ये तारां भजेत् सुधीः ।
मूलाधारस्थितां देवीमधराम्नायनायिकाम् ॥ ६६ ॥

१ —पूर्वोक्तस्यैव स्पष्टतामाह ।

ईशकोणे महाकालीं, दशवक्त्रां नवार्णगाम् ।
पञ्चाननां महाकालीं, रक्तदन्तां सुयोगजाम् ।। ६७ ।।

आग्नेये तु महालक्ष्मीं, नवार्णातमस्वरूपिणीम् ।
द्वयोस्ताराकमलयोः, शुभसंयोगरूपिणीम् ।। ६८ ।।

नैर्ऋत्ये भद्रकालीं च, नवार्णामेव केवलाम् ।
चिन्तयेद्रक्तचामुण्डां, चण्डिकां मिश्ररूपिणीम् ।। ६९ ।।

महासरस्वतीं वायौ, विपरीतस्वरूपिणीम् ।
प्रत्यङ्गिराभद्रकालीं मोहिनीं वाग्विमिश्रिताम् ।। ७० ।।

मध्ये त्रिशक्तिचामुण्डामुपाम्नायाधिदेवताम् ।
ध्यायेत् पश्चात् कुब्जिकायां, समष्ट्या लयगामिनीम् ।।७१।।

अथ तासां क्रममहं, यथादृष्टं यथाश्रुतम् ।
वक्ष्याम्युपासनासिद्ध्यै ह-क-सादिस्वरूपगम् ।।७२।।

तत्रादौ दक्षिणा काली, मणिपूराधिवासिनी ।
महोग्रतारातत्पश्चान्मूलाधार - निवासिनी ।।७३।।

विचिन्त्या तत आज्ञायां, बालात्रिपुरसुन्दरी ।
एतत्त्रितयमेकत्र, हादिकूटमिति स्मृतम् ।। ७४ ।।

ततो विशुद्धगा ध्येया, गुह्यकाली दशानना ।
स्वाधिष्ठानगता तद्वद्, ध्येया श्रीभुवनेश्वरी ।। ७५ ।।

अनाहते ततो ध्येया, कुब्जिका बहुरूपिणी ।
एतत्त्रितयमेकत्र, कादिकूटमिति स्मृतम् ।। ७६ ।।

नैर्ऋत्ये च ततो ध्येया, भद्रकाली यथोदिता ।
आग्नेये च महालक्ष्मीस्तारा पद्मास्वरूपिणी ।। ७७ ।।

ईशाने च ततो ध्येया, महाकाली यथोदिता ।
महासरस्वती पश्चाद्, यथोक्ता वायुकोणगा ।। ७८ ।।



एतच्चतुष्टयं भद्रे, सादिकूटमिति स्मृतम् ।
मध्ये त्रिशक्तिचामुण्डा, विचिन्त्या चतुरान्वया ।
याति सा विलयं पश्चात्, कुब्जिकायां सहानुगा ।। ७९ ।।

अथ चातो गुह्यकाली, भुवना कुब्जिका ततः ।
दक्षिणा कालिका तारा, श्रीविद्या परमेश्वरी ।। ८० ।।

महाकाली महालक्ष्मीर्महापूर्वा सरस्वती ।
ततस्त्रिशक्तिचामुण्डा, भद्रकालीस्वरूपिणी ।। ८१ ।।

ध्येया पश्चात् कुब्जिकायां, समष्ट्या लयगामिनी ।
लघुक्रमोऽयं देवेशि, चामुण्डाया नवार्णगः ।। ८२ ।।

कामादिदोषरहिता, कादिहादिमतानुगा ।
वाञ्छिता कल्पिता सिद्धिर्मनोरथमयी तथा ।। ८३ ।।

कादिहादिवपुर्यस्या, विहारश्च कुलद्वये ।
सम्प्रदायत्रयं धर्मः, सा षडाम्नायगाऽवतु ।। ८४ ।।

सम्प्रदायत्रयं वक्ष्ये, हादिकादिविभूषितम् ।
कुलद्वयस्थितिर्यस्य, यज्ज्ञानात् साधकः शिवः ।। ८५ ।।

कादिहादिविभेदेन, द्विधाम्नायार्थ - संहृतिः ।
कादिः काली महाशक्तिर्हादिस्त्रिपुरसुन्दरी ।। ८६ ।।

कादित्वाद् ब्रह्मरूपत्वं, हादित्वाच्छिवरूपता ।
चिच्छक्तिः कादिरूपा स्याद्, हादिश्चिद्ज्ञानगोचरा ।। ८७ ।।

चिदानन्दस्वरूपाख्यं, शिवशक्त्यात्मकं महः ।
कादिस्तु कामराजोऽस्ति, हादिर्लोपापुरे (मुद्रे) रिता ।। ८८ ।।

एवं हि शास्त्रसम्मत्या, पारिभाषिकमीरितम् ।
... ... ... ... ... ... ... ... ... ... ।। ८९ ।।

साधनाया उभौ मार्गौ, प्रसिद्धावागमोदितौ ।
प्रवृत्तिमार्गः प्रथमो, द्वितीयश्च निवृत्तिगः ।। ९० ।।

प्रथमः संसृतौ रागं, कारयत्येष निश्चितम् ।
द्वितीयः संसृतेस्त्यागं, भावयत्यत्र निश्चितम् ॥ ९१ ॥
अधोमुखानि यानीह, चक्राणि गदितानि वै ।
तानि चैश्वर्यदान्याहुरेतच्छास्त्रविचक्षणाः ॥ ९२ ॥
यानि शारीरचक्रेषु, प्रोक्तान्यूर्ध्वमुखानि वै ।
तानि मोक्षप्रदान्याहुर्योगशास्त्रविशारदाः ॥ ९३ ॥
विनैश्वर्यं न मोक्षः स्यात्, तस्माद् ध्येयं सुशोभिते ।
अतो योगे द्विधैवाहुश्चक्राणां चिन्तनं शुभम् ॥ ९४ ॥
अधोमुखानां चक्राणां, चिन्तनं ये प्रकुर्वते ।
लक्ष्मीं ते वै प्राप्नुवन्ति, केवलां लोकसौख्यदाम् ॥ ९५ ॥
ऊर्ध्ववक्त्रस्थचक्राणां, चिन्तनं ये प्रकुर्वते ।
सलक्ष्मीकं तु मोक्षं ते, प्राप्नुवन्ति क्रमादिह ॥ ९६ ॥
परं लक्ष्मीप्रभावेण, यदि मार्गे मतिभ्रमः ।
भवेत्तदा तत्पतनं, मोक्षलाभो न जायते ॥ ९७ ॥
तस्मादैश्वर्यसम्प्राप्त्यै, मोक्षलाभाय चात्मनः ।
द्विधैव तेषां चक्राणां, चिन्तनं श्रेयसे भवेत् ॥ ९८ ॥
निवृत्तिर्योगमार्गे तु, सदैवोर्ध्वमुखानि च ।
ऊर्ध्वाधश्चिन्तयेत्प्राज्ञो, भोगमोक्षाभिलाषुकः ॥ ९९ ॥
प्रवृत्तिमार्गः संसारे, निवृत्तिः परमात्मनि ।
प्रवृत्तिमार्गचिन्तायामधोवक्त्राणि चिन्तयेत् ॥१००॥
क्रमेण कूटानीमानि, दद्याद् बीजानि पार्वति ।
अधोनाडीक्रमं चैव, शृणु तत्तदभिख्यया ॥१०१॥
इडा च पिङ्गला चैव, सुषुम्ना तदनन्तरम् ।
गान्धारी हस्तिजिह्वा च, तत्पश्चात् स्यादलम्बुषा ॥१०२॥
ततो विश्वोदरा ज्ञेया, सरस्वत्यप्यनन्तरम् ।
कुहूश्च वारणा चैव, रण्डा पूषाऽत्र शङ्खिनी ॥१०३॥



चित्रा पयस्विनी चापि, मधुमत्यथ चेतना ।
गालिनी धमनी चैव कपिला तत्परा भवेत् ॥१०४॥
विश्वदूता धारिणी च, घोरिणी लम्बिका तथा ।
कैवल्या सर्वशेषे स्यात्, क्रमनाड्य उदीरिताः ॥१०५॥
प्रधानाः प्राणवाहिन्यो, भूयस्तत्र दश स्मृताः ।
इडा च पिङ्गला चैव, सुषुम्ना च तृतीयका ॥१०६॥
गान्धारी हस्तिजिह्वा च, पूषा चैव यशस्विनी ।
अलम्बुषा कुहूस्तत्र, शङ्खिनी च दश स्मृताः ॥१०७॥

५. अथ ब्रह्मनाडी-निरूपणम् —

मूलाधारत्रिकोणस्था, सुषुम्ना द्वादशाङ्गुला ।
मूलार्धच्छिन्नवंशा या, ब्रह्मनाडीति सा स्मृता ॥१०८॥

६. नाडीनां स्थाननिरूपणम् —

इडा च पिङ्गला चैव, तस्याः पार्श्वद्वये गते ।
विलम्बिन्यामनुस्यूते, नासिकान्तमुपागते ॥१०९॥
इडायां हेमरूपेण, वायुर्वामेन गच्छति ।
पिङ्गलायां तु सूर्यात्मा, याति दक्षिणपार्श्वतः ॥११०॥
विलम्बिनीति या नाडी, व्यक्ता नाभौ प्रतिष्ठिता ।
तत्र नाड्यः समुत्पन्नास्तिर्यगूर्ध्वा अधोमुखाः ॥१११॥
तन्नाभिचक्रमित्युक्तं, कुक्कुटाण्ड इव स्थितम् ।
गान्धारी हस्तिजिह्वा च, तस्मान्नेत्रद्वयं गते ॥११२॥
पूषा चालम्बुषा चैव, श्रोत्रद्वयमुपागते ।
शेरानाममहानाडी, तस्माद् भ्रूमध्यमाश्रिता ॥११३॥
विश्वोदरी तु या नाडी, सा भुङ्क्तेऽन्नं चतुर्विधम् ।
सरस्वती तु या नाडी, सा जिह्वान्तं प्रसर्पति ॥११४॥
एकाह्वया तु या नाडी, पीत्वा च सलिलं क्षणात् ।
क्षुधामुत्पादयेद् घ्राणे, श्लेष्माणं सञ्चिनुते सदा ॥११५॥

नाभेरधोगतास्तिस्रो, नाडिकाः स्युरधोमुखाः ।
मलं त्यजेत् कुहूर्नाडी, मूत्रं मुञ्चति वारुणी ॥११६॥
चित्राख्या सीवनी नाडी, शुक्रमोचनकारिणी ।
नाडीचक्रमिति प्रोक्तं, बिन्दुरूपमतः शृणु ॥११७॥
नाडीभेदे मरुद्भेदे, मरुतां स्थानमेव च ।
चेष्टाश्च विविधास्तेषां, ज्ञात्वैव द्विजसत्तम ! ॥११८॥
शुद्धापायेऽस्ति नाडीनां, पूर्वोक्तज्ञानसंयुतः ।
विविक्तदेशमासाद्य, सर्वसम्बन्धवर्जितः ॥११९॥
कृत्वा तु बैन्दवे स्थाने, घ्राणरन्ध्रे निरोधयेत् ।
द्विसप्ततिसहस्राणि, नाडीद्वाराणि पञ्जरे ॥१२०॥

७. अथ नाडीद्वारस्थानयोर्निरूपणं योगनिरूपणञ्च —

सुषुम्ना शाम्भवी शक्तिः, शेषास्त्वन्ये निरर्थकाः ।
हृल्लेखा परमानन्दा, तालुमूले व्यवस्थिता ॥१२१॥
सर्वमार्गेण तिर्यक्स्थां, सुषिरां च विचिन्तयेत् ।
अधश्चोर्ध्वं कुण्डलिन्याः, सर्वद्वारं निरोधयेत् ॥१२२॥
वायुना सह जीवोऽयं, ज्ञानमोक्षमवाप्नुयात् ।
ज्ञात्वा सुषुम्नां तद्भेदं, कृत्वा वायुं च मध्यगम् ॥१२३॥
अत ऊर्ध्वं निरोधे तु, मध्यमां मध्यमध्यगाम् ।
उच्चारयेत्परां शक्तिं, ब्रह्मरन्ध्रनिवासिनीम् ॥१२४॥
आधारपश्चिमे लिङ्गं, कपाटं तत्र विद्यते ।
तस्योद्घाटनमात्रेण मुच्यते भवबन्धनात् ॥१२५॥
सुषुम्नामध्यदेशे तु, गान्धारी वामचक्षुषि ।
दक्षिणे हस्तिजिह्वा च, पूषा कर्णे च दक्षिणे ॥१२६॥
यशस्विनी वामकर्णे, चानने चाप्यलम्बुषा ।
कुहूश्च लिङ्गदेशे तु, मूलस्थाने च शङ्खिनी ॥१२७॥



कुण्डलिन्याः समुद्भूता, गायत्री प्राणधारिणी ।
प्राणविद्या महाविद्या यस्तां. वेत्ति स वेदवित् ॥१२८॥
अधोमुखानि चक्राणि, मिश्रणाच्चक्रयोर्द्वयोः ।
भवन्ति तेषां नामानि, व्यवस्थां च प्रदर्शये ॥१२९॥
ब भ ला उ ऊ ऋ ॠ लृ ॡ ए ऐ न सुवर्णकाः ।
अधोमुखस्याधिष्ठाने, सम्प्रोक्ताश्चक्रवेदिभिः ॥१३०॥
स्वाधिष्ठानगता अत्र, त्रयो वर्णाः समीरिताः ।
विशुद्धस्याष्टवर्णाः स्युरेवमेकादश स्थिताः ॥१३१॥
पञ्चवर्णा अत्र लुप्ता, विशुद्धस्य भवन्ति हि ।
षडेव केवलं ध्येया, ईशाने मण्डले सदा ॥१३२॥
म य र त ण ढ ड फाः, पनौ चैव सुवर्णकाः ।
अधोमुखमणिपूरे, प्रोक्तास्तत्तत्त्वदर्शिभिः ॥१३३॥
स्वाधिष्ठानस्य वर्णाः स्युर्मणिपूरगतास्त्रयः ।
सप्तवर्णाः समाख्याता, एवं दश भवन्ति ते ॥१३४॥
एतेषु द्वौ तनौ लुप्तौ, मणिपूरस्य वर्णितौ ।
एवमष्टौ चिन्तनीया, वर्णा आग्नेयमण्डले ॥१३५॥
त थ द ध न क ख ग घ औ चैव टठौ तथा ।
अधोमुखेऽनाहताख्ये, वर्णाः प्रोक्ता महर्षिभिः ॥१३६॥
पञ्चार्णा मणिपूरस्य, सप्तानाहतगास्तथा ।
संयुज्य द्वादश प्रोक्तास्तेष्वेकोऽस्ति विलुप्तकः ॥१३७॥
स चानाहतगोऽधः स्यादेवमेकादशार्णकाः ।
चक्रे सदा चिन्तनीया, नैरृत्येऽत्र भवन्ति हि ॥१३८॥
अ आ इ ई उ ओ औ, अः घ ङ च छ जास्तथा ।
झ आश्चैवेति विज्ञेया, अधोमुख-विशुद्धके ॥१३९॥
एतेष्वनाहतस्योक्ता, वर्णाः सप्त तथा नव ।
विशुद्धस्य तयोर्योगात्, षोडशार्णा भवन्ति हि ॥१४०॥

'उभयोरत्रैक एक ई औ स्यातामदर्शितौ ।
चतुर्दशैवात्र चिन्त्या, वर्णाः वायव्यकोणके ॥१४१॥
अ छ क द ड य ब लृ वर्णाः सन्त्येषु सुस्थिराः ।
ये सुषुम्नास्पर्शवन्त, ऊर्ध्वाधो - मध्यवर्तिनः ॥१४२॥
द्वयोश्चक्रयोर्वर्णाः स्युर्यावत्संख्यान्विता इह ।
तेषामर्धा एव चिन्त्याः, क्रमो ह्येष सुनिश्चितः ॥१४३॥
यथा विशुद्धानाहतयोर्वर्णयोगेऽष्टविंशतिः ।
चतुर्दश तदर्द्धाः स्युर्वायव्ये मण्डले ततः ॥१४४॥
एतेनैव क्रमेणात्र, चक्रेष्वन्येष्वपि स्थिताः ।
वर्णाश्चिन्तनमायान्ति, तत्र कार्यो न संशयः ॥१४५॥
बाह्योदीच्याः पश्चिमायास्तथान्त-
र्यागो वायव्यस्य मध्ये प्रदिष्टः ।
बाह्यो बाह्यो दक्षिणायास्तथान्त-
र्यागो नैर्ऋत्यस्य मध्ये प्रदिष्टः ॥१४६॥
बाह्यो यागो दक्षिणायाश्च प्राच्या,
अन्तर्यागो वह्निकोणे प्रदिष्टः ।
बाह्याः प्राच्या उत्तरस्यास्तथान्त-
र्यागः प्रोक्तः शम्भुकोणे सुधीभिः ॥१४७॥
सम्प्रदाय-प्रभेदाद्वा, गुरुनिर्दिष्टमार्गतः ।
लुप्तवर्णेषु भेदोऽपि, यत्र तत्र प्रजायते ॥१४८॥
त्रिषष्टिश्चतुःषष्टिर्वा, वर्णाः शम्भुमते मताः ।
प्राकृते संस्कृते वापि, स्वयं प्रोक्ताः स्वयम्भुवा ॥१४९॥
स्वरा विंशतिरेकश्च, स्पर्शानां पञ्चविंशतिः ।
यादयश्च स्मृता अष्टौ, चत्वारश्च यमाः स्मृताः ॥१५०॥

१—अधोमुखपुरुषशरीराभ्यन्तरे सर्वमिदं वर्णितं बोध्यमिति न पुनरुक्तता ।



अनुस्वारो विसर्गश्च, क⌒पौ चापि पराश्रयौ' ।
दुःस्पृष्टश्चेति विज्ञेयो, लृकारः प्लुत एव च ॥१५१॥
चतुर्णामेव चक्राणामैक्याद् यल्लम्बिकाभिधम् ।
चक्रं सम्पद्यते तस्य, चतुःषष्टिदलानि वै ॥१५२॥
भवन्ति मातृकास्तत्र, तावत्यः समुपासिताः ।
ताराया मातृका एव, वर्णरूपेण संस्थिताः ॥१५३॥
त्रिषष्टिवर्णा विख्याताः, सन्ति तत्र महौजसः ।
महाबिन्दुस्तथा पूर्णश्चतुःषष्ट्यङ्कगो मतः ॥१५४॥
सर्वस्याः साधनायाः समुचितविधये सन्ततं देहगानां,
चक्राणां चिन्तनं वै प्रमुखमुपदिशन्त्यागमस्तेष्वपीह ।
चक्राण्यैश्वर्यसिद्धिं प्रददति तरसाऽधोमुखान्येव तस्माद्,
बाह्यान्तर्यागरूपः क्रम इह गदितः सोऽपि सम्यग् विचिन्त्यः ॥

८. प्रणवदीक्षाक्रमः (सर्वसाधकेभ्यः) —

यथा स्वल्पसुखे मग्नो, न प्राप्नोति महत् सुखम् ।
तथा सिद्धौ निमग्नस्य, मुक्तिर्दूरे प्रवर्तते ॥१५६॥
तस्मात् सिद्धीस्तृणीकृत्य, भजेच्छ्रीपरमेश्वरीम् ।
अल्पं तपः क्षणान्नश्येन्-मध्यमं चापि गर्वतः ॥१५७॥
दक्षिणोपासकः काल, ऊर्ध्वः सायुज्यमाप्नुयात् ।
देवतायास्तथा पूर्वं, सारूप्यं लभते परम् ॥१५८॥
सामीप्यं चोत्तरो लोके, पश्चिमेऽवैदिकं फलम् ।
लाभस्त्यागे चोपकारो, ह्यधोमार्गोऽप्युदर्कयुक् ॥१५९॥
एकाम्नायञ्च यो वेत्ति, स मुक्तो नात्र संशयः ।
किं पुनश्चतुराम्नायवेत्ता साक्षाच्छिवो भवेत् ॥१६०॥
चतुराम्नायविज्ञानादूर्ध्वाम्नायः परः प्रिये ।
तस्मात्तदेव जानीयाद्, यदीच्छेत् सिद्धिमात्मनः ॥१६१॥

१. पाणिनीयशिक्षायामेतानि पद्यानि सन्ति ।

सुन्दरी तारिणी काली, क्रमदीक्षाभिगामिनी ।
क्रमपूर्णो महेशानि, क्रमाच्छम्भुर्भविष्यति ॥१६२॥

(१) काद्याम्नाय-क्रमः—

सुन्दरी हादिविद्या च, सादिविद्या च तारिणी ।
कादिविद्या गुह्यकालीमतत्रयविभिन्नगा ॥१६३॥
वाचिको लक्षगुणित, उपांशुः परिकीर्तितः ।
उपांशोः कोटिगुणितो, मानसस्तु प्रशस्यते ॥१६४॥

(२) विद्याक्रमः—

सर्वाम्नायप्रभेदेन, षड्धा विद्याक्रमः स्मृतः ।
पूर्वाम्नाये चोन्मनी च, पूर्णेशी भुवनेश्वरी ॥१६५॥
द्वीपं शाम्भवकं दिव्यं, लिङ्गमूले व्यवस्थितम् ।
आद्या श्यामा दक्षिणा च, दक्षिणाम्नायवर्त्मनि ॥१६६॥
संवर्तशाम्भवं दिव्यं, मणिपूरे व्यवस्थितम् ।
पश्चिमे कुब्जिका वज्रकुब्जिकाऽघोरकुब्जिका ॥१६७॥
सर्वाधिकारविद्याख्यं, शाम्भवं चतुरन्वयम् ।
उपमार्गे महापूर्वा, काली लक्ष्मीः सरस्वती ॥१६८॥
चामुण्डा च महाविद्येश्वराख्यं शाम्भवं हृदि ।
उत्तरे सिद्धिलक्ष्मीश्च, महासिद्धिकरालिका ॥१६९॥
कामकला गुह्यकाली, हंसशाम्भवकण्ठजम् ।
ऊर्ध्वे बाला पञ्चदशी, षोडशी परशाम्भवम् ॥१७०॥

(३) काद्याम्नायक्रमः—

स्वनाभिमथनाद्देवि, स्वकीयरसना पुरा ।
ब्रह्माण्डं गर्भतस्तस्या, जातं दिव्येन योगिना ॥१७१॥
तदारम्य महेशानि, कुब्जादेवीति विश्रुता ।
...................................... ॥१७२॥



काद्याम्नायक्रमं देवि, वक्ष्यामि शृणु सुव्रते ।
गुह्यकाली च भुवना, कुब्जिका वज्रकुब्जिका ॥१७३॥
अघोरकुब्जिका पश्चाच्छाम्भवं चतुरन्वयम् ।
सर्वाधिकारं देवेशि, लघुपूर्णाभिषेचनम् ॥१७४॥
दशवक्त्रा षोडशार्णा, चतुष्पञ्चाशदोर्युता ।
सर्वासां गुह्यकालीनां, सा वै मुख्यतमा स्मृता ॥१७५॥
यथा कामकला काली, गुह्यकाली यथा द्विज ।
यथा छिन्ना तथा तारा, वज्रकपालिनी यथा ॥१७६॥
सिद्धिलक्ष्मीस्तथा देवि, विशेषो नास्ति कश्चन ।
एकैव पूजा विज्ञेया, प्रयोगाश्च तथा द्विज ॥१७७॥

(४) हाद्याम्नायक्रमः—

हाद्याम्नायक्रमं वक्ष्ये, भोगमोक्षप्रदायकम् ।
दक्षिणा कालिका पश्चान्महोग्रतारिणी ततः ॥१७८॥
बाला पञ्चदशी पश्चात्, षोडशी तदनन्तरम् ।
षडन्वयं शाम्भवञ्च, रश्मिहीनञ्च सेचनम् ॥१७९॥
भैरवीयमुदिता कुलपूर्व्वा, देशिकैर्यदि भवेत् कुलपूर्व्वा ।
सैव शीघ्रफलदा भुवि विद्या, दृश्यते पशुजनेष्वपि गोप्या ॥

(५) हादिपञ्चक्रमः –

हादिपञ्चक्रमं वक्ष्ये, दक्षिणाकालिका तथा ।
तारा छिन्ना च बगला, महात्रिपुरसुन्दरी ॥१८१॥

(६) हादिनवक्रमः—

परेश्वरशाम्भवञ्च, लघुपूर्णाभिषेचनम् ।
अयन्तु भक्तिदो दिव्यः, क्रमः सर्वार्थसाधकः ॥१८२॥
हादिनवक्रमं वक्ष्ये, चाद्या श्यामा च दक्षिणा ।
श्रीमदेकजटा पश्चाच्छ्रीमन्नीलसरस्वती ॥१८३॥

महोग्रतारिणी पश्चाद्, बाला पञ्चदशी तथा ।
षोडशीशाम्भवं रश्मिहीनं षडन्वयं स्मृतम् ॥१८४॥
सर्वाधिकारं तत्रैव, लघुपूर्णाभिषेचनम् ।
अयं मुक्तिप्रदो दिव्यः, क्रमः शङ्करसाधितः ॥१८५॥

(७) कादिनवक्रमः—

कादिनवक्रमं वक्ष्ये, प्रत्यक्षफलदायकम् ।
सिद्धिलक्ष्मीः कराली च, श्रीमत्कामकलात्मिका ॥१८६॥
उन्मनी चान्नपूर्णा च, तथा श्रीभुवनेश्वरी ।
कुब्जिका वज्रकुब्जा च, श्रीमहाघोरकुब्जिका ॥१८७॥
रश्मिहीनं शाम्भवं च, पश्चात् सर्वाधिकारकम् ।
लघुपूर्णाभिषेकश्च क्रमः शक्रादिसाधितः ॥१८८॥

(८) सादिक्रमः—

सादिक्रमः संवरौधिमतं दिव्यं शृणु प्रिये ।
पन्नगेशी वज्रपूर्णा, योगिनी विजयेश्वरी ॥१८९॥
एकजटा च नीला च, महानीलसरस्वती ।
उग्रतारा महोग्रा च, महार्या तारिणी तथा ॥१९०॥
नवात्मशाम्भवं ज्ञेयं, ततः पूर्णाभिषेचनम् ।
इयं तु मुक्तिदा विद्या, चीनमार्गेण पूजिता ॥१९१॥

(९) महाक्रमः—

महाक्रममिमं वक्ष्ये, चाद्या श्यामा च दक्षिणा ।
एकजटा च नीला च, महोग्रा शारदा तथा ॥१९२॥
श्रीबालात्रिपुरा श्रीमद्बालात्रिपुरसुन्दरी ।
सिद्धिलक्ष्मीस्तथा सिद्धिकराली कामकालिका ॥१९३॥
उन्मनी चान्नपूर्णा च, भुवनेशी च कुब्जिका ।
वीरकुब्जा तथा वज्रकुब्जिका परमेश्वरी ॥१९४॥

६ कादिनवक्रमः ३ ७. सादिक्रमः ३ ८. महाक्रम ६ ।



पञ्चदशी षोडशी च श्रीमहाषोडशाक्षरी ।
षडन्वयशाम्भवञ्च, महापूर्णाभिषेचनम् ॥१९५॥
पाशुपतत्रयञ्चैव, महाषोढाख्यन्यासकम् ।
अथवा भुवनान्ते च, कुब्जिका वज्रकुब्जिका ॥१९६॥
अघोरकुब्जिकान्ते च, शाम्भवं चतुरन्वयम् ।
सर्वाधिकारं तत्रैव, लघुपूर्णाभिषेचनम् ॥१९७॥

(१०) पूर्णक्रमः—

पूर्णक्रममहं वक्ष्ये, परब्रह्मस्वरूपकम् ।
आद्या श्यामा दक्षिणा च, श्रीमदेकजटा तथा ॥१९८॥
नीला सरस्वती चैव, महोग्रा तारिणी तथा ।
शारदा बाला त्रिपुरा, बाला त्रिपुरसुन्दरी ॥१९९।
सिद्धिलक्ष्मीः सिद्धिपूर्वा, कराली सिद्धिकालिका ।
सिद्धिः कपालिनी श्रीमद्गुह्या कामकलात्मिका ॥२००॥
उन्मनी चान्नपूर्णा च, भुवना भुवनेश्वरी ।
श्रीमद्भुवनपूर्वा च, सुन्दरी सर्वसिद्धिदा ॥२०१॥
महाकाली महालक्ष्मीर्महापूर्वा सरस्वती ।
चामुण्डा कुब्जिकाघोरकुब्जिका वीरकुब्जिका ॥२०२॥
वज्रपूर्वा कुब्जिका च, कुब्जिकाघोरपूर्विका ।
पञ्चदशी षोडशी च, गायत्री ब्रह्मरूपिणी ॥२०३॥
श्रीमहाषोडशी पूर्णशाम्भवञ्च षडन्वयम् ।
सर्वाधिकाररूपा च, गायत्री च चतुष्पदा ॥२०४॥
पाशुपतत्रयं चैव, महापूर्णाभिषेचनम् ।
महाषोढाह्वयो न्यासस्ततः सप्तदशाक्षरी ॥२०५॥
साम्राज्यदीक्षा मेधा च, केवला मुक्तिदायिनी ।
वानप्रस्थाश्रमे पश्चाद्महामेधाऽभिधीयते ॥२०६॥

महासाम्राज्यदीक्षाया, लोके परतरं नहि ।
न न्यास-पूजने तत्र, नियमो नापि विद्यते ॥२०७॥
केवलं धारणान्मुक्तिर्मन्त्रोच्चाराच्छिवो भवेत् ।
एवं सङ्केतमात्रन्तु, कथितं ते मयाधुना ॥२०८॥
गुरुवक्त्राम्बुजादेव, तत्सर्वं ज्ञायते बुधैः ।
तस्मात्सर्वप्रयत्नेन, गोपनीयं त्वया शिवे ॥२०९॥
इयं हिरण्यकशिपूपासिता षोडशाक्षरी ।
पूर्वमप्युद्धृता चैव, साम्प्रतं च समुद्धृता ॥२१०॥
महाप्रलयकर्तृत्वान्नोपास्येयं नृणां प्रिये ।
शतशीर्षायुतकरा, दुर्निरीक्ष्यनराकृतिः ॥२११॥

९. लघुक्रमः —

तत्त्वं परतरं दिव्यं, शाक्तानां हि कलौ युगे ।
षडाम्नायप्रबोधाय, कथयामि लघुक्रमम् ॥२१२॥
यदि दैववशात् पूर्णक्रमं कश्चिन्न विन्दति ।
तदा महाक्रमं कुर्यात्, परब्रह्मपदाप्तये ॥२१३॥
कलौ देववशाद्देवि, सुगुरुश्चेन्न लभ्यते ।
तदा सूक्ष्मप्रकाराख्यं, लघुक्रममथाचरेत् ॥२१४॥
लघुक्रमे गुह्यकाली, भुवना कुब्जिका तथा ।
दक्षिणा कालिका तारा श्रीविद्या परमेश्वरी ॥२१५॥
चामुण्डाया नवार्णञ्च, सर्वदीक्षाप्रदीपनम् ।
एकैकमन्त्रसंयुक्तः, कुर्यात् कौलाभिषेचनम् ॥२१६॥
स्वगुरुक्रममार्गेण, शाम्भवं च समाश्रयेत् ।
... ... ... ... ... ... ... ... ... ... ॥२१७॥
मन्त्राराधनसक्तस्य, प्रथमे वत्सरत्रये ।
जायन्ते बहवो विघ्ना, नियमस्थस्य नारद ॥२१८॥



नोद्वेगं साधको याति, कर्मणा मनसा यदि ।
तृतीयवत्सरादूर्ध्वं, राजानश्च महीभृतः ॥२१९॥
प्रार्थयन्तेऽनुरोधेन, गर्विता अपि मानिनः ।
प्रसादः क्रियतां नाथ, ममोद्धरणकारणम् ॥२२०॥
प्रज्वलन्तञ्च पश्यन्ति, तेजसा विभवेन च ।
अतस्ते मुनिशार्दूल, निष्ठुरं वक्तुमक्षमाः ॥२२१॥
नवमाद् वत्सरादूर्ध्वं, स्वयं सिद्ध्यति मन्त्रराट् ।
... ... ... ... ... ... ... ... ... ... ॥२२२॥
... ... ... ... ... ... ... ... ... ... ॥२२३॥
विद्यां परां कतिचिदम्बरमम्ब केचि-
दानन्दमेव कतिचित् कतिचिच्च मायाम् ।
त्वां विश्वमाहुरपरे वयमामनामः,
साक्षादपारकरुणां गुरुमूर्तिमेव ॥२२४॥
स्त्रिया दीक्षा शुभा प्रोक्ता, मातुश्चाष्टगुणाधिका ।
स्वप्नलब्धा च या विद्या, तत्र नास्ति विचारणा ॥२२५॥
प्रणवोच्चारणाद्धोमाच्छालग्रामशिलार्चनात् ।
ब्राह्मणीगमनाच्चैव, शूद्रश्चाण्डलतां व्रजेत् ॥२२६॥
शूद्रस्य प्रणवोच्चारं, पुराणासम्मतं प्रिये ।
तस्माद्यत्नेन कर्त्तव्यं, तन्त्रोक्तं शूद्रजातिना ॥२२७॥
महाविद्याप्रभावेण, शूद्रो वैश्यत्वमाप्नुयात् ।
प्रणवाद्ये महेशानि, गृह्णीयुः शूद्रजातयः ॥२२८॥
एतद्दीक्षापरं तत्त्वं, सुगोप्यं परमेश्वरि ।
... ... ... ... ... ... ... ... ... ... ॥२२९॥

१०. श्रीविद्याचक्रक्रमाणामवबोधः —

श्रीविद्याचक्रक्रमः साम्प्रतं त्रिप्रकारकः —

१. हयग्रीवक्रमः २. आनन्दभैरवक्रमः ३. दक्षिणामूर्तिक्रमः ।

१. त्रिपुरा २. त्रिपुरेशी ३. त्रिपुरसुन्दरी ४. त्रिपुरवासिनी ५. त्रिपुरा ६. श्रीत्रिपुरमालिनी ७. त्रिपुरासिद्धा ८. त्रिपुराम्बा ९. श्रीविद्यापञ्चदशाक्षरी १०. श्रीविद्याषोडशाक्षरी चेत्ययं हयग्रीवक्रमस्तथाऽयं शुष्कभाव एव भवति । आर्द्र-भावे नैव ।

१. त्रिपुरा २. त्रिपुरेशी ३. त्रिपुरसुन्दरी ४. त्रिपुरवासिनी ५. त्रिपुरा ६. श्रीत्रिपुरमालिनी ७. त्रिपुरासिद्धा ८. त्रिपुराम्बा ९. त्रिपुरभैरवी १०. श्री-विद्या पञ्चदशाक्षरी ११. श्रीविद्याषोडशाक्षरी—अयमानन्दभैरवक्रमोऽस्ति ।

१. त्रिपुरा २. त्रिपुरेशिनी ३. त्रिपुरेशी ४. त्रिपुरसुन्दरी ५. त्रिपुर-वासिनी ६. त्रिपुरा ७. श्रीत्रिपुरमालिनी ८ त्रिपुरासिद्धा ९ त्रिपुराम्बा १०. त्रिपुरभैरवी ११. श्रीविद्यापञ्चदशाक्षरी १२. लघुपाशुपतः १३. मध्यमपाशुपतः १४. महापाशुपतः १५. श्रीविद्याषोडशाक्षरी १६. षडन्वयशाम्भवः १७. पूर्णा-भिषेकः १८ सर्वाधिकारदीक्षा १९. श्रीविद्यासप्तदशी चायं दक्षिणामूर्तिक्रमो विद्यते ।

यथार्थतः शिवत्वप्राप्तये षडाम्नायानामावश्यकता विद्यते तैरेव षडाम्नायै-श्चत्वार उपाम्नाया भूत्वा दशाम्नाया भवन्ति । अतो दशाम्नायानामुपासनाऽऽव-श्यकीति ।

११. मातृका-वर्णनम्—

**अथोभयात्मका वर्णाः, स्युरग्नीषोमभेदतः ।**
**त एव स्युर्विद्या भूयः, सोमेनाग्निविभागतः ॥२३०॥**
**स्वराख्याः षोडश प्रोक्ताः, स्पर्शाख्याः पञ्चविंशतिः ।**
**व्यापकाश्च दशैते स्युः सोमेनाग्न्यात्मकाः क्रमात् ॥२३१॥**
**एषु स्वरा ह्रस्वदीर्घभेदेन द्विविधा मताः ।**
**पूर्वो ह्रस्वः परो दीर्घो, बिन्दुसर्गान्तिमौ मतौ ॥२३२॥**
**आद्यन्तस्वरषट्कस्य, मध्यमं यच्चतुष्टयम् ।**
**वर्णा आगमधनैस्तन्नपुंसकमीरितम् ॥२३३॥**
**तच्चतुष्कं सुषुम्नाख्ये, कुर्यात् प्राणायनस्थितिम् ।**
**दक्षोत्तरस्थे प्राणाख्ये, स्यातां दक्षोत्तरायणे ॥२३४॥**
**दक्षा सव्यस्थिते ह्रस्व-दीर्घाः पञ्चोद्भवन्ति च ।**
**भूतभूतकलाभिस्तदुदयः प्रागुदीरितः ॥२३५॥**



**बिन्दुसर्गौ च यौ प्रोक्तौ, तौ सूर्यशशिनौ क्रमात् ।**
**तयोर्विकारविस्तारः, पुरस्तात् सम्प्रवक्ष्यते ॥२३६॥**
**स्पर्शाख्या अपि ये वर्णाः, पञ्चपञ्चविभेदतः ।**
**भवन्ति पञ्च वर्गास्तदन्त्यश्चात्मा रविः स्मृतः ॥२३७॥**
**चतुर्विंशतितत्त्वाख्यास्तस्माद्वर्णाः परे क्रमात् ।**
**तेन स्पर्शाक्षराः सौराः, प्राणाग्नीलाम्बुखात्मकाः ॥२३८॥**
**व्यापकाश्च द्विवर्गाः स्युस्तथा पञ्चविभेदतः ।**
**शशीनाग्न्युत्थिता यस्मात्, स्वरस्पृग्व्यापकाक्षराः ॥२३९॥**
**तत्त्रिभेदसमुद्भूता, अष्टात्रिंशत्कला मताः ।**
**स्वराः सौम्याः स्पर्शयुग्मैः, सौरा याद्याश्च वह्निजाः ॥२४०॥**
**षोडश द्वादश संख्या, जायन्ते क्रमशः कलाः ।**
**वर्णेभ्य एव तारस्य, पञ्चभेदैस्तु भूतगैः ॥२४१॥**
**सर्वगाश्च समुत्पन्नाः, पञ्चाशत्संख्यकाः कलाः ।**
**[1]तेभ्य एव तु तावत्यः, शक्तिभिर्विष्णुमूर्तयः ॥२४२॥**
**तावत्यो मातृभिः सार्द्धं, तेभ्यः स्यू रुद्रमूर्तयः ।**
**[2]तेभ्य एव तु पञ्चाशत् स्युरोषधय ईरिताः ॥२४३॥**
**याभिस्तु मन्त्रिणः सिद्धिं, प्राप्नुयुर्वाञ्छितार्थदाम् ।**
**अमृता मानदा पूषा, तुष्टिः पुष्टी रतिर्धृतिः ॥२४४॥**
**शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा ।**
**पूर्णा पूर्णामृता कामदायिन्यः स्वरजाः कलाः ॥२४५॥**
**तप(पि)नी ताप(पि)नी धूम्रा,**
**मरीचिर्ज्वालिनी रुचिः ।**
**सुषुम्ना भोगदा विश्व-**
**बोध (धि) नी धार(रि)णी क्षमा ॥२४६॥**

---

१. २. वर्णेभ्य इति ।

कामाद्या वसुदाः सौराष्ठकान्ता द्वादशेरिताः ।
धूम्रार्चिरुष्मा ज्वलिनी, ज्वालिनी विस्फुलिङ्गिनी ॥२४७॥
सुश्रीः सुरूपा कपिला, हव्य-कव्यवहे अपि ।
याद्यार्णयुक्ता वह्न्याद्या, दश धर्मप्रदाः कलाः ॥२४८॥
सृष्टिर्ऋद्धिः स्मृतिर्मेधा, कान्तिर्लक्ष्मीर्धृतिः स्थिरा ।
स्थितिः सिद्धिरकारोत्थाः, कला दश समीरिताः ॥२४९॥
अकारप्रभवा ब्रह्मजाताः स्युः सृष्टये कलाः ।
जरा च पालिनी शान्तिरैश्वरी रतिकामिके ॥२५०॥
वरदा ह्लादिनी प्रीतिर्दीर्घाश्चोकारजाः कलाः ।
उकारप्रभवा विष्णुजाताः स्युः स्थितये कलाः ॥२५१॥
तीक्ष्णा रौद्री भया निद्रा, तन्द्रा क्षुत् क्रोधिनी क्रिया ।
उत्कारी चैव मृत्युश्च, मकाराक्षरजाः कलाः ॥२५२॥
मकारप्रभवा रुद्रजाताः संहृतये कलाः ।
बिन्दोरपि चतस्रः स्युः, पीता श्वेताऽरुणाऽसिता ॥२५३॥
निवृत्तिश्च प्रतिष्ठा च, विद्या शान्तिस्तथैव च ।
इन्धिका दीपिका चैव, रेचिका मोचिका परा ॥२५४॥
सूक्ष्मा सूक्ष्मामृता ज्ञानामृता चाप्यायिनी तथा ।
व्यापिनी व्योमरूपा स्यादनन्ता नादसम्भवा ॥२५५॥
नादजाः षोडश प्रोक्ता, भुक्ति-मुक्ति-प्रदायिकाः ।
केशव - नारायण - माधव - गोविन्द - विष्णवः ॥२५६॥
मधुसूदन - संज्ञश्च, सप्तमः स्यात्त्रिविक्रमः ।
वामनः श्रीधरश्चैव, हृषीकेशस्त्वनन्तरः ॥२५७॥
पद्मनाभस्तथा दामोदराह्वो वासुदेवयुक् ।
सङ्कर्षणश्च प्रद्युम्नः, सानिरुद्धाः स्वरोद्भवाः ॥२५८॥
ततश्चक्री गदी शार्ङ्गी, खड्गी शङ्खी हली तथा ।
मुशली शूलिसंज्ञश्च, भूयः पाशी तथाङ्कुशी ॥२५९॥



मुकुन्दो नन्दजो नन्दी, नरो नरकजिद्धरिः ।
कृष्णः सत्यः सात्त्वतश्च, शौरिः शूरो जनार्दनः ॥२६०॥
भूधरो विश्वमूर्तिश्च, वैकुण्ठः पुरुषोत्तमः ।
बली बलानुजो बालो, वृषघ्नश्च वृषस्तथा ॥२६१॥
हंसो (सिंहो) वराहो विमलो, नृसिंहो मूर्तयो हलाम् ।
कीर्तिः कान्तिस्तुष्टिपुष्टी धृतिः शान्तिः क्रिया दया ॥२६२॥
मेधा च हर्षा श्रद्धाह्वा, लज्जा लक्ष्मीः सरस्वती ।
प्रीती रतिश्च सम्प्रोक्ताः, क्रमेण स्वरशक्तयः ॥२६३॥
जया दुर्गा प्रभा सत्या, चण्डा वाणी विलासिनी ।
विरजा विजया विश्वा, विनदा सुतदा स्मृतिः ॥२६४॥
ऋद्धिः समृद्धिः शुद्धिश्च, भुक्तिर्मुक्तिर्मतिः क्षमा ।
रमोमा क्लेदिनी क्लिन्ना, वसुदा वसुधाऽपरा ॥२६५॥
परा परायणा सूक्ष्मा, सन्ध्या प्रज्ञा प्रभा निशा ।
अमोघा विद्युता चेति, शक्तयः सर्वकामदाः ॥२६६॥
इमाः पञ्चाशदुद्दिष्टा, नमोऽन्ता वर्णपूर्विकाः ।
सधातुप्राणशक्त्यात्मयुक्ता यादिषु मूर्तयः ॥२६७॥
श्रीकण्ठोऽनन्तसूक्ष्मौ च, त्रिमूर्तिरमरेश्वरः ।
अर्घीशो भावभूतिश्च, तिथिः स्थाणुर्हराह्वया ॥२६८॥
झिण्टीशो भौतिकः सद्योजातश्चानुग्रहेश्वरः ।
अक्रूरश्च महासेनः, स्युरेताः स्वरमूर्तयः ॥२६९॥
ततः क्रोधीशचण्डेश - पञ्चान्तकशिवोत्तमाः ।
तथैकरुद्रकूर्मैकनेत्राख्यचतुराननाः ॥२७०॥
अजेशशर्वसोमेश्वराह्वा लाङ्गलिदारुकौ ।
अर्द्धनारीश्वरश्चोमाकान्तश्चाषाढिदण्डिनौ ॥२७१॥
अद्रिर्मीनश्च मेषश्च, लोहितश्च शिखी तथा ।
छगलाण्डद्विरण्डौ च, महाकाल–कपालिनौ ॥२७२॥

भुजङ्गेशः पिनाकी च, खड्गीशश्च वकस्तथा ।
श्वेतो भृगुश्च नकुलौ, शिवः संवर्त्तकस्ततः ॥२७३॥
पूर्णोदरी च विरजा, तृतीया शाल्मली तथा ।
लोलाक्षी वर्त्तुलाक्षी च, दीर्घघोणा तथैव च ॥२७४॥
सुदीर्घमुखीगोमुख्यौ, नवमी दीर्घजिह्विका ।
कुण्डोदर्यूर्ध्वकेश्यौ च, मुखी विकृतिपूर्विका ॥२७५॥
सज्वालोल्काश्रिया विद्यामुख्यः स्युः स्वरशक्तयः ।
महाकालीसरस्वत्यौ, सर्वसिद्धिसमन्विते ॥२७६॥
गौरी त्रैलोक्यविद्या च, तथा मन्त्रात्मशक्तिके ।
भूतमाता लम्बोदरी, द्राविणी नागरी तथा ॥२७७॥
वैखरी मञ्जरी चैव, रूपिणी वीरणी तथा ।
कोटरी पूतना भद्रकाली योगिन्य एव च ॥२७८॥
शङ्खिनीगर्जिनीकालरात्रिकुर्दि(ब्जि)न्य एव च ।
कर्पादिनी महावज्रा, जया चैव सुमेश्वरी ॥२७९॥
रेवती माधवी चैव, वारुणी वायवी तथा ।
रक्षोपधारिणी चान्या, तथैव सहजाह्वया ॥२८०॥
लक्ष्मीश्च व्यापिनी मायेत्याख्याता वर्णशक्तयः ।
इत्युक्तस्त्रिविधो न्यासः क्रमात् सर्वसमृद्धिदः ॥२८१॥
चन्दनकुचन्दनागुरुकर्पूरोशीररोगजलघुसृणाः ।
कंकोलजातिमांसीमुराचोरग्रन्थिरोचनपत्राः ॥२८२॥
पिप्पलबिल्वगुहारुणतृणकलवङ्गाह्वकुम्भिवन्दिन्यः ।
सोडूम्बरी काश्मीरिका स्थिराब्जदरपुष्पिकामयूरशिखाः।२८३
प्लक्षाग्निमन्थसिंहोकुशाह्वदर्भाश्च कृष्णहरपुष्पी ।
रोहिणलण्डकबृहतीपाटलचित्रा तुलस्यपामार्गः ॥२८४॥
शतमूली लता द्विरेफा विष्णुक्रान्ता मुषल्यथाञ्जलिनी ।
दूर्वा श्रीदेवीसहे तथैव लक्ष्मीः सदा भद्रा ॥२८५॥



आदीनामिति कथिता वर्णानां क्रमवशादथौषधयः ।
गुटिका कषायमसितप्रभेदतो निखिलसिद्धिदायिन्यः ॥२८६॥
यथा भवन्ति देहान्ते, ह्यमी पञ्चाशदक्षराः ।
येन येन प्रकारेण, तथा वक्ष्यामि तत्त्वतः ॥२८७॥
समीरिताः समीरेण, सुषुम्नारन्ध्रनिर्गताः ।
व्यक्तिं प्रयान्ति वदने, कण्ठादिस्थानघट्टिताः ॥२८८॥
उच्चैरुन्मार्गगो वायुरुदात्तं कुरुते स्वरम् ।
नीचैर्गतोऽनुदात्तञ्च, स्वरितं तिर्यगा गताः ॥२८९॥
अर्धैकद्वित्रिसंख्याभिर्मात्राभिर्लिपयः क्रमात् ।
सव्यञ्जना ह्रस्वदीर्घप्लुतसंज्ञा भवन्ति ताः ॥२९०॥
अकारैकारयोर्योगादेकारो वर्ण इष्यते ।
तस्यैवैकारयोगेन, स्यादैकाराक्षरं तथा ॥२९१॥
उकारयोगात्तस्यैव, स्यादोकाराह्वयः स्वरः ।
तस्यैवोकारयोगेन, स्यादौकाराह्वयः स्वरः ॥२९२॥
सन्ध्यक्षराः स्युश्चत्वारो, मन्त्राः सर्वार्थसाधकाः ।
लृवर्णो वर्णयोर्व्यक्तिर्लरोः सम्यक् प्रदृश्यते ॥२९३॥
बिन्दु-सर्गात्मनोर्व्यक्तिर्मनसो ह्यजपां वदेत् ।
कण्ठात्तु निःसरन् सर्गः, प्रायोऽचामेकतः परः ॥२९४॥
नश्वरः सर्ग एव स्यात्, सोष्मा सप्राणकस्तु हः ।
ससर्गः श्लेषितः कण्ठे, वायुनाऽकादिमीरयेत् ॥२९५॥
वर्गस्पर्शनमात्रेण, कं स्वरस्पर्शनात् तु खम् ।
स्तोकगम्भीरसंस्पर्शाद्, गघौ ङश्च बहिर्गतः ॥२९६॥
विसर्गतालुगः सोष्मेशं च वर्गञ्च यं यथा ।
ऋटुरेफषकारांश्च, मूर्धगो दन्तगस्तथा ॥२९७॥
लृतवर्गलसानोष्ठावुपूपध्मानसंज्ञकान् ।
दन्तौष्ठाभ्यां वञ्च तत्तत्स्थानतोऽर्णान् समीरयेत् ॥२९८॥

ह्रस्वाः पञ्च परे च सन्धिविकृताः पञ्चाथ बिन्द्वन्तिकाः,
काद्याः प्राणहुताश भू क ख म या याद्याश्चशार्णान्तिका ।
हान्ताः ष क्ष लसाः क्रमेण कथिता भूतात्मकास्ते पृथक्,
तैस्तैः पञ्चभिरेव वर्णदशकैः स्युः स्तम्भनाद्याः क्रियाः ॥२९९
उद्गदादिलला: कोनसौ चतुर्थार्णका वसौ वारः ।
दृष्ट्यैव द्वितीयरक्षा वह्नेरद्वन्द्वयोनि कादि यथाः ॥३००॥
मरुतः कपोलबिन्दु क पञ्चमवर्णाः शहौ तथा व्योम्नः ।
मनुषु परेष्वपि मन्त्री कसेतु कर्माणि तस्य संसिद्धौ ॥३०१॥
स्तम्भनाद्यमथ पार्थिवैरयामक्षरैश्चपरिवर्षणादिकम् ।
दाहशोषणसशून्यतादिकान् वह्निवायुवियदक्षरैश्चरेत्॥३०२॥
दशभिर्दशभिरमीभिर्नमोऽन्तिकैर्द्वन्द्वशश्च बिन्दुयुतैः ।
योनेर्मध्ये कोणत्रितये, मध्ये च संयजेन्मन्त्री ॥३०३॥
पूर्वोक्ताद्बिन्दुमात्रात् स्वयमथरवतन्मात्रतामभ्युपेता–
ऽकारादीन् द्व्यष्टकादीनपि तदनुगतान् पञ्चविंशत्तथैव ।
यादीन् संयुक्तधातूनपि गुणसहितैः पञ्चभूतैश्च ताभि-
स्तन्मात्राभिर्व्यतीत्यप्रकृतिरथहसंज्ञा भवेद् व्याप्य विश्वम्।३०४
अथ प्रणवसंज्ञकं प्रतिवदामि मन्त्रं परं,
सषट्कमपि सार्चनं सहुतक्लृप्ति सोपासनम् ।
अशेषदुरितापहं विविधकामकल्पद्रुमं,
विमुक्तिफलसिद्धिदं विमलयोगिसंसेवितम् ॥३०५॥
आद्यः स्वरः समेतोऽमरेण, सधसप्तमार्गबिन्दुयुतः ।
प्रोक्तः स्यात्प्रणवमनुस्त्रिमात्रकः सर्वमन्त्रसमवायी ॥३०६॥
मन्त्रस्याऽस्य मुनिः प्रजापतिरथच्छन्दश्च देव्यादिका,
गायत्री गदिता जगत्सु परमात्माख्यस्तथा देवता ।
अक्लीबैर्युगमध्यगध्रुवयुतैरङ्गानि कुर्यात् स्वरै-
र्मन्त्रो जातियुतैश्च सत्यरहितैर्वा व्याहृतिभिः क्रमात् ॥३०७॥



विष्णुं भास्वत्किरीटाङ्गदवलययुगाकल्पहारोदराङ्घ्रि,
श्रोणी भूषं सवक्षोमणिमकरमहाकुण्डलामण्डितांसम् ।
हस्तोद्यच्चक्रशङ्खाम्बुजगदममलं पीतकौशेयमाशा–
विद्योतद्भासमुद्यद्दिनकरसदृशं पद्मसंस्थं नमामि ॥३०८॥
दीक्षितो मुनिमिमं शतं लक्षं प्रजपेत् प्रतिहुनेच्च दशांशम् ।
पायसैर्घृतयुतैश्च तदन्ते विप्रभूरुहभवाः समिधो वा ॥३०९
सर्पिः पायसशाली-तिल-समिदाज्यैरनेन यो जुहुयात् ।
ऐहिकपारत्रिकमपि स तु लभते वाञ्छितं फलं न चिरात् ॥
अभ्यर्च्य वैष्णवमथो विधिनैव पीठ-
मावाह्य तत्र सकलार्थकरं मुकुन्दम् ।
अङ्गैः स मूर्तियुगशक्तियुगैः सुरेन्द्र–
वज्रादिकैर्यजतु मन्त्रितमः क्रमेण ॥३११॥
वासुदेवः सङ्कर्षणः, प्रद्युम्नश्चाऽनिरुद्धकः ।
स्फटिकस्वर्णदूर्वेन्द्रनीलाकाराश्च वर्णतः ॥३१२॥
चतुर्भुजाश्च शङ्ख - गदा - पङ्कजधारिणः ।
किरीटकेयूरिणश्च, पीताम्बरधरा अपि ॥३१३॥
सशान्तिश्रीसरस्वत्यौ रतिश्च त्रिदलाश्रिता ।
अच्छः पद्मरागो दुग्धदूर्वावर्णाः स्वलङ्कृताः ॥३१४॥
आत्मान्तरात्मपरमज्ञानात्मानस्तु मूर्तयः ।
निवृत्तिश्च प्रतिष्ठाह्वा, विद्या शान्तिश्च शक्तयः ॥३१५॥
ज्वलज्ज्वालारुचः प्रोक्ता, आत्माद्या मूर्तिशक्तयः ।
इति पञ्चावरणकं, विधानं प्रणवोद्भवम् ॥३१६॥
इत्थं मन्त्री तारमनुं,जापहुतार्चा–
भेदैरङ्गीकृत्य च युञ्ज्यादपि योगान् ।
यैः संलभ्यापीह समग्रां श्रियमन्ते,
शुद्धं विष्णोर्धाम परं प्राप्स्यति योगी ॥३१७॥

करपादमुखादि-विहीनमनारतदृश्यमनन्यगमात्मपदम् ।
यमिहात्मनि पश्यति तत्त्वविदस्तमिमं किल योगमिति ब्रुवते ॥
योगाप्तिदूषणपरं त्वथ कामकोप-
लोभप्रमोहमदमत्सरतेति षट्कम् ।
वैरं जयेत् सपदि योगविदेनमङ्गै-
र्योगस्य धीरमतिरष्टभिरिष्टदैश्च ॥३१९॥
यमनियमासनपवनायामाः प्रत्याहृतिश्च धारणा च ।
ध्यानञ्चापि समाधिः, प्रोक्तान्यङ्गानि योगयोग्यानि ॥३२०॥
सत्यमहिंसा समता, धृतिरस्तेयं क्षमाऽऽर्जवञ्च तथा ।
वैराग्यमिति यमः स्यात्, स्वाध्यायतपोऽर्चनाव्रतानि तथा ३२१
सन्तोषश्च सशौचो नियमः स्यादासनञ्च पञ्चविधम् ।
पद्मस्वस्तिकभद्रकवज्रकवीराह्वयाः क्रमात्तदपि ॥३२२॥
रेचक-पूरक-कुम्भक-भेदात्, त्रिविधः प्रभञ्जनायामः ।
मुञ्चेद्दक्षिणयाऽनिलमथानयेद्वामया च मध्यगया ॥३२३॥
संस्थापयेच्च नाडीस्त्वेवं प्रोक्तानि रेचकादीनि ।
षोडश तद्-द्विगुणचतुःषष्टिमात्रकाणि तानि च क्रमशः ॥
चिदात्मैक्यधृतस्य प्राणस्य स्यात् संहृतिः स्थानात् ।
प्रत्याहारो ज्ञेयश्चैतन्ययुतस्य सम्यगनिलस्य ॥३२५॥
स्थानस्थापनकर्मप्रोक्ता स्याद्धारणेति तत्त्वज्ञैः ।
यो मनसि देवताया, भावः स्यादस्य मन्त्रिणः सम्यक् ॥३२६॥
संस्थापयेच्च तत्रेत्येवं ध्यानं विदन्ति तत्त्वविदः ।
सत्तामात्रं शुद्धं नित्यमपि निरञ्जनञ्च यत्प्रोक्तम् ॥३२७॥
तत्प्रविचिन्त्य च तस्मिंश्चित्तलयः स्यात् समाधिरुद्दिष्टः ।
अष्टाङ्गैरिति कथितैः, पुनराशु निगृह्यतेऽरिरात्मविदा ॥३२८
अथवा शोषण-दाहन-प्लावन-भेदेन-शोधिते देहे ।
पञ्चाशद्भिर्मात्राभेदैर्विधिवत् समानयेत् प्राणान् ॥३२९॥



पञ्चाशदात्मकोऽपि च, कलाप्रभेदेन तार उद्दिष्टः ।
तावन्मात्रा यमनात् कलाश्च विधृता भवन्ति तत्त्वविदः ॥
पूर्वं त्विडया वदने विचिन्तयेद् धूम्रमालिनं बीजम् ।
तेनागतेन देहं, प्रशोषयेत् सान्तराधिंकारचरणम् ॥३३१॥
पिङ्गलया प्रतिमुञ्चेत्, तथैव काशनिभेन रक्तरुचा ।
प्रतिदह्य पूर्वविधिना, मुञ्चेन्नैशाकरेण सुसितेन ॥३३२॥
सम्पूरयेत् सुधामयजलशीकरवर्षिणा तनूं सकलाम् ।
निर्माय मानसेन च परिपूर्णमनाश्चिरं भूयात् ॥३३३॥
सुजीर्णमितभोजनः सुखसमाप्तनिद्रादिकः,
सुशुद्धतलसद्गृहे विरहिते च शीतादिभिः ।
पटाजिनकुशोत्तरे सुविशदे च मृद्वासने,
निमीलितविलोचनः प्रतिविशेत् सुखं प्राङ्मुखः ॥३३४॥
प्रसारितं वामकरं निजाङ्के, निधाय तस्योपरि दक्षिणञ्च ।
ऋजुः प्रसन्नोऽवहितेन्द्रियः सन्नाधारमत्यन्तसमं स्मरेत् स्वम् ॥
तन्मध्यगतं प्रणवं, प्रणवस्थं बिन्दुमपि च बिन्दुगतम् ।
नादं विचिन्त्य तारं, यथा बहूच्चार्य तन्नयेत् सुषुम्नान्तम्॥३३६
तन्मध्यगतं शुद्धं, शब्दब्रह्माऽतिसूक्ष्मतन्तुनिभम् ।
तेजः स्मरेच्च तारात्मकमपि मूलं चराचरस्य सदा ॥३३७॥
ॐकारो गुणबीजं, प्रणवस्तारो ध्रुवश्च वेदादिः ।
आदिरुमध्यो मपरो, नामास्य त्रिमात्रकश्च तथा ॥३३८॥
अस्य तु वेदादित्वात्, सर्वमनूनां प्रयुज्यतेऽथादौ ।
योनिश्च सर्वदेहे, भवति च स च ब्रह्मसर्वसंवादः ॥३३९॥
ऋक् च तदाद्यादिः स्यात्तन्मध्यान्तं यजुश्च मान्तादिः ।
सामादि तस्य भेदा, बहवः प्रोक्ता हि वेदलोकेषु ॥३४०॥
उच्चार्योच्चार्य च तं, क्रमान्नयेदुपरि षड्द्वयान्तान्तम् ।
मनसा स्मृते यदाऽस्मिन् मनो लयं याति तावदभ्यस्येत् ॥३४१

अथवा बिन्दुं वर्तुलमावर्तैस्त्रिभिरुपेतमेवमिव ।
प्रोतं रविबिम्बेन च, समभ्यसेत् स्रुतसुधामयं तेजः ॥३४२॥
अपमृत्युरोगपापजिदचिरेण नृणां सिद्धिदो योगः ।
अथवा मूलाधारे स्थिता प्रभा विसर्पिभेदतन्तुनिभा ॥३४३॥
वदनामृतकरबिम्बं, स्यूताध्याताऽमृताम्बुलवलुलिता ।
स्थावरजङ्गमविषहृद्योगोऽयं नात्र सन्देहः ॥३४४॥
अथवा त्रिबल्यबिन्दुगधाम प्रणवेन समुन्नयेदूर्ध्वम् ।
पीतोर्णातन्तुनिभं, सौषुम्ने नैव वर्त्मना योगी ॥३४५॥
तस्मिन्निधाय चित्तं, विलयं गमयेद्दिनेशसंख्याते ।
पुनरावृत्तिविहीनं निर्वाणपदं व्रजेत् समभ्यासात् ॥३४६॥
अथवादिबीजयोः पुनरुमपि विशेषमपि संहरेद्बिन्दौ ।
बिन्दुं नादे तमपि च, शक्तौ शक्तिं तथैव शान्ताख्ये ॥३४७॥
तेजस्यनन्यगे चितिनिर्द्वन्द्वे निष्कले सदानन्दे ।
सूक्ष्मे च सर्वतोमुखकरपदनयनादिलक्षणेऽलक्ष्ये ॥३४८॥
स्वामिनि संहृत्यैवं, करणेन्द्रियवर्गनिर्गमापेतः ।
प्रविलीनपुण्यपापो, निरुच्छ्वसन् ब्रह्मभूत एव स्यात् ॥३४६।
अथवा योगोपेताः, पञ्चावस्थाः क्रमेण विज्ञाय ।
ताभिर्युञ्जीत सदा, योगी सद्यः प्रसिद्धये मुक्तेः ॥३५०॥
जाग्रत्स्वप्नसुषुप्तितुरीयास्तदन्तिके च तास्तासु ।
स्वैरिन्द्रियैर्यदात्मा, भुङ्क्ते भोगान् स जागरो भवति ॥३५१
संज्ञारहितैरपि तैरस्यानुभवो भवेत् पुनः स्वप्नः ।
आत्मनिरुद्धयुक्ततया नैराकुल्यं भवेत् सुषुप्तिरपि ॥३५२॥
पश्यन्ति परं यदात्मा, निस्तमसा चेतसा तुरीयं तत् ।
आत्मपरमात्मपदयोरभेदतो व्याप्नुयाद् यदा योगी ॥३५३॥
तच्च तुरीयातीतं, तस्यापि भवेन्न दूरतो मुक्तिः ।
अथवा सूक्ष्माख्यायां, पश्यन्त्यां मध्यमाख्यवैखर्योः ॥३५४॥



ससुषुम्नाग्रगयोरपि, युञ्ज्याज्जाग्रदादिभिः पवनम् ।
बीजोच्चारो जाग्रद्बिन्दुः स्वप्नः सुषुप्तिरपि नादः ॥३५५॥
शक्त्यात्मकं तुरीयं, शान्ते लय आत्मनस्तुरीयान्तम् ।
अङ्गुष्ठगुल्फजानु--द्वितयं च गुदञ्च सीवनी मेढ्रम् ॥३५६॥
नाभिर्हृदयं ग्रीवा, स लम्बिकाग्रं तथैव नासा च ।
भ्रूमध्यललाटाग्रं, सुषुम्नाग्रं द्वादशान्तमित्येवम् ॥३५७॥
उत्क्रान्तौ परकाय-प्रवेशने चागतौ च पुनः स्वतनौ ।
स्थानानि धारणायाः, प्रोक्तानि मरुत्प्रयोगविधिनिपुणैः॥३५८
स्थानेष्वेष्वात्ममनःसंयोगसमीकरणकर्मणोऽभ्यासात् ।
अचिरेणोत्क्रान्त्याद्या, भवन्ति संसिद्धयः प्रसिद्धतराः ॥३५९॥
कण्ठे भ्रूमध्ये हृदि, नाभौ सर्वाङ्गके स्मरेत् क्रमशः ।
लवरसमीरट-वर्णैरनिलममाकालवञ्चनेयं स्यात् ॥३६०॥
अवनिजलानलमारुतविहायसां शक्तिभिश्च तद्बीजैः ।
सारूप्यमात्मनश्च, प्रति नीत्वा तत्तदाशु जयति सुधीः॥३६१॥
एवं प्रोक्तैर्योगैराद्यौ जयतोऽन्वहं तथाऽऽत्मानम् ।
अचिरेण भवति सिद्धिः, समस्तसंसारमोचनी नित्या ॥३६२॥
इति योग-मार्गभेदैः, प्रतिदिनमारूढयोगयुक्तधिया ।
सिद्धय उपलभ्यन्ते, मुक्तिपुरीसम्प्रवेशनद्वारा ॥३६३॥
कम्पः पुलकानन्दौ, वैमल्यस्थैर्यलाघवानि तथा ।
सकलप्रकाशवित्त्वेत्यष्टावस्थाः प्रसूचिकाः सिद्धेः ॥३६४॥
त्रैकाल्यज्ञानेहे मनोज्ञताच्छन्दतो मरुद्रोधः ।
नाडीसङ्क्रमणविधिर्वाक्सिद्धिर्देहतश्च देहाप्तिः ॥३६५॥
ज्योतिःप्रकाशनं चेत्यष्टौ स्युः सिद्धयः प्रयोगयुजः ॥३६६॥
अणिमा महिमा च तथा, गरिमा लघिमेशिता वशित्वञ्च ।
प्राप्तिः प्राकाम्यञ्चेत्यष्टैश्वर्याणि योगयुक्तस्य ॥३६७॥

अष्टैश्वर्यसमेतो जीवन्मुक्तः प्रवक्ष्यते योगी ।
योगानुभवमहामृत-रसपानानन्दनिर्भरः सततम् ॥३६८॥
इत्येवं प्रणवविधिः समीरितोऽयं,
भक्त्या तं प्रभजति यो जपादिभेदैः ।
स प्राप्नोत्यनुततनित्यशुद्धबुद्धं,
तद्विष्णोः परमतरं पदं नराग्र्यः ॥३६९॥
अकारश्च उकारश्च, मकारो बिन्दुरेव च ।
अर्द्धचन्द्रो निरोधी च, नादो नादान्त एव च ॥३७०॥
कौण्डली व्यापिनी शक्तिः, समनाश्चेति सामयाः ।
निष्कलं चात्मतत्त्वं च, शक्तिश्चैव तथोन्मना ॥३७१॥
साभासं तद् निराभासं, परतत्त्वमनुत्तमम् ।
षट्त्यागात् सप्तमं प्रोक्तं, लयमालयमुत्तमम् ॥३७२॥
तत्र सर्वे प्रलीनास्तु, तत्समास्तत्प्रसादतः ।
तच्छक्तिबृंहिताः शाक्ताः, परिपूर्णा भवन्ति हि ॥३७३॥
क्रमं तेषां प्रवक्ष्यामि, लीयन्ते सुरसुन्दरि ! ।
अकारं ब्रह्मदैवत्यं, हृदयं यावदध्वनि ॥३७४॥
कलाष्टकेन संयुक्तं, कलयेत्सर्वजन्तुषु ।
सिद्धिर्ऋद्धिर्धृतिर्लक्ष्मीर्मेधाकान्तिर्धृतिः स्वधा ॥३७५॥
सद्यो ब्रह्मकला एताः, पश्चिमं व्याप्य संस्थिताः ।
रजा रक्षा रतिः पाल्या, काम्या तृष्णा मतिः क्रिया ॥३७६॥
वृद्धिर्माया च नाडी च, भ्रामणी मोहिनी तथा ।
वामदेवकला ह्येता, वैष्णवांशे व्यवस्थिताः ॥३७७॥
कण्ठान्तं यावत्तद्व्याप्तमापो व्याप्य स्थितास्त्विमाः ।
तमो मोहा क्षुधा निद्रा, मृत्युर्माया भयं जरा ॥३७८॥
अघोरस्य कला ह्येता, रौद्रांशे तु व्यवस्थिताः ।
ताल्वन्तं यावत्तद्व्याप्तं, तैजसी व्याप्तिरुत्तमा ॥३७९॥



निवृत्तिश्च प्रतिष्ठा च, विद्या शान्तिस्तथैव च ।
पुरुषस्य कला ह्येता, ईश्वरे तु व्यवस्थिताः ॥३८०॥
वाय्वावरणमाश्रित्य, बिन्द्वन्तं यावदुज्ज्वलाः ।
शान्त्यवस्था तु तुर्याख्या, नादान्ते सम्प्रचक्ष्महे ॥३८१॥
व्याप्तिः सादाशिवी सा तु, व्योमाख्या शून्यरूपिणी ।
तारा सुतारा तरणी, तारयन्ती सुतारिणी ॥३८२॥
द्वादशान्तपदारूढास्तुर्यान्तास्तु कलाः स्मृताः ।
ईशानस्य कला ह्येताः, पञ्च वै कारणात्मिकाः ॥३८३॥
स्थूलस्त्वेवं समाख्यातो, ह्यध्वा वै ब्रह्मभूतजः ।
सूक्ष्मं चैवमतो वक्ष्ये, ह्यध्वानं तु यथास्थितम् ॥३८४॥
यश्चार्धचन्द्रः कथितः प्लावको बिन्दुमूर्धनि ।
तच्छक्त्यामृतमुद्दिष्टं, कलायुक्तं महेश्वरि ! ॥३८५॥
ज्योत्स्ना ज्योत्स्नावती चैव, सुप्रभा विमला शिवा ।
अर्धचन्द्र-कला ह्येताः, सर्वज्ञपदसंस्थिताः । ३८६॥
विद्यावरणसम्बद्धा, मन्त्रकोटिविभूषिताः ।
क्रियाशक्तिस्वरूपास्तु, संस्थिता विमलाः शुभाः ॥३८७॥
रुन्धनी रोधनी रौद्री, ज्ञानबोधा तमोपहा ।
निरोधिका कला ह्येताः, सर्वदेवनिरोधिकाः ॥३८८॥
नित्यतृप्ता महाभागा, वामाशक्तिस्वरूपकाः ।
इन्धिका दीपिका चैव, रोचिका मोचिका तथा ॥३८९॥
ऊर्ध्वगामिन्य इत्येताः, कला नादसमुद्भवाः ।
एताः स्वतन्त्रतायुक्ताः, सकले निष्कले स्थिताः ॥३९०॥
कुण्डलाख्या महाशक्तिस्तृतीयाप्युपचर्यते ।
ध्वनिरूपो यदा स्फोटस्त्वदृष्टाच्छिवविग्रहात् ॥३९१॥
प्रसरत्यतिवेगेन, ध्वनिना पूरयञ्जगत् ।
स नादो देवदेवेशः, प्रोक्तश्चैव सदाशिवः ॥३९२॥

ध्वनिरध्वगतो यत्र, विश्राम्यत्यनिरोधितः ।
निरोधिनीतिविख्याता, सर्वदेवनिरोधिका ॥३६३॥
निरुद्धस्य महेशत्वमहिमा न प्रवर्तते ।
असंख्यातास्तु कोट्यो वै, मन्त्राणां तत्र संस्थिताः ॥३६४॥
लभन्ते तत्प्रविष्टा वै, स बिन्दुश्चेश्वरः स्मृतः ।
यदा शिवामृतं मूर्ध्नि, पतति सृष्टिकारणम् ॥३६५॥
आप्यामस्तु भवेत्तेन, सोऽर्धचन्द्र इति स्मृतः ।
संहारः सर्वभूतानां, सृष्टिकारणमेव च ॥३६६॥
मकारो ह्यत्र वै रुद्रो, वर्णसङ्घट्ट उत्तमः ।
यदा स्थितिं च लभते, स्वोन्मुखं सृष्टिकारणम् ॥३६७॥
प्रतिष्ठाख्य उकारस्तु विष्णुः साक्षाद्भवत्यसौ ।
निवृत्तिस्तु यदा सर्वं, निष्पन्नं प्रणवं विभु ॥३६८॥
अकाराख्यं परं धाम, ब्रह्मा स कमलासनः ।
मन्त्रसृष्टिर्भवेदेषा, शिवस्य परमात्मनः ॥३६९॥
ततोऽष्टविधभेदेन, पञ्चाशद्वर्णरूपिणी ।
ज्ञानशक्तिः परा सूक्ष्मा, मातृकां तां विदुर्बुधाः ॥४००॥
सा योनिः सर्वमन्त्राणां, सर्वत्रारणिवत्स्थिता ।
जुहोति वीर्यमतुलममृतं सृष्टिसंयुतम् ॥४०१॥
तेनासौ देवदेवेशो, ह्यमृतेशः परापरः ।
मृत्योरुत्तारयेद् यस्मान्मृत्युजित्तेन चोच्यते ॥४०२॥
जीवनं सर्वभूतेषु, नेत्रभूतं प्रकीर्तितम् ।
समस्तमन्त्रजातस्य, स्वामिवत् परमेश्वरः ॥४०३॥
प्रणवः प्राणिनां प्राणो, जीवनं सम्प्रतिष्ठित ।
गृह्णाति प्रणवः सर्वं, कलाभिः कलयेच्छिवम् ॥४०४॥
षट्प्रकारं महाध्वानं, षट्कारणपदस्थितम् ।
जुहोति विद्यया सर्वं, जुकारेण प्रचोदितम् ॥४०५॥



स्वरूपं यत्स्वसंवेद्यं, सम्यक् सन्तृप्तिलक्षणम् ।
सर्वामृतपदाधारं, सविसर्गं परं शिवम् ॥४०६॥
पूर्णं निरन्तरं तेन, पूर्णाहुत्या तु पूर्णया ।
स्वोच्चारा या स्वभावस्था, स्वस्वरूपा च स्वोदिता ॥४०७॥
इच्छाज्ञानक्रियारूपा, सा चैका शक्तिरुत्तमा ।
तया प्रकुरुते नित्यं, शक्तिमान् स शिवः स्मृतः ॥४०८॥
उद्दीप्ताक्षरसम्बद्धं, तत्त्ववर्णपदात्मकम् ।
भुवनानि कला मन्त्राः, कारणानि षडेव तु ॥४०९॥
ब्रह्मा विष्णुश्च रुद्रश्चापीश्वरश्च सदा शिवः ।
शिवश्चेति स्वशक्त्या तु, षट् त्यागात् सप्तमे लयः ॥४१०॥
ज्ञानशक्तिस्वरूपास्तु, ज्ञाताः सार्वज्ञ्यदायिकाः ।
सूक्ष्मा चैव सुसूक्ष्मा च, ह्यमृतामृतसम्भवा ॥४११॥
व्यापिनी चैव विख्याता, शक्तिस्तत्त्वसमाश्रिताः ।
अलुप्तशक्तिसम्बन्धाच्चिच्छक्तिसमधिष्ठिताः ॥४१२॥
शक्तितत्त्वे स्थिता ह्येताश्चिन्मात्रा अपि लक्षिताः ।
व्यापिनी व्योमरूपा च, ह्यनन्ता नाथसंज्ञिता ॥४१३॥
अनाश्रिता महेशानि, व्यापिन्यस्तु कलाः स्मृताः ।
सर्वज्ञा सर्वगा दुर्गा, सवना स्पृहणा धृतिः ॥४१४॥
समना चेतिविख्याता, एताः शिवकलाः स्मृताः ।
इच्छाशक्तिमधिष्ठाय, इच्छासिद्धिप्रदायिकाः ॥४१५॥
शिवतत्त्वं समाश्रित्य, सुसम्पूर्णार्णवप्रभाः ।
अनन्तशक्तिसंस्थानाः, सूक्ष्माश्चात्यन्तनिर्मलाः ॥४१६॥
क्षेत्रपालात्मकं मन्त्रं, मन्त्रमापन्निवारणम् ।
सूते मातङ्गिनीविद्यां, सिद्धविद्याशुभोदयाम् ॥४१७॥
अनेन क्रमयोगेन, गुणिता शिववल्लभा ।
षट्त्रिशतं च तत्त्वानां, (नि)शैवानां(नि)रचयत्यसौ ।४१८।

अन्यान्मन्त्रांश्च यन्त्राणि, शुभदानि प्रसूयते ।
द्विचत्वारिंशतां मूले, गुणिता विश्वनायिका ॥४१९॥
सा प्रसूते कुण्डलिनी, शब्दब्रह्ममयी विभुः ।
शक्ति ततो ध्वनिस्तस्मान्नादस्तस्मान्निरोधिका ॥४२०॥
ततोऽर्धेन्दुस्ततो बिन्दुस्तस्मादासीत्परा ततः ।
पश्यन्ती मध्यमा वाचि, वैखरीशब्दजन्मभूः ॥४२१॥
इच्छाज्ञानक्रियात्माऽसौ, तेजोरूपा गुणात्मिका ।
क्रमेणानेन सृजति, कुण्डली वर्णमालिकाम् ॥४२२॥
अकारादिसकारान्तां, द्विचत्वारिंशदात्मिकाम् ।
पञ्चाशद्वारगुणितां, पञ्चाशद्वर्णमालिकाम् ॥४२३॥
सूते तद्वर्णतोऽभिन्ना, कला रुद्रादिकान् क्रमात् ।
निरोधिका भवेद्वह्निरर्धेन्दुः स्यान्निशाकरः ॥४२४॥
अर्कः स्यादुभयोर्योगे, बिन्द्वात्मा तेजसां निधिः ।
जाता वर्णा यतो बिन्दोः, शिवशक्तिमयादतः ॥४२५॥
अग्निसोमात्मकास्ते स्युः, शिवशक्तिमयाद्रवेः ।
येन सम्भवमापन्नाः, सोमसूर्याग्निरूपिणः ॥४२६॥
ततो व्यक्ति प्रवक्ष्यामि, वर्णानां वदने नृणाम् ।
प्रेरिता मरुता नित्यं, सुषुम्णारन्ध्रनिर्गताः ॥४२७॥
कण्ठादिकरणैर्वर्णाः, क्रमादाविर्भवन्ति ते ।
एषु स्वराः स्मृताः सौम्याः, स्पर्शाः सौराः शुभोदयाः ।४२८॥
आग्नेया व्यापकाः सर्वे, सोमसूर्याग्निदेवताः ।
स्वराः षोडश विख्याताः, स्पर्शास्ते पञ्चविंशतिः ॥४२९॥
तत्त्वात्मानः स्मृताः स्पर्शा, मकारः पुरुषो यतः ।
व्यापका दश ते काम-धन-धर्म-प्रदायिनः ॥४३०॥
ह्रस्वः स्वरेषु पूर्वोक्तः, परो दीर्घः क्रमादिमे ।
शिवशक्तिमयास्ते स्युर्बिन्दुसर्गावसानकाः ॥४३१॥



बिन्दुः पुमान् रविः प्रोक्तः, सर्गः शक्तिर्निशाकरः ।
स्वराणां मध्यगं यच्च, तच्चतुष्कं नपुंसकम् ॥४३२॥
पिङ्गलायां स्थिता ह्रस्वा, इडायां सङ्गताः परे ।
सुषुम्णामध्यगा ज्ञेयाश्चत्वारो ये नपुंसकाः ॥४३३॥
विना स्वरैस्तु नान्येषां, जायते व्यक्तिरञ्जसा ।
शिवशक्तिमयान् प्राहुस्तस्माद्वर्णान् मनीषिणः ॥४३४॥
कारणात् पञ्चभूतानामुद्भूता मातृका यतः ।
ततो भूतात्मका वर्णाः, पञ्च पञ्च विभागतः ॥४३५॥
वाय्वग्निभूजलाकाशाः, पञ्चाशत्त्रिपथक्रमात् ।
पञ्च ह्रस्वाः पञ्च दीर्घा, बिन्द्वन्ताः सन्धिसम्भवाः ॥४३६॥
पञ्चाशत्-कादयः ष क्ष ल स हान्ताः समीरिताः ।
सोमसूर्याग्निभेदेन, मातृकावर्णसम्भवाः ॥४३७॥
अष्टात्रिंशत्कलास्तत्तन्मण्डलेषु व्यवस्थिताः ।
अमृता मानदा पूषा, तुष्टिः पुष्टी रतिर्धृतिः ॥४३८॥
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा ।
पूर्णा पूर्णामृता कामदायिन्यः स्वरजाः कलाः ॥४३९॥
तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः ।
सुषुम्णा भोगदा विश्वा, बोधिनी धारिणी क्षमा ॥४४०॥
क्रमाद्या वसुदाः सौर्यष्ठकान्ता द्वादशेरिताः ।
धूम्रार्चिरुष्मा ज्वलिनी, ज्वालिनी विस्फुलिङ्गनी ॥४४१॥
सुश्रीः सुरूपा कपिला, हव्यकव्यवहा अपि (इमाः)।
यादीनां दशवर्णानां, कलाधर्मप्रदा इमाः(स्मृताः) ॥४४२॥
अभयेष्टकरा ध्येयाः, श्वेतपीतारुणाः क्रमात् ।
तारस्य पञ्च-भेदेभ्यः, पञ्चाशद्वर्णगाः कलाः ॥४४३॥
सृष्टिर्वृ (ऋ)द्धिः स्मृतिर्मेधा, कान्तिर्लक्ष्मीर्धृतिः स्थिरा ।
स्थितिः सिद्धिरिति प्रोक्ताः, कच-वर्ग कलाः क्रमात् ।४४४।

अकाराद् ब्रह्मणो जातास्तप्तचामीकरप्रभाः ।
एताः करधृताक्षस्रक्पङ्कजद्वयकुण्डिकाः ॥४४५॥
जरा च पालिनी शान्तिरीश्वरी रतिकामुके ।
वरदा ह्लादिनी प्रीतिर्दीर्घाः स्युष्टतवर्गगाः ॥४४६॥
उकारा विष्णोरुत्पन्नास्तमालदलसन्निभाः ।
अभीतिशङ्ख (वर) चक्रेष्टबाहवः परिकीर्तिताः ॥४४७॥
तीक्ष्णा रौद्राभया निद्रा, तन्द्री क्षुत् क्रोधिनी क्रिया ।
उत्कारी मृत्युरेताः स्युः, कथिताः प-य-वर्गगाः ॥४४८॥
रुद्रेण मार्णादुत्पन्नाः, शरच्चन्द्रनिभप्रभाः ।
उद्वहन्त्योऽभयं शूली कपालं बाहुभिर्वरम् ॥४४९॥
ईश्वरेणोदिता बिन्दोः, पीता श्वेताऽरुणाऽसिता ।
अनन्ता च-प-वर्णस्था, जपाकुसुमसन्निभा ॥४५०॥
अभयं हरिणं टङ्कं, दधाना बाहुभिर्वरम् ।
निवृत्तिः सप्रतिष्ठा स्याद्, विद्या शान्तिरनन्तरम् ॥४५१॥
इन्धिका दीपिका चैव, रेचिका मोचिका परा ।
सूक्ष्मा सूक्ष्मामृता ज्ञानामृता चाप्यायिनी तथा ॥४५२॥
व्यापिनी व्योमरूपा स्युरनन्ताः स्वरसंयुताः ।
सदाशिवेन सहिता, नादादेताः सितत्विषः ॥४५३॥
अक्षस्रक्पुस्तकगुणकपालाढ्यकराम्बुजाः ।
न्यासे तु योजयेदादौ, षोडशस्वरजाः कलाः ॥४५४॥
इति पञ्चाशदाख्याताः, कलाः सर्वसमृद्धिदाः ।
श्रीकण्ठानन्तसूक्ष्माश्च, त्रिमूर्तिरमरेश्वरः ॥४५५॥
अधीशो भारभूतिश्चातिधीशः स्थाणुको हरः ।
झिण्टीशो भौतिकः सद्योजातश्चानुग्रहेश्वरः ॥४५६॥
अक्रूरश्च महासेनः, षोडशस्वरमूर्तयः ।
पश्चात् क्रोधीश-चण्डीश-पञ्चान्तक-शिवोत्तमाः ॥४५७॥



अप्येकरुद्रकूर्मैकनेत्राह्वचतुराननाः ।
अजेयाः सर्वसोमेशौ, तथा लाङ्गलिदारुकौ ॥४५८॥
अर्द्धनारीश्वरश्चोमाकान्तश्चाषाढिदण्डिनौ ।
स्युरद्रिर्मीनमेषाख्यौ, लोहितश्च शिखी तथा ॥४५९॥
छगलण्ड - द्विरण्डेशौ, महाकालसवालिनौ ।
भुजङ्गेशपिनाकीशखड्गीशाख्या बकस्तथा ॥४६०॥
श्वेतमृग्वागीशनकुलिशिवाः संव्वर्तकस्ततः ।
एते रुद्राः स्मृता रक्ता, धृतशूलकपालकाः ॥४६१॥
पूर्णोदरी स्याद्विरजा, शाल्मली तदनन्तरम् ।
लोलाक्षी वर्तुलाक्षी च, दीर्घघोणा समीरिताः ॥४६२॥
सुदीर्घमुखीगोमुख्यो, दीर्घजिह्वा तथैव च ।
कुण्डोदर्यूर्ध्वकेशी च, तथा विकृतमुख्यपि ॥४६३॥
ज्वालामुखी तथा ज्ञेया, पश्चादुल्कामुखी तथा ।
सुश्रीमुखी च विधातुः ख्याताः स्युः स्वरशक्तयः ॥४६४॥
महाकालीसरस्वत्यौ सर्वसिद्धिसमन्वितौ ।
गौरी त्रैलोक्यविद्या च, मन्त्रशक्तिस्ततः परम् ॥४६५॥
आत्मशक्तिर्भूतमाता, तथा लम्बो(म्भो)दरी मता ।
द्राविणी नागरी भूयः, खेचरी चापि मञ्जरी ॥४६६॥
रूपिणी वारिणी पश्चात्, काकोदर्यपि पूतना ।
स्याद् भद्रकालीयोगिन्यौ, शङ्खिनी गर्जिनी तथा ॥४६७॥
कालरात्रिश्च कुब्जिन्या, कपर्दिन्यपि वज्रया ।
जया च सुमुखेश्वर्या, रेवती माधवी तथा ॥४६८॥
वारुणी वायवी प्रोक्ता, पश्चाद्रक्षोविदारिणी ।
ततश्च सहजा लक्ष्मीर्व्यापिनी माययान्विता ॥४६९॥
एता रुद्राङ्कपीठस्थाः, सिन्दूरारुणविग्रहाः ।
रक्तोत्पलकपालाभ्यामलङ्कृतकराम्बुजाः ॥४७०॥

केशवनारायणमाधवगोविन्दविष्णवः।
मधुसूदनसंज्ञोऽन्यः, स्यात्त्रिविक्रमवामनौ ॥४७१॥
श्रीधरश्च हृषीकेशः, पद्मनाभस्ततः परम्।
दामोदरो वासुदेवः सङ्कर्षण इतीरिताः ॥४७२॥
प्रद्युम्नश्चानिरुद्धश्च, स्वराणां मूर्तयस्त्विमाः।
पश्चाच्चक्री गदी शार्ङ्गी, खड्गी शङ्खी हली पुनः ॥४७३॥
मुसली शूलिसंज्ञोऽन्यः, पाशी स्यादङ्कुशी पुनः।
मुकुन्दो नन्दजो नन्दी, नरो नरकजिद्धरिः ॥४७४॥
कृष्णः सत्यः सात्वतः(सात्विकः)स्याच्छौरिः शूरो जनार्दनः।
भूधरो विश्वमूर्तिश्च, वैकुण्ठः पुरुषोत्तमः ॥४७५॥
बली बलानुजो बालो, वृषघ्नश्च वृषः पुनः।
हंसो वराहो विमलो, नृसिंहो मूर्तयो हलाम् ॥४७६॥
केशवाद्या इमे श्यामाश्चक्रशङ्खलसत्कराः।
कीर्तिः कान्तिस्तुष्टिपुष्टी, धृतिः क्षान्तिः क्रियादयः ।४७७।
मेधा सहर्षा श्रद्धा स्याल्लज्जा लक्ष्मीः सरस्वती।
प्रीती रतिरिमाः प्रोक्ताः, क्रमेण स्वरशक्तयः ॥४७८॥
जया दुर्गा प्रभा सत्या, चण्डी वाणी विलारि(शालि)नी।
विजया विरजा विश्वा, विनदा सुनदा स्मृतिः ॥४७९॥
ऋद्धिः समृद्धिः शुद्धिः स्याद्, भक्तिर्बुद्धिः[1] स्मृतिः क्षमा।
रमोमा क्लेदिनी क्लिन्ना, वसुधा वसुदाऽपरा ॥४८०॥
परा परायणी सूक्ष्मा, सन्ध्या प्रज्ञा प्रभा निशा।
अमोघा विद्युता चेति, कीर्त्याद्याः सर्वकामदाः ॥४८१॥
एताः प्रियतमाङ्केषु, निषण्णाः सस्मिताननाः।
विद्युद्दामसमानाङ्ग्यः, पङ्कजाऽभयबाहवः ॥४८२॥

१, मुक्ति बुद्धिर्मतिः क्षमा इति पाठान्तरम्



मातृका वर्णभेदेभ्यः, सर्वे मन्त्राः प्रजज्ञिरे।
मन्त्रविद्याविभागेन, त्रिविधा मन्त्रजातयः ॥४८३॥
मन्त्राः पुम्देवता ज्ञेया, विद्याः स्त्रीदेवताः स्मृताः।
पुंस्त्रीनपुंसकात्मानो, मन्त्राः सर्वे समीरिताः ॥४८४॥
पुंमन्त्रा हुं फडन्ताः स्युर्द्विठान्ताश्च स्त्रियो मताः।
नपुंसका नमोन्ताः स्युरित्युक्ता मनवस्त्रिधा ॥४८५॥
शस्तास्ते त्रिविधा मन्त्रा, वश्यशान्त्यभिचारके।
अग्निसोमात्मका मन्त्रा, विज्ञेयाः क्रूरसोमयोः ॥४८६॥
कर्मणोर्वह्नितारान्त्यवियत्प्राणाः समीरिताः।
आग्नेया मनवः सौम्या, भूयिष्ठेन्द्वमृताक्षराः ॥४८७॥
आग्नेया सम्प्रबुध्यन्ते, प्राणे चरति दक्षिणे।
भागेऽन्यस्मिन् स्थिते प्राणे, सौम्या बोधं प्रयान्ति च॥४८८॥
नाडीद्वयं गते प्राणे, सर्वे बोधं प्रयान्ति च।
प्रयच्छन्ति फलं सर्वे, प्रबुद्धा मन्त्रिणां सदा ॥४८९॥
छिन्नादिदुष्टा ये(१)मन्त्राः,पालयन्ति न साधकम्।
छिन्नो रुद्धः शक्तिहीनः, पराङ्मुख उदीरितः ॥४९०॥
बधिरो नेत्रहीनश्च, कीलितः स्तम्भितस्तथा।
दग्धस्त्रस्तश्च भीतश्च, मलिनश्च तिरस्कृतः ॥४९१॥
भेदितश्च सुषुप्तश्च, मदोन्मत्तश्च मूर्च्छितः।
हृतवीर्यश्च हीनश्च, प्रध्वस्तो बालकः पुनः ॥४९२॥
कुमारस्तु युवा प्रौढो, वृद्धो निर्स्त्रिशकस्तथा।
निर्बीजः सिद्धिहीनश्च, मन्दः कूटस्तथा पुनः ॥४९३॥
निरंशसत्वहीनश्च, केकरो बीजहीनकः।
धूमितालिङ्गितौ स्यातां, मोहितश्च क्षुधार्तकः ॥४९४॥
सर्वकालं तु कालस्य, व्यापकाः परमोऽव्ययः।
उन्मन्यन्ते परे योज्ये, न कालस्तत्र विद्यते ॥४९५॥

भूपृष्ठाद् यावदादित्यं, लक्षमेकं प्रमाणतः ।
दशवायुपथा मध्ये त्वयुतायुतसंख्यया ॥४९६॥

एताश्च मातरः पराशक्तिप्रपञ्चव्याप्तिरूपा इत्याह—

उभैव सप्तधा भूत्वा, नामरूपविपर्ययैः ।
एवं स भगवान् देवो, मातृभिः परिवारितः ॥४९७॥
आस्ते परमया लक्ष्म्या, तत्रस्थो द्योतयञ्जगत् ।
शर्वो भवश्च भगवान्, रुद्रः पशुपतिस्तथा ॥४९८॥
ईशानश्चैव भीमश्च, महादेवोग्र एव च ।
उपादानं तु तत्प्रोक्तं, संक्षुब्धं समवायतः ॥४९९॥
तस्माच्छून्यं समुत्पन्नं, शून्यात् स्पर्शसमुद्भवः ।
तस्मान्नादः समुत्पन्नः, पूर्वं वै कथितस्तव ॥५००॥
.................................... ॥५०१॥
अष्टधा स तु देवेशि, व्यक्तः शब्दप्रभेदतः ।
घोषो रावः स्वनः शब्दः, स्फोटाख्यो ध्वनिरेव च ॥५०२॥
झाङ्कारो ध्वङ्कृतश्चैव, अष्टौ शब्दाः प्रकीर्तिताः ।
नवमस्तु महाशब्दः, सर्वेषां व्यापकः स्मृतः ॥५०३॥
नदत्यसौ सदा यस्मात्, सर्वभूतेष्ववस्थितः ।
तस्मात्सदा शिवो देवो, व्यक्तो वै त्वक्रियात्मकः ॥५०४॥
नादाद्बिन्दुः समुत्पन्नः, सूर्यकोटिसमप्रभः ।
स चैव दशधा ज्ञेयो, दशतत्त्वफलप्रदः ॥५०५॥
दशधा वर्णरूपेण, दशदैवतसंयुतः ।
बिन्दोः सदाशिवो ज्ञेयः, सोऽष्टभेदाङ्गसंयुतः ॥५०६॥
पञ्चब्रह्मकलाभिश्च, विद्याङ्गैः शक्तिभिर्युतः ।
पञ्चभिश्च महाज्ञानैर्मूर्तिभिश्च समन्वितः ॥५०७॥
स एवापररूपेण, परमात्मा शिवोऽव्ययः ।
द्विधावस्थः स च ज्ञेयः, सोच्चारोच्चारवर्जितः ॥५०८॥



मुद्रामन्त्रस्वरूपेण, स एव च पुनर्द्विधा ।
क्रियाज्ञानस्वरूपेण, इच्छारूपस्वरूपतः ॥५०९॥
शब्दावबोधरूपेण, वस्तुरूपस्वरूपतः ।
स्थूलसूक्ष्मः परश्चैव, परातीतो निरञ्जनः ॥५१०॥
व्योमरूपस्वरूपेण, समनोन्मन एव च ।
उन्मनातीतो देवेशि, शिवो ज्ञेयः शिवागमे ॥५११॥
उन्मना-समना-स्थानं, शिवेन समधिष्ठितम् ।
पञ्चकारणरूपेण, तदधः पुनरेव सः ॥५१२॥
कारणं पञ्चकं देवि, अधिष्ठाय त्वधस्ततः ।
व्यापकः शक्तिमूर्धस्थो, बिलद्वारमनाश्रितः ॥५१३॥
अनन्तश्च सुषुम्नेशस्त्वनाथश्चोर्ध्वगस्तथा ।
व्योमरूपी महादेवि, बिन्द्वीशः परिकीर्तितः ॥५१४॥
सकालः साम्यसंज्ञश्च, जन्ममृत्युभयापहः ।
ततोप्यूर्ध्वं भ्रमेद् यस्तु कालः स्यात्परमावधिः ॥५१५॥
नित्यो नित्योदितो देवि, अकल्प्यश्च न कल्प्यते ।
स चाधः कलयेत्सर्वं, व्यापिन्यादि-धरावधिम् ॥५१६॥
त्रुट्यादिभिः कलाभिश्च, देव्यध्वानं चराचरम् ।
ऊर्ध्वमुन्मनसो यच्च, तत्र कालो न विद्यते ॥५१७॥
न कल्पः कल्पते कश्चिन् निष्कलः कालवर्जितः ।
यः शाङ्कर्युन्मनातीतः, स नित्यो व्यापकोऽव्ययः ॥५१८॥
नववर्गास्तु ये प्राहुस्तेषां प्राणशतीरवीन् (विः) ।
सत्रिभागैव सङ्क्रान्तिर्वर्गः प्रत्येकमुच्यते ॥५१९॥
पिण्डमन्त्रस्य सर्वस्य, स्थूलवर्णक्रमेण तु ।
अर्धेन्दुबिन्दुनादान्तः, शून्योच्चराद्भवेच्छिवः ॥५२०॥
न शिखा ऋ ॠ ऌ ॡ च, शिरोमालाथ मस्तकम् ।
नेत्राणि च ध वैनाशा, ई समुद्रेणुणुश्रुती ॥५२१॥

ब क वर्ग ई आ वक्रदन्तजिह्वा सुवाची च ।
वभयाः कण्ठदक्षादिस्कन्धयोर्भुजयोर्डढौ ॥५२२॥
ठोहस्तयोर्भ्रऔशाखा, जटौ शूलकपालके ।
पह्वच्छलौ स्तनौ क्षो रमा सजोवो विसर्गयुक् ॥५२३॥
तत्परः कथितः प्राणः, पक्षावुदरनाभिगौ ।
मशताः कोटिगुह्ययोरुयुग्मगा जानुनी तथा ॥५२४॥
एऐकारौ तथा जङ्घे, तत्परौ चरणावुरू ।
अतो विद्याश्च मन्त्राश्च, समुद्धार्या यथा शृणु ॥५२५॥
अथ गन्धादिपूर्वाणां, तन्मात्राणामनुक्रमात् ।
धारणं सम्प्रवक्ष्यामि, तत्फलानां प्रसिद्धये ॥५२६॥
पीतकं गन्धतन्मात्रं, तुर्याश्रं पर्वसम्मितम् ।
नासारन्धाग्रगं ध्यायेद्, वज्रलाञ्छनलाञ्छितम् ॥५२७॥
दशमाद्दिवसादूर्ध्वं, योगिनोऽनन्यचेतसः ।
कोऽपि गन्धः समायाति, द्विधाभूतोऽप्यनेकधा ॥५२८॥
ततोऽस्य ऋतुमात्रेण, शुद्धो गन्धः स्थिरीभवेत् ।
षड्भिर्मासैः स्वयं गन्धमयमेव भविष्यति ॥५२९॥
यो यत्र रोचते गन्धस्तं तत्र कुरुते भृशम् ।
त्र्यब्दात्सिद्धिमवाप्नोति, प्रेरितां पाञ्चभौतिकीम् ॥५३०॥
तदूर्ध्वमात्मनो रूपं, तत्र सञ्चिन्तयेद् हृदि ।
गन्धावरणविज्ञानं, त्रिभिरब्दैरवाप्नुयात् ॥५३१॥
ईषद्दीप्तियुतं तत्र, तन्मण्डलविवर्जितम् ।
ध्यानैः सम्पश्यते सर्वान् गन्धावरणवासिनः ॥५३२॥
धरातत्त्वोक्तबिम्बाभं, तत्रैवमनुचिन्तयन् ।
तत्समानत्वमभ्येति पूर्वं च द्वितयस्थिरे ॥५३३॥
स्वरूपं तत्र सञ्चिन्त्य, भासयन्तमधः स्थितम् ।
तदीशत्वमवाप्नोति, पूर्वोक्तेनैव वर्त्मना ॥५३४॥



धरातत्त्वोक्तवत्सर्वमत ऊर्ध्वमनुस्मरन् ।
तद्रूपं फलमाप्नोति, गन्धावरणसंस्थितम् ॥५३५॥
रसरूपामतो वक्ष्ये, धारणां योगिसेविताम् ।
यया सर्वरसावाप्तिर्योगिनः सम्प्रजायते ॥५३६॥
जलबुद्बुदसङ्काशं, जिह्वायां चाग्रतः स्थितम् ।
चिन्तयेद्रसतन्मात्रं, जिह्वाग्राधारमात्मनः ॥५३७॥
सुशीतं षड्रसं चिन्त्यं, तद्गतेनान्तरात्मना ।
ततोऽस्य मासमात्रेण, रसास्वादः प्रवर्तते ॥५३८॥
वर्णानुक्रमयोगेन, देवताष्टकसंयुता ।
अवर्गः प्रथमो देवि, वशिनी तत्र देवता ॥५३९॥
तत्परस्तु कवर्गो, यस्तत्र कामेश्वरी स्थिता ।
मोदिनी तु चवर्गस्था, टवर्गे विमला तथा ॥५४०॥
अरुणा तु तवर्गस्था, पवर्गे जयिनी स्थिता ।
सर्वेश्वरी यवर्गे तु शवर्गे कौलिनीति च ॥५४१॥
एता वर्गाष्टके देवि, अष्टौ वै वाग्देवताः ।
अर्चिताः पुरुषस्याशु, प्रकुर्वन्ति वशं जगत् ॥५४२॥
चतुर्दशस्वरोपेता, बिन्दुत्रयविभूषिता ।
कलामण्डलमास्थाय, शक्तिरूपं महेश्वरि ॥५४३॥
ककारादिक्षकारान्ता, वर्णास्तु शक्तिरूपिणः ।
व्यञ्जनत्वात्सदानन्दोच्चारणैः सह ते यतः ॥५४४॥
उच्चारे स्वरसम्भिन्नास्ततो देवि न संशयः ।
पञ्चाशद्वर्णभेदेन, शब्दाख्यं वस्तु सुव्रते ॥५४५॥
अकारः प्रथमं देवि, क्षकारोऽन्त्यस्ततः परम् ।
अक्षमात्वेति विख्याता, मातृकावर्णरूपिणी ॥५४६॥
शब्दब्रह्मस्वरूपेयं, शब्दातीतं तु जप्यते ।
शब्दातीतं परं धाम, गणनारहितं सदा ॥५४७॥

आत्मस्वरूपं जानीहि, ईशस्तु परमेश्वरः ।
कथयामि वरारोहे यन्मया जायते सदा ॥५४८॥
....................................... ।
अकारादिक्षकारान्ता, मातृकावर्णरूपिणी ॥५४९॥
प्रणवस्य व्याहृतीनामतः सम्बन्ध उच्यते ।
अकारो भूरुकारस्तु, भुवो मार्णः स्वरीरितः ॥५५०॥
बिन्दुर्महस्तथा नादो, जनः शक्तिस्तपः स्मृतम् ।
शान्तं सत्यमिति प्रोक्तं, यत् स्यात् परतरं परम् ॥५५१॥
स्वामिन् प्रसीद विश्वेश के वयं केन भाविताः ।
किं मूलाः किं क्रियाः सर्वमस्मभ्यं वक्तुमर्हसि ॥५५२॥
इति पृष्टं परं ज्योतिरुवाच प्रमिताक्षरम् ।
यूयमक्षरसम्भूताः सृष्टिस्थित्यन्तहेतवः ॥५५३॥
तैरेव विकृतिं यातास्तेषु वो जायते लयः ।
इति तस्य वचः श्रुत्वा, तमपृच्छत्सरोजभूः ॥५५४॥
अक्षरं नाम किं नाथ, कुतो जातं किमात्मकम् ।
इति पृष्टो हरिस्तेन, सरोजोदरयोनिना ॥५५५॥
मूलार्णमर्णविकृतीर्विकृतेर्विकृतीरपि ।
तत्प्रभिन्नानि मन्त्राणि, प्रयोगश्च पृथग्विधान् ॥५५६॥
वैदिकांस्तान्त्रिकांश्चापि, सर्वान्नित्यमुवाच ह ।
प्रकृतिः पुरुषश्चैव, नित्यौ कालश्च सत्तम ॥५५७॥
अणोरणीयसी स्थूलात्, स्थूला व्याप्तचराचरा ।
आदित्येन्द्राग्नितेजोमद्यद्यत्तत्तन्मयो विदुः ॥५५८॥
न श्वेतरक्तपीतादि-वर्णैर्निर्धार्य चोच्यते ।
न गुणेषु न भूतेषु, विशेषेण व्यवस्थिता ॥५५९॥
अन्तरन्तर्बहिश्चैव, देहिनां देहपूरणी ।
स्वसंवेद्यस्वरूपा सा, दृश्या देशिकदर्शितौ ॥५६०॥



ययाकाशस्त्रयो वापि, लब्धया नोपलभ्यते ।
पुंनपुंसकयोस्तुल्याऽप्यङ्गनासु विशिष्यते ॥५६१॥
प्रधानमिति यामाहुर्या शक्तिरिति कथ्यते ।
यायुष्मानपि मां नित्यमवष्टभ्यातिवर्तते ॥५६२॥
साऽहं यूयं तथैवाऽन्यद्वेद्यं तत्तु सा स्मृता ।
प्रलये कम्प्यते तस्यां, चराचरमिदं जगत् ॥५६३॥
सैव स्वं वेत्ति परमा, तस्या नान्योऽस्ति वेदिता ।
सा तु कामात्मना सम्यङ्, मयैव ज्ञायते सदा ॥५६४॥
अ क च ट त प याद्यैः सप्तभिर्वर्णवर्गै–
विरचितमुखबाहापादमध्याख्यहृत्का ।
सकलजगदधीशा शाश्वता विश्वयोनि–
वितरतु परिशुद्धिं चेतसः शारदा वः ॥५६५॥
ब्रह्माणी माहेशी, कौमारी वैष्णवी च वाराही ।
इन्द्राणी चामुण्डा, समहालक्ष्मीश्च मातरः प्रोक्ताः ॥५६६॥
यां ज्ञात्वा सकलमपास्य कर्मबन्धं–
तद्विष्णोः परमपदं प्रयाति लोकः ।
तामेतां त्रिजगति जन्तुजीवभूतां,
हृल्लेखां जपत च नित्यमर्चतालम् ॥५६७॥
नित्योदिते सहस्राणि, एकविंशच्छतानि षट् ।
द्विके दशसहस्राणि, तथाष्टौ च शतानि तु ॥५६८॥
त्रिके सप्तसहस्राणि, द्विशतीत्युदयः स्मृतः ।
चतुष्के तु सहस्राणि, पञ्चतुर्याशतानि तु ॥५६९॥
पञ्चाक्षरे सहस्राणि, चत्वारि त्रिशतोदयः ।
विंशाधिकः समाख्यातो, ज्ञेयश्चोदयवाहिभिः ॥५७०॥
षट्के तु त्रिसहस्राण्यः, षट् शतान्तोदयस्ततः ।
सप्तके त्रिसहस्रं तु, षडशीत्यधिकं स्मृतम् ॥५७१॥

अष्टोत्तरशते चक्रे, मन्त्रपिण्डाक्षरात्मके ।
द्विशतात्मने पुनः प्रोक्त, उदयः सर्वसिद्धिदः ॥५७२॥
नाभ्यधो मेढ्रकन्दे च, स्थिता वै नाभिमध्यतः ।
तस्माद् विनिर्गता नाड्यस्तिर्यगूर्ध्वमधः प्रियः ॥५७३॥
चक्रवत्संस्थितास्तत्र, प्रधाना दश नाडयः ।
द्वासप्ततिसहस्राणि, नाड्यस्ताभ्यो विनिर्गताः ॥५७४॥
पुनर्विनिर्गताश्चान्या, आभ्योऽप्यन्याः पुनः पुनः ।
यावत्यो रोमकोटचस्तु, तावत्यो नाडयः स्मृताः ॥५७५॥
यथा पर्णपलाशस्य, व्याप्तं सर्वत्र तन्तुभिः ।
षट्शतानि वरारोहे, सहस्राण्येकविंशतिः ॥५७६॥
अहोरात्रेण बाह्येन, अध्यात्मं तु सुराधिपे ।
शतानि त्रीण्यहोरात्राः, षष्टिरेव तथाधिकाः ॥५७७॥
वर्षमेतत् समाख्यातं, बाह्ये वैघटिका च सा ।
चतुर्विंशतिसंक्रात्याः, समाख्याताः स्वभावतः ॥५७८॥
शतानि नव वै हंस, एकमेकां वहेत्सदा ।
बाह्ये चैव त्वहोरात्रे, अध्यात्मं तु वरानने ॥५७९॥
चतुर्विंशति संक्रान्तीः, प्राणहंसस्तु सङ्क्रमेत् ।
अहनि द्वादश प्रोक्ता, रात्रौ वै द्वादश स्मृताः ॥५८०॥
षट्शतानि दिवा रात्रौ, सहस्राण्येकविंशतिः ।
जापो देव्याः समुद्दिष्टः, सर्वदा सुलभो जडैः ॥५८१॥
पञ्चप्रणवसंयोगाज्जपतः सिद्धचति ध्रुवम् ।
पञ्चपञ्चकसंयुक्तो, देहे सकलनिष्कलः ॥५८२॥
ह्रस्वदीर्घप्लुतं सूक्ष्ममतिसूक्ष्मपरं शिवम् ।
प्रणवं पञ्चधा ज्ञात्वा. भित्त्वा मोक्षो न संशयः ॥५८३॥
ऊर्ध्ववक्त्रः स्थितो भानुश्चन्द्रश्चाधोमुखः स्थितः ।
शक्तेर्मध्योर्ध्वभागे तु ............यत्प्रकीर्तितम् ॥५८४॥



यदा तु प्रणापानयातायातं परिहारेण ।
हृदि द्वादशान्ते च विश्रान्तिः क्रियते च तदा ॥५८५॥
तदा तदा हृद्युन्मन्यन्त इति प्राणापानप्रथमपदे ।
द्वादशान्ते हृदि च परतत्त्वानुभवे विश्राम्यति ॥५८६॥
उन्मन्यन्ते इत्यभिदधद्द्वादशान्तविभिन्ना ।
हृदि व्याप्तिरस्तीति दर्शयति ॥५८७॥
ध्यानयुक्तस्य षण्मासात्सर्वज्ञत्वं प्रवर्तते ।
कालत्रयं विजानाति. कालयुक्तस्तु योगवित् ॥५८८॥
विज्ञानं श्रवणं दूरान्मननं चावलोकनम् ।
हतमृत्युर्जरां त्यक्त्वा, रोगैः सर्वभयोज्झितः ॥५८९॥
सर्वैश्वर्यगुणावाप्तिर्भवेत्कालजयात्सदा.
दक्षनासापुटे ध्यात्वा, वाहनैश्वर्यमवाप्नुयात् ।
सकलो ग्रहसंयुक्तो निष्कलो भावमाश्रितः ॥५९०॥
तद्योगादपि तद्बीजं, सर्वबीजप्ररोहकम् ।
तत्र मन्त्राश्च वर्णाश्च, प्रतिष्ठां यान्ति नान्यथा ॥५९१॥
जपः प्राणसमः कार्यो, दिनस्थो मुक्तिकाङ्क्षिभिः ।
संहारः स तु विज्ञेयः, शिवधामफलप्रदाः ॥५९२॥
व्योम्नि प्राप्तो यदा नादः, पुनरेव निवर्तते ।
शर्वरी साः तु विज्ञेया, हृदब्जं यावदागतः ॥५९३॥
सृष्टिरेषा समाख्याता सर्वसिद्धिफलोदया ।
........................................ ॥५९४॥

१२, नादभेदः —

नादस्थं पञ्चधा चैव, शक्तिस्थं पञ्चधा पुनः ।
ईषदुद्घाटिते वक्त्रे, तदा नादं विजानता ॥५९५॥
व्यापिन्याः पञ्चधा चैव, समनानिष्कलात्मनोः ।
उन्मना च परं तत्त्वं, सर्वं व्याप्य व्यवस्थितम् ॥५९६॥

एवं ज्ञात्वा विमुच्यन्ते, शिवतत्त्वविदो जनाः ।
अन्यथा नैवमुच्यन्ते, बिन्द्वन्ते ये व्यवस्थिताः ॥५६७॥
ज्योतीरूपं तु बिन्दुस्थं, नादस्थं शब्दरूपकम् ।
शक्तिस्थं स्पर्शगं चैव, तदूर्ध्वगं शून्यरुपकम् ॥५६८॥
ब्रह्मादिपञ्चकं यच्च, तेषां शून्यं च तत्पदम् ।
परापरविभागेन, ते सर्वत्र व्यवस्थिताः ॥५६६॥
शून्यातीतं तु समना, शुद्धात्मा तून्मना तथा ।
सर्वतीतं परं तत्त्वं, सर्वं व्याप्य व्यवस्थितम् ॥६००॥
मन्त्ररूपाश्च विज्ञेया, बिन्दु-धर्मास्तु देवताः ।
तत्रस्थाः सर्वकर्माणि, साधयन्ति न संशयः ॥६०१॥
तत्त्वं चोन्मनात्मा तु, समना शून्यमेव च ।
स्पर्शश्चैव तथा शब्दो, रूपं च तदनन्तरम् ॥६०२॥
मन्त्रात्मनि स्थिताः सर्वे, ज्ञातव्या दैशिकेन तु ।
तत्रस्था ज्ञानयोगं च, प्रयच्छन्ति वरानने ॥६०३॥
कर्मकाले तु सकलाः, शिरःपाण्यादिभिर्युताम् ।
जपे तु सकलान् देवि, निष्कलेन समन्वितान् ॥६०४॥

१३. नादज्ञानम्—

स चन्द्रो विद्यमानोऽपि, अपानो हृदि मध्यमः ।
यदा वोत्सन्नतां याति, जीवादित्यो न चोद्गमेत् ॥६०५॥
प्रभाति कीर्तिर्विज्ञेया, आत्मतत्त्वप्रबोधिनी ।
क्षपा शशी तथाऽपानो, नाद एकत्र तिष्ठति ॥६०६॥
तुल्यार्थज्ञानमहसा, सन्ध्या वै समुदाहृता ।
ऊर्ध्ववक्त्रस्थितो भानुश्चन्द्राधिमुखास्थितः ॥६०७॥
तदन्तराले उदितस्तात्वाकाशान्ते गोचरे ।
प्रमाणरहितो भाव्यः, सुशान्तः शान्तबोधनात् ॥६०८॥



व्योमपद्मो स वह्निस्तु, तुर्य्यार्धकालकल्पनात् ।
मध्याह्निकी तु विज्ञेया, सन्ध्या मोक्षप्रदायिनी ॥६०६॥
व्योममध्यस्थितः सूर्यः, परादित्ये हि कथ्यते ।
अनस्तमितसारो हि, जन्तुचक्रप्रबोधकाः ॥६१०॥
बिन्दुःप्राणोऽप्यहश्चैव, रविरेकत्र तिष्ठति ।
सुप्रशान्तं तु संतिष्ठेन्मनोऽप्यावृत्तिर्वजितः ॥६११॥
कृत्वा प्रशान्तभूमौ च, स्वरूपं सन्धिदेशतः ।
महासन्ध्या तु विज्ञेया, तृतीया परिकीर्तिता ॥६१२॥
तया निबद्धया देहे, संनिधाय गुणेश्वरः ।
विदध्युः साधकेन्द्राणां, देवि नास्त्यत्र संशयः ॥६१३॥
पदानि मन्त्रारब्धानि, मन्त्रा वर्णैकविग्रहाः ।
वर्णाःस्वनिष्ठा इत्येषां, स्थूलसूक्ष्मपरात्मता ॥६१४॥
भुवनव्यापिता तत्त्वेष्वनन्तादिशिवान्तके ।
कालान्तर्भाविनस्ते वै, निवृत्त्याद्यास्तु ताः कलाः ॥६१५॥

१४. साधनायाः कालज्ञानम्—

मानुषाक्षिनिमेषस्य, अष्टांशो हि क्षणः स्मृतः ।
क्षणद्वयं त्रुटिर्ज्ञेयं, तद्द्वयं तु लवः स्मृतः ॥६१६॥
लवद्वयं निमेषस्तु, ज्ञातव्यो गणितक्रमात् ।
दश पञ्च निमेषास्तु, काष्ठा चैव प्रकीर्तिता ॥६१७॥
आध्यात्मिका होरागणे, बाह्ये काष्ठा विधीयते ।
अमृतं चन्द्ररूपेण, द्विधा षोडशधा पुनः ॥६१८॥
पिबन्ति च सुराः सर्वे, दश पञ्च पराः कलाः ।
तस्यार्धपौर्णमासी तु, प्रतिपद्दर्शेन संस्थिता ॥६१६॥
हृत्पद्मसन्धिमध्ये तु, सोमस्य ग्रहणं भवेत् ।
पक्षद्वयेऽपि ग्रहणं, भवेद्वै सर्वदेहिनाम् ॥६२०॥

एवमेव समाख्यातं, यावदायुर्वरानने ।
अर्थंवाध्यात्माहोरात्रे, त्वया ह्युदय उच्यते ।।६२१।।
हृत्पद्मादूर्ध्वपर्यन्तं, राशयः षड् व्यवस्थिताः ।
अङ्गुलैः षड्भिरेकैको, हृत्पद्मोदितशक्तितः ।।६२२।।
अङ्गुले अङ्गुले ह्यक्ष-तिथयः पञ्च संस्थिताः ।
तस्याप्यर्धदिनं पूर्वमपरार्धनिशा भवेत् ।।६२३।।
षट्पञ्चकास्तिथीनां ये, तेऽहोरात्रास्तु मासिकाः ।
त्रिशता तैरहोरात्रैर्द्विपक्षो मास उच्यते ।।६२४।।
मासि राश्युदये ह्येष, अधोर्ध्वप्राणसंचारे ।
हृदयादुदयस्थानात्, संक्रान्तिर्मकरे स्थिताः ।।६२५।।
षडङ्गुलान्यधस्त्यक्त्वा, कुम्भे सङ्क्रमते पुनः ।
कण्ठोर्ध्वे द्व्यङ्गुलं त्यक्त्वा, मीने सङ्क्रमते पुनः ।।६२६।।
गलोर्ध्वाद्यावत्तालबन्तं, त्यक्त्वा मेषेऽथ सङ्क्रमेत् ।
नासान्ते यावत्संक्रान्तिरङ्गुलानि षडेव हि ।।२२७।।
एषा वै विषुसंक्रान्तिरुत्तरे चास्त्यवस्थिता ।
जपहोमार्चनध्यानान्महाभ्युदयकारिका ।।६२८।।
नासाग्रे तु परित्यज्य, प्राणहंसो वृषे चरेत् ।
षडङ्लानि संत्यज्य, सङ्क्रमेन्मिथुने पुनः ।।६२६।।
शक्त्यान्तं यावदध्वानं संक्रान्तिर्मिथुने स्मृता ।
मकराच्च समारभ्य, मिथुनान्तं च सुव्रते ।।६३०।।
उत्तरायणमत्रैते, दैहिकीसिद्धिवर्जितम् ।
दक्षनामा तु यो रुद्रः, कथितोऽत्र महेश्वरि ।।६३१।।
कार्तिकमासमखिलं, स तु भुङ्क्ते महेश्वरि ।
चण्डो मार्गशिरोमासि, हरः पोषे तु कीर्तितः ।।६३२।।
शाण्डी तु माघमासे च, प्रमथः फाल्गुने तथा ।
भीमश्चक्रो समाख्यातो, वैशाखो मन्मथः स्मृतः ।।६३३।।



शकुनिर्ज्येष्ठमासे तु, आषाढे सुमतिस्तथा ।
नन्दोऽथ श्रावणे मासि, भाद्रे गोपालकस्तथा ।।६३४।।
पितामहश्च वीरेशो, मास्याश्वयुजस्य च ।
सङ्क्रान्तयो द्वादशाऽत्र, क्रमशश्च प्रकीर्तिताः ।।६३५।।
........................................... ।
द्वादशाब्दोदगे प्राणे, वत्सरास्ते प्रकीर्तिताः ।।६३६।।
मणिपूरस्य बाह्ये तु, नाभिपद्मं मनोहरम् ।
अष्टपद्ममथावृत्ता, मध्ये कुण्डं तु दुर्लभम् ।।६३७।।
चतुरस्रादिकं देवि, तत्कुण्डं कामकस्यकम् ।
एवं कुण्डं महेशानि, नालत्रयविभूषितम् ।।६३८।।
ऊर्ध्वनालं सहस्रारे, परामृतविभूषितम् ।
मध्यनालं नाभिमध्ये, मूलाधारे च सुन्दरि ।।६३६।।
विराजते ह्यधोनालं, सदानन्दमयं शिवे ! ।
होमकुण्डमिदं देवि, सर्वतन्त्रे प्रकीर्तितम् ।।६४०।।
तत्पद्मेन भवेत् पुण्यं, वृत्तपुण्यं लूनयुतं ।
त्रिपत्रं .................. बाह्ये रुधिरदर्शने ।।६४१।।
एतन्मध्ये महेशानि, यदि स्याल्लिङ्गताडनम् ।
षट्पद्ममध्ये गते शुक्रे, सन्ततिस्तेन जायते ।।६४२।।
कोणं तत्त्रैपुराख्यं तडिदिव विलसत्कोमलं कामरूपं,
कन्दर्पो नाम वायुर्विलसति सततं तस्य मध्ये समन्तात् ।
ज्ञानध्यानप्रकाशः प्रथमकिसलयाकाररूपः स्वयम्भू–
स्तन्मध्ये चित्रिणी सा प्रणवविलसिता योगिनां योगगम्या ।।
धर्मालम्बनधर्मैश्च, सर्वसत्त्वैरशेषतः ।
सर्वक्लेशाशयैः शून्यं, न शून्यं परमार्थतः ।।६४४।।
शक्तिसंस्तुतसुधारसक्रमात् पूर्णमिन्दुमणुराहुराहरन् ।
छादयेदिह शुभे महाग्रहे, द्रावितं पिबति तं महाभुवि।।६४५।।

हंसो रश्मिभिराकृष्य, गर्भस्थानं तु कारयेत् ।
गर्भस्थानेकधा यद् गृहीतं तु पुरातनम् ॥६४६॥
कर्कटादेः समारभ्य, नित्यं वर्षति तत्पुनः ।
तस्मादारभ्य मकराद्, ध्यानहोमजपादिकम् ॥६४७॥
परलोकनिमित्ताय, तदनन्तफलं भवेत् ।
पुरश्चर्यानिमित्ताय, मन्त्रग्रहव्रतं च यत् ॥६४८॥
मीनादावारभेत्सर्वं मन्त्रसिद्धयर्थमात्मनः ।
बाह्येऽपि ततो लोके, ऋतुषट्कं समीरितम् ॥६४९॥

तदेव प्राणे मिथुनान्तमुत्तरायणं निर्णीय अपाने कर्कटादिधन्वन्तं, दक्षिणायनं निर्णेतुमाह—

१५. शरीरस्थचक्राणां शिवशक्तिनामानि सहस्रारचक्रस्य पद्मदले तत्त्वानि च—

सहस्रदलपद्मस्य, वर्णो रक्तः स्मृतो बुधैः ।
स्थितिश्चाधोमुखी प्रोक्ता, रूपश्चावर्तसंज्ञकः ॥६५०॥
सूर्याग्निवच्चैककन्दस्त्रिकोणो गुरुमन्त्रभृत् ।
सूर्याचन्द्रमसौ तस्य, क्रमशो मण्डलौ स्मृतौ ॥६५१॥
महावायुर्ब्रह्मरन्ध्रः, प्रथमो हंससंज्ञकः ।
सूक्ष्मौ हि महती चन्द्रकलायुक्तश्च मध्यमः ॥६५२॥
अधोमुखी कला तस्य, नूनं निर्वाणसंज्ञिका ।
कोटिचन्द्रार्कसङ्काशा, कला चाधोमुखी स्मृता ॥६५३॥
शून्यब्रह्मात्मिका चान्ते, सच्चिदानन्दरूपिणी ।
एवं चतुर्विधाः प्रोक्ता, ब्रह्मरन्ध्रकलाश्च ताः ॥६५४॥

१६. आज्ञाचक्रस्य शिवशक्तयः —

अतः परं प्रवक्ष्यन्ते, आज्ञाचक्रस्य शक्तयः ।
अचिदिच्छा महामाया, यज्ञः सृष्टिः क्रियात्मिका ॥६५५॥



गोचरात्मा लोकमुख्याः, सदसच्चेन्द्रियाश्रयाः ।
वेदतत्त्वं प्राणसूत्रं, मातृका च स्वरोद्भवा ॥६५६॥
सौषुम्णकुण्डलीसंवित्, संयोगो मन्त्रविग्रहा ।
वर्गजा वर्णजाःस्पन्दशब्दजाः शक्तयः क्रमात् ॥६५७॥
पञ्चविंशतितत्त्वानि, शिवशक्तेः प्रकीर्तिताः ।
ग्रन्थान्तरेषु संग्राह्याः, सप्ततत्त्वानि भूतले ॥६५८॥
शक्तिरूपाश्च वर्ण्यन्ते, चाज्ञाचक्रस्य शक्तयः ।
पराभवा चित्परा च, महामायात्मिका तथा ॥६५९॥
इच्छापरा सृष्टिपरा, गोचरात्मा परे मताः ।
सदसत्क्रिया परे च, लोकमुख्येन्द्रियाश्रये ॥६६०॥
वेदतत्त्वपरा संवित्परा वै कुण्डली परा ।
प्राणसूत्रपरा स्पन्दपरा वै मातृकापरा ॥६६१॥
सौषुम्णसंयोगपरे, स्वरोद्भवपरा तथा ।
प्रोक्ता च वर्णजपरा, शब्दमन्त्रजविग्रहे ॥६६२॥
तथा हि वर्गजपरा, भेदा वै सम्प्रकीर्तिताः ।
शिवशक्तिस्वरूपायाश्चाज्ञाचक्रस्य वै क्रमात् ॥६६३॥

१७. आज्ञाचक्रस्य पद्मदलतत्त्वानि—

परा च मूलचक्रस्था, पश्यन्ती नाभिगा स्मृता ।
मध्यमा हृदयस्था च, वैखरी कण्ठगा मता ॥६६४॥
उपकर्तुं प्रतिकर्तुञ्च, कर्तुं कारयितुं तथा ।
उदासितुं पञ्च भेदाश्चेच्छाशक्तेः प्रकीर्तिताः ॥६६५॥
निरालम्बनरूपा च, सालम्बनस्वरूपगा ।
ज्ञानशक्तेश्च शास्त्रेषु, द्वौ भेदौ हि निरुपितौ ॥६६६॥
इष्टापूर्तञ्च स्वाध्यायो, जपपूजातपांसि वै ।
दानं भेदाश्च षड् प्रोक्ताः, क्रियाशक्तेर्विशेषतः ॥६६७॥

वेदान्ते पञ्च तन्मात्राः, परं योगे त्रयः स्मृताः ।
ज्ञातृज्ञेयज्ञातिभेदात्तन्मात्रा वर्णिता बुधैः ॥६६८॥
अवर्गे षोडश वर्णाश्चत्वारश्च यवर्गगाः ।
उदितेषु क्रमात्पञ्च[1], शवर्गे षट् प्रकीर्तिताः ॥६६९॥

१८. अनाहतचक्रस्य शिवशक्तयः —

खगेश्वरः सदानन्दः, कूर्मो, मेघश्च सामयः ।
ज्ञानं मीनश्च चक्रीशप्रियकामौ निकामरः ॥६७०॥
तीव्राः काचितनागाद्या, धारेशो डामरस्तथा ।
विष्णुश्च कुरवः श्रीशो, हृदीशः शिरश्च वै ॥६७१॥
शिवस्वरूपं चक्रस्थानाहतस्य प्रकीर्तितः ।
शक्तिस्वरूपं चक्रस्य, तदग्रे हि प्रवक्ष्यते ॥६७२॥
मुद्राधारे मल्लिका च शोकालीला हि काकिनी ।
विमला शर्वरी राका, मैनाली कुमुदा तथा ॥६७३॥
लाकिनी डामरीबिन्दू, राकिनी शाकिनी खलु ।
हाकिनी श्रीकला चैव, समया कुब्जिका तथा ॥६७४॥
बहुरूपावचरा च, मङ्गला कुलदीधिका ।
महत्तरी कौशला च, वामानामभिरीरिताः ॥६७५॥
शिखेशश्चर्मी चास्त्रेशाः, पराधिगुरुसंज्ञकः ।
ततः पूज्यगुरुः प्रोक्तो, गुरुः परमनामकः ॥६७६॥

१९. अनाहतचक्रस्य पद्मदलतत्त्वानि —

पृथ्वी जलं तथा तेजो, वायुराकाश एव हि ।
एते पञ्च महाभूताः, शास्त्रेषु च प्रकीर्तिताः ॥६७७॥
गन्धरूप-स्पर्श-शब्द-रस-तन्मात्रसंज्ञकाः ।
प्रोक्ताः पञ्च हि तन्मात्राः, शास्त्रकारैर्विचक्षणैः ॥६७८॥

१. क वर्ग- च वर्ग- ट वर्ग- त वर्ग- प वर्गाः ।



वाक्पाणिपादपायुश्च, तथोपस्थो विशेषतः ।
पञ्च कर्मेन्द्रियाण्याहुः, शास्त्रकाराः कवीश्वराः ॥६७९॥
त्वक्श्रोत्रघ्राणरसना — चक्षुरिन्द्रियसंज्ञकम् ।
पञ्च ज्ञानेन्द्रियाण्याहुर्मुनयस्तत्त्वदर्शिनः ॥६८०॥
पुरुषः प्रकृतिः कालस्त्रयश्चैते प्रकीर्तिताः ।
त्रयोविंशतितत्त्वानामुल्लेखो मूलग्रन्थके ॥६८१॥
.................................... ।
कृतश्चत्वारि तत्त्वानि, चान्वेष्टव्यानि वान्यतः ॥६८२॥

२०. विशुद्धचक्रस्य शिवशक्तयः —

शिवस्वरूपं चक्रस्य, विशुद्धस्य च कथ्यते ।
ज्ञानगुह्यं खेचरञ्च, धरभोगोभयं तथा ॥६८३॥
महः सर्वोद्रवो जुष्टं, हृदयं मोहतेजसी ।
मनोभवो महाकूलं, ज्वलनं गालवस्तथा ॥६८४॥
भीमोज्वलः कुलं मूर्छा, व्योमसंहारवायवः ।
विश्वेश्वरः कोटिलश्च, बाहुलः श्वसनं तथा ॥६८५॥
अजतातो कुलातीतश्चेशश्च परमं शिवः ।
शिवस्वरूपं कथितं, शास्त्रेषु मननं परः ॥६८६॥
शक्तिस्वरूपं चक्रस्य, वक्ष्यामि तदनन्तरम् ।
योगिनी कालिकी कान्ता, शबरी च शिवेश्वरी ॥६८७॥
पद्मरागा कालिका च, चाण्डाली लाकिनी तथा ।
अघोरा कुब्जिका हेला, डाकिनी च कुलाम्बिका ॥६८८॥
पापघ्नी शाकिनी सिंहा, हाकिनी काकिनी तथा ।
राकिनी लाकिनी कामा, कङ्काली काममातृका ॥६८९॥
व्योमानन्दा महादेवी, गन्धिका च महत्तरी ।
पराकुलेशी कुण्डलिनी, पीडिका रेचिका दितिः ।
शक्तिस्वरूपा कथिता, मोचिकानामभिः क्रमात् ॥६९०॥

२१. विशुद्धचक्रस्य पद्मदलतत्त्वानि —

पुरुषः प्रकृतिर्बुद्धिरहङ्कारो मनस्तथा ।
ज्ञानेन्द्रियाणि त्वग्-घ्राणंरसनाचक्षुरेव च ॥६६१॥
रसनानामभिस्तेषां, तन्मात्रा कथ्यते पृथक् ।
प्रथमा रूपतन्मात्रा, रसना गन्धशब्दगा ॥६६२॥
पञ्चमी स्पर्शतन्मात्रा, शास्त्रेषु च प्रकीर्तिताः ।
अथ चाष्टौ महाभूताः, पृथिव्याकाशतेजसः ॥६६३॥
जलं वायुश्च कथितास्तथा कर्मेन्द्रियाण्यपि ।
शास्त्रेषु वाक्पाणिपादपायूपस्थादिनामभिः ॥६६४॥
शुद्धविद्या कलाविद्या, नियतिः काल एव च ।
रागमायात्मिका प्रोक्ता, शास्त्रेषु च विशेषतः ॥६६५॥
एकत्रिंशद्धि तत्त्वानामुल्लेखो दृश्यते परम् ।
ग्रन्थान्तरेभ्यः कर्त्तव्यः, पञ्चतत्त्वविनिर्णयः ॥६६६॥

२२. मणिपूरचक्रस्य शिवशक्तयः —

परावरेशः परमस्तत्परः पर एव च ।
स्वच्छाघोरौ चिदानन्दो, योगानन्दः कुलेश्वरः ॥६६७॥
योगेश्वर उमानन्द, आनन्दः पिङ्गलः स्मृतः ।
अतीतश्च रसस्वादश्चालस्यः शंकरस्तथा ॥६६८॥
भूतेश्वरः सामरसः, श्रीकण्ठश्च करालकः ।
अनन्तः स सत्यगुरुः, शान्तः सिद्धगुरुस्तथा ॥६६९॥
पाठेश्वरः शिवगुरुस्तथा हि कुलकेश्वरः ।
समयगुरुः सेनगुरुश्चक्रस्य शिवशक्तयः ॥७००॥
चक्षुष्मती गुहाकाली, सम्वर्ती रत्नडाकिनी ।
चण्डेश्वरी मूलकुब्जा, कामा ज्वाला हि रेवती ॥७०१॥
ललिता डाकिनी गङ्गा, शब्दा स्पर्शा च पावनी ।
प्रचण्डडाकिनी रात्री, करणा कुलिका तथा ॥७०२॥



शान्तातीता प्रतिष्ठा च, शान्तिर्वै कुब्जडाकिनी ।
चक्रडाकिनीनाम्नी च, समया चण्डकौशला ॥७०३॥
शक्तिस्वरूपं कथितं, निवृत्तिः पद्मडाकिनी ।
चक्रस्य मणिपूरस्य शास्त्रेषु च विशेषतः ॥७०४॥

२३. मणिपूरचक्रस्य पद्मदलतत्त्वानि —

पूर्वपञ्चमहाभूताः, क्रमात्तन्मात्रसंज्ञकाः ।
ज्ञानकर्मेन्द्रिये चैव, तन्मात्रश्च तयोः स्मृताः ॥७०५॥

२४. स्वाधिष्ठानचक्रस्य शिवशक्तयः —

सद्योजातो वामदेवस्तीव्रोऽघोरो ह्यनन्तकः ।
गङ्गेश्वरस्तत्पुरुष अनाथश्च जनाश्रितः ॥७०६॥
वाणिवाहश्चाम्बुवाहस्तेजोधीशश्चतुर्विधः ।
श्रीकण्ठः शंकरः सिद्धः, स चिन्त्यः शशिशेखरः ॥७०७॥
वागीश्वरश्चेश्वरश्च, कृष्णेश्वर इतीरितः ।
सर्वेश्वरश्च दिव्यौघः, पाठौघः सम्प्रकीर्तितः ॥७०८॥
श्रीर्माया चाम्बिका दक्षा, विवृत्तिश्च सरस्वती ।
विद्या प्रतिष्ठा शान्ता हि, उन्मथा रक्तमेखला ॥७०९॥
छिन्ना यशोवती विद्या, उमा गङ्गा च पार्वती ।
ज्येष्ठा रौद्री च कमला, श्रीदा हंसा परा सती ॥७१०॥
शक्तयश्चास्य चक्रस्य, स्वाधिष्ठानस्य कीर्तिताः ।

२५. स्वाधिष्ठानचक्रस्य पद्मदलतत्त्वानि —

पूर्वं पञ्चमहाभूतास्ततस्तन्मात्रसंज्ञकाः ।
ज्ञानकर्मेन्द्रिये चैव, तन्मात्राश्च तयोः स्मृताः ॥७११॥

२६. मूलाधारचक्रस्य शिवशक्तयः —

कामेश्वरश्च श्रीकण्ठ, उड्डीश्वर जलेश्वरः ।
पूर्वेश्वरो महानन्दोऽनन्तः शङ्करपारवौ ॥७१२॥
आधारेशः कुरङ्गीशश्चक्रेशातीतपिङ्गलाः ।
महाधीशो योगनादौ, समयो विमय एव च ॥७१३॥

सर्वज्ञोऽनादिपुत्रेहा, मित्रेशोड्डीशलुब्धकाः ।
आवेशो विद्धविमलो, योगे विमदकीर्तितः ॥७१४॥
शिवस्वरूपं चक्रस्य, मूलाधारस्य वर्णितम् ।

२७. मूलाधारचक्रस्य दश प्रधाना नाड्यः —

पिङ्गलेडे सुषुम्ना च, गान्धारी च यशस्विनी ।
अलम्बुषा हरिजिह्वा, कथिता शंखिनी कुहूः ॥७१५॥

२८. शरीरस्था दश वायवः — (पाठान्तरम्)

प्राणापानौ समानश्च, व्यानोदानौ प्रकीर्तिताः ।
नागः कूर्मो च कृकलो, देवदत्तो धनञ्जयः ॥७१६॥
हृदि प्राणो गुदेऽपानः, समानो नाभिमण्डले ।
उदानः कण्ठदेशे स्याद्, व्यानः सर्वशरीरगः ॥७१७॥
उद्गीरणोन्मीलनश्च, क्षुधा जृम्भा हि पोषणम् ।
एतानि दश वायूनां, स्थानानि कथितानि वै ॥७१८॥

२९. मूलाधारचक्रस्य पञ्चदलतत्त्वानि —

पूर्वं पञ्च महाभूताः, क्रमात्तन्मात्रसंज्ञकाः ।
ज्ञानान्तःकरणे कालः, प्रकृतिः पुरुषो महत् ॥७१९॥

३०. शरीरस्थानि दशाग्निस्थानानि —

बाभ्राजको रञ्जकश्च, क्लेदको धावकस्तथा ।
निःस्नेहको बन्धकश्च, प्रावको व्यापकस्तथा ॥७२०॥
पावकः श्लैष्मकश्चैते, कथिता हि दशाग्नयः ।
त्वगसृग्मांसमेदास्थिमज्जाशुक्रकफादयः ॥७२१॥
पित्तवायुक्रमात्तेषां, स्थानानि कथितानि च ।
तेजःपुञ्जनिभं सर्वमिष्टसिद्धिप्रदायकम् ॥७२२॥

इति श्रीमदाद्यशङ्कराचार्यविरचिते यतिदण्डैश्वर्यविधाने सिद्धिपादः ।

पूर्वं मूलग्रन्थे साधनापादे ३२ प्रघट्टकानन्तरं पठनीयाः श्लोकाः —
बिन्दुस्थिरीकरणार्थमौषधम् —

प्रकल्प्य स्वतनुं तत्र, ततो देवस्य कल्पयेत् ।
येषां मनसि यद्ध्यानं, तद्ध्यानं कायकल्पनम् ॥ १ ॥
एतत्कायकल्पनेन, मौनी वाक्सिद्धिमाप्नुयात् ।
इदानीं कामदेवस्य, मथनं शृणु भैरव ! ॥ २ ॥
कामदेवस्य मथनं, सुखदं मोक्षदं परम् ।
यावद् बिन्दुः स्थिरो देहे, तावन्मृत्युभयं कुतः ॥ ३ ॥
बिन्दुपाताद् भवेन्नाशस्ततो हि बिन्दुरक्षणम् ।
तत्तदौषधमावक्ष्ये, येन बिन्दुः स्थिरो भवेत् ॥ ४ ॥
नित्यं सेवनमाकुर्यादेतेषां मूलमाहरन् ।
श्वेतापराजितामूलं, सिद्धिमूलं ततः परम् ॥ ५ ॥
शतपर्णीमूलमेकं, कदम्बमूलमेव च ।
श्वेतकुन्दपुष्पमूलं, करवीरं तथा सितम् ॥ ६ ॥
कृष्णधत्तूरमूलन्तु, शेफालीमूलमेव च ।
चितामूलं तथा शम्भोर्निर्गुण्डीमूलमाहरन् ॥ ७ ॥
एकीकृत्य विधानेन, रविवारेऽर्कमूलकैः ।
समभागेन योगेन्द्र ! चूर्णीकृत्य पृथक् पृथक् ॥ ८ ॥
शुक्रवारे च पूर्वाह्णे, मिश्रीकुर्याद् दिनत्रयम् ।
षड्भिराशोधयेत् काममुद्राभिर्वामदेवता ॥ ९ ॥
मध्यमाङ्गुलिमुत्तोल्य, दक्षिणेनापि मुष्टिना ।
धृत्वा च शोधयेदादौ, रुद्रमूलानि साधकः ॥ १० ॥
विजयाचूर्णयोगेन, पिबेच्चूर्णं द्वितोलकम् ।
अर्धतोलकमुष्टचैकं, विजयाः सार्धतोलकाः ॥ ११ ॥
मिश्रीकृत्य विधानेन, तत्तत्कुजविने शुभे ।
एतत्प्रभक्षणेनैव मदनं वशमानयेत् ॥ १२ ॥

यदा मनसि आयाति, पुष्पधन्वा महाबली।
तदा तं भक्षयित्वा च, कामदेवं निवारयेत् ॥ १३ ॥
इति कामस्य मथनं, स्थितिर्देहे यथा शृणु।
अङ्गुष्ठगुल्फजानूरुसिमनीलिङ्गनाभिषु ॥ १४ ॥
हृद्ग्रीवाकण्ठदेशेषु, लम्बिकायां तथा नसि।
भ्रूमध्ये मस्तके मूर्ध्नि, वाय्वाकाशप्रियालये ॥ १५ ॥
वायुरूपं स्वदेहन्तु, स्थापयित्वा मनुं जपेत्।
कुम्भकप्राणयोगेन, निजदेहे व्यवस्थितिः ॥ १६ ॥
कण्ठाम्भोजे स्थिरो यो हि, तं जनं शृणु भैरव।
योगारम्भावधिर्यो हि, स्त्रीसंसर्गं विवर्जयेत् ॥ १७ ॥
मातृणां गमनं नास्ति, यस्य स कण्ठसंस्थितः।
नित्यं करोति योगं यो, धर्मात्मा स्थिरचेतसा ॥ १८ ॥
स एव कण्ठपद्मे च, स्थिरो भवति निश्चितम्।
भावज्ञानी च यो विद्वान्, तं विदामि दयार्णव ॥ १९ ॥
कुण्डलीस्पर्शमात्रेण, तन्मयो जायते क्षणात्।
सर्वं देवे परं भावं, कृत्वा ज्ञानेन पूजयेत् ॥ २० ॥
सर्वपीठे स्थिरो भूत्वा, ज्ञानात्मा परिपूजयेत्।
क्रमेण कण्ठभेदः स्याद्, योगी भवति सत्वरम् ॥ २१ ॥
धनं धान्यं धरां धर्मं कीर्तिमायुर्यशः श्रियम्।
तुरगान् दन्तिनः पुत्रान्, लोकान् सर्वसुखोदयान् ॥ २२ ॥
एतज्ज्ञानप्रसादेन, लभते परमेश्वरम् ॥ २३ ॥
ज्ञात्वा योगेन्द्रचक्रं त्रिभुवनविवरध्वान्तजालप्रकाशं
मूलाम्भोजे रसाख्ये दशदलविमले हृत्स्वपद्मे विलासम्।
कण्ठाम्भोजे मनोज्ञे द्विदलस्वकमले भावयन्तं सुरेन्द्रैः
श्वेताम्भोजे परेशं निरवधि गगनं पूजया भावयामि ॥ २४ ॥

**समाप्तश्चायं ग्रन्थः**

સમરીતિર્હ્દાતેજાઃ પરબ્રહ્મ સનાતનઃ।
જયતાજ્જાનકીનાથો વેદવેદ્યો મહામતિઃ॥
ankurnagpal108@gmail.com

श्रीमदाद्यशङ्कराचार्यविरचित-
यतिदण्डैश्वर्यविधानान्तर्गत-

# पूजापद्धतिः
# महाषोढान्यासश्च

સમરીતિર્હ્દાતેજાઃ પરબ્રહ્મ સનાતનઃ।
જયતાજ્જાનકીનાથો વેદવેદ્યો મહામતિઃ॥
ankurnagpal108@gmail.com

❀ ॐ श्री गुरुचरणकमलेभ्यो नमः ❀

# अथ पूजापद्धतिः

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवम्
सिद्धौघं बटुकत्रयं पदयुगं दूतीक्रमं मण्डलम्। (शाम्भवम्)
वीरान्द्व्यष्ट-चतुष्कषष्टिनवकं वीरावलीपञ्चकम्
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥ १ ॥

स्वस्वरूपपरिज्ञानहेतवे गुरवे नमः।
स्वच्छप्रकाशरूपाय विमर्शरूपिणे नमः ॥ २ ॥

सदाशिवस्वरूपाय पराय गुरवे नमः।
स्वात्मारामस्वरूपाय पञ्जरे पाञ्चभौतिके ॥ ३ ॥

विलीनतेजसे नौमि गुरवे परमेष्ठिने।
योगक्षेमस्य सिद्ध्यर्थं गुरुं नौमि परात्परम् ॥ ४ ॥

नत्वा गुरुं गणेशानं पुरतः स्वेष्टदेवताम्।
ततोऽर्चयेत्[1] गुरुं मूर्ध्नि न्यास-संघट्ट-मुद्रया ॥ ५ ॥[2]

तत्पादुकौ पादुकाख्यविद्यया चन्दनादिभिः।
प्रणम्याज्ञां समादाय वक्ष्यमाणविधानतः ॥ ६ ॥

ॐ शुद्धस्फटिकसंकाशं द्विनेत्रं करुणानिधिम्।
वराभयकरं वन्दे श्रीगुरुं शिवरूपिणम् ॥ ७ ॥

भक्ताज्ञानतमोभानुं मूर्ध्नि पंकजसंस्थितम्।
सदाशिवमयं नित्यं श्रीगुरुं प्रणमाम्यहम् ॥ ८ ॥

श्रीविद्यां जगतां धात्रीं सर्गस्थितिलयेश्वरीम्।
नमामि ललितां नित्यं महात्रिपुरसुन्दरीम् ॥ ९ ॥

आचमनम् —

ॐ ऐं आत्मतत्त्वं परिशोधयामि।
क्लीं विद्याख्यतत्त्वं च तु कामपूर्वम् ॥ १० ॥

सौः शक्तिकूटेन शिवाख्यतत्त्वं
कूटत्रयैः कारणतत्त्वमेवम् ॥ ११ ॥

---

१. न्यसेत्-इति पाठभेदः
२. तत्पादुके चन्दनाद्यैः पूजयेत् रत्नविद्यया।
प्रणम्याज्ञां समादाय वक्ष्यमाणविधानतः ॥



स्वासनपूजा —

स्वीयमासनमास्तीर्य देवस्याग्रे तु प्राङ्मुखः।
उपविश्यासने तत्र तत्त्वैराचम्य यत्नतः ॥ १२ ॥

प्राणानायम्य विधिवत् पूजाद्रव्याणि शोधयेत्।
जलस्य शोधनं कृत्वा गन्धपुष्पादि शोधयेत् ॥ १३ ॥
स्वाग्रत्रिकोणं कुर्वेऽहमासनाधो महेश्वरि।
तत्र योगासनं पूज्यं वीरासनमथोऽर्चये ॥ १४ ॥

शरासनं पूजयित्वा अनन्तासनमर्चये।
अर्चयित्वा महेशानि विमलासनमुत्तमम् ॥ १५ ॥

आधारशक्तिकमलासनं देवि ततोऽर्चये।
तत्रोपविश्याचमनं देहशुद्ध्यै करोम्यहम् ॥ १६ ॥

प्राणायामः —

इत्थमाचम्य शुद्धाङ्गः प्राणायामत्रयं चरेत्।
पूरकं कुम्भकं चैव रेचकं त्रिविधं क्रमात् ॥ १७ ॥

चक्रचिन्तनम् —

मूलाधारात्समारभ्य आज्ञाचक्रावधि प्रिये।
चक्रषट्कं समाख्यातं योगशास्त्रविशारदैः ॥ १८ ॥
मध्यचक्रचतुष्के तु एकैकाङ्गुलमन्तरा।
अधोमुखानि चक्राणि तत् तन्नाम्ना स्थितानि वै ॥ १९ ॥

मूलाधारमधः स्वाधिष्ठानचक्रं ततः परम्।
स्वाधिष्ठानं तत ऊर्ध्वं स्थितमेकाङ्गुलान्तरे ॥ २० ॥

मणिपूराभिधान्नाभिचक्राच्च यदधः स्थितः।
एकाङ्गुलप्रमाणेन तदधो मणिपूरकम् ॥ २१ ॥

एकाङ्गुलेन मानेनाऽनाहताद् यदधः स्थितम्।
तदधोऽनाहताख्यं हि चक्रमुक्तं मनीषिभिः ॥ २२ ॥

विशुद्धचक्रात् कण्ठस्थादधः एकाङ्गुलान्तरे।
अधो विशुद्धचक्रं हि स्थितमित्यागमाः जगुः ॥ २३ ॥

आधारनादसूत्रेण ध्यायेद् वर्णमणीन् क्रमात्।
अकुलं च महाबिन्दुश्चोन्मना समना तथा ॥ २४ ॥
व्यापिकाशक्तिनादान्तनादरोधार्धचन्द्रकाः।
बिन्दुराज्ञा ततश्चैवं लम्बिकाऽथ विशुद्धिका ॥ २५ ॥

**अधोमुखविशुद्धिश्च शुद्धिश्चानाहतं ततः ।**
**अधोमुखं तथैवास्तु मणिपूरमधोमुखम् ॥ २६ ॥**
**स्वाधिष्ठानं ततोऽधश्च मूलाधारं तथैव च ।**
**विषुवं कुलसंज्ञं च कुलत्थेति प्रकीर्तितम् ॥ २७ ॥**

सृष्टिक्रमेण यन्त्रोद्धारः पूजा च —

**बिन्दु - त्रिकोण - संयुक्तं वसुकोणसमन्वितम् ।**
**दशकोणद्वयोपेतं भुवनारसमन्वितम् ॥ २८ ॥ (अ)**
**दलाष्टकसमोपेतं दलषोडशकान्वितम् ।**
**वृत्तत्रयान्वितं भूमिसदनत्रयभूषितम् ॥ २९ ॥ ꣸**
**नमामि त्रिपुराचक्रं भक्तानामेतदिष्टदम् । △**

---

(अ) कृत्वा तु मण्डपाद् बाह्ये षट्कोण-चतुरस्रकम् ।
विद्यया पूजयेन् मध्ये खण्डैस्त्र्यस्रं प्रपूज्य च ॥ क ॥
बीजावृत्त्या तु षट्कोणं सम्पूज्यार्घं निवेशयेत् ।
मंदिरद्वारपूजां च कुर्यात् साधकसत्तमः ॥ ख ॥

꣸ **संहारक्रमे —**

सदनत्रयसंयुक्तं वृत्तत्रयभूषितम् ।
दलषोडशयुक्तं च दलाष्टकविभूषितम् ॥
भुवनैः सुसंयुक्तं दशकोणद्वयान्वितम् ।
वसुकोणं त्रिकोणं च बिन्दुत्रययुतं तथा ॥

△ **स्थितिक्रमे —**

भूगृहं गुणरेखाढ्यं वेदद्वारोपशोभितम् ।
त्रिवृत्तं षोडशदलं तथाष्टदलकर्णिकम् ॥
मध्ये बिन्दुमहाचक्रं नित्यं श्रीत्रिपुरामयम् ।
मनुकोणं द्विदिक्कोणं वसुकोणं त्रिकोणकम् ॥
श्रीगुरो ! दक्षिणामूर्ते ! भक्तानुग्रहकारक ।
अनुज्ञां भगवन् देहि स्थितिक्रमार्चनाय मे ॥

**संहारे च —**

भूगृहं गुणरेखाढ्यं वेदद्वारोपशोभितम् ।
त्रिवृत्तं षोडशदलं तथाष्टदलकर्णिकम् ॥
मनुकोणं द्विदिक्कोणं वसुकोणं त्रिकोणकम् ।
मध्ये बिन्दुमहाचक्रं नित्यं श्रीत्रिपुरामयम् ॥
श्रीगुरो दक्षिणामूर्ते भक्तानुग्रहकारक ।
अनुज्ञां भगवन् देहि लयक्रमार्चनाय मे ॥



जलशोधनम् —

**पवित्रीकरणं कुर्यात् प्रथमं स्थानशुद्धये ।**
**जलस्य शोधनं कुर्याज्जलशोधनविद्यया ॥ ३० ॥**
**गंधशोधनमंत्रेण गन्धादीन् परिशोधयेत् ।**
**पुष्पशोधनमंत्रेण पुष्पाणि च विशोधयेत् ॥ ३१ ॥**

## श्रीचक्रराजे आयतन-पूजनम्

सिद्धि-बुद्धिसमायुक्तं महागणपतिं शिवे ।
अर्चयामि मुदा भक्त्या नैर्ऋत्यां विघ्नशान्तये ॥ १ ॥
गायत्र्या सह मार्तण्डरविं वायौ प्रपूजये ।
लक्ष्म्या युतं महाविष्णुमीशान्यां पूजयाम्यहम् ॥ २ ॥
शिवेन सहितां देवीं श्रीमद्भुवनसुन्दरीम् ।
तव प्रीत्यै जगद्धात्रि नैर्ऋत्यां पूजयाम्यहम् ॥ ३ ॥
मध्ये दुर्गासमायुक्तं पाण्डुनाथाख्य - भैरवम् ।
पूजयामि सुरेशानि तव प्रीत्यै सुरेश्वरि ॥ ४ ॥
अग्निकोणेऽर्चयाम्यत्र गौर्या सह सदाशिवम् ।
गायत्र्या सहितं पाशुपतं भट्टारकं शिवे ॥ ५ ॥
वायव्यां भक्तिभावेन पूजयामि सुरेश्वरि ।
गुह्येश्वर्या समं गुह्येश्वरं भैरवमादरात् ॥ ६ ॥
भक्त्या समर्चये देवि आग्नेय्यां तव तुष्टये ।
नौमि भैरवमुन्मत्तं वाराहीसहितं शिवे ॥ ७ ॥
ईशानकोणमाश्रित्य पूजयेऽहं महेश्वरि ।
श्रीगुरुं दक्षिणामूर्तिं ज्ञानशक्त्या समन्वितम् ॥ ८ ॥
मध्येऽर्चयामि देवेशि तव प्रीत्यै महेश्वरि ।
इत्थं पूजा प्रकर्तव्या सम्यगायतनात्मिका ॥ ९ ॥
ततस्त्रिखण्डया कार्यमावाहनमनुत्तमम् ।
महात्रिपुरसुन्दर्या यन्त्रराजे यथाविधि ॥ १० ॥

साम्बायतनपूजनम् —

ज्ञानाम्बासहितं मध्ये दक्षिणामूर्तिमर्चये ।
नैर्ऋत्यामर्चये भक्त्या गुह्येश्वर्या गुहेश्वरम् ॥ ११ ॥

महेश्वरं च मातङ्ग्या सहितं वायव्ये यजे ।
ऐशान्ये भुवनायुक्तं पूजयामि सदाशिवम् ।। १२ ।।
भट्टारकं पाशुपतं गायत्र्या सह वह्निगम् ।
मध्ये दुर्गां समभ्यर्च्य सिद्धि-बुद्धि-समन्वितम् ।। १३ ।।
गणेशानं पूजयामि नैर्ऋत्यां विघ्नशान्तये ।
गायत्र्या सह मार्तण्डं रविं वायौ प्रपूज्य च ।।
लक्ष्म्या युतं महाविष्णुमीशाने पूजयाम्यहम् ।
अग्निकोणे महेशानि गौर्या सह सदाशिवम् ।।

द्वारदेवतापूजनम् —

श्रीमत्त्रिपुरसुन्दर्य्याः, पूजयेद् द्वारदेवताः ।। १४ ।।
कोटियोजन-विस्तीर्णायाममादौ पृथक् पृथक् ।।
सुधार्णवचतुष्कन्तु, ध्यात्वा तन्मध्यगं पुनः ।। १५ ।।
कोटियोजनविस्तीर्णायामं द्वीपं महाद्भुतम् ।।
नवरत्नमयं कोटिसूर्यमण्डलसन्निभम् ।। १६ ।।
तत्तृतीयांशमानेन मदनोन्मादनं महत् ।।
नानापुष्पलतोपेतं, कदम्बोद्यानगर्भिणम् ।। १७ ।।
हेमपर्वतमूर्ध्निस्थं, चन्दनोद्यानमामृशेत् ।।
तन्मध्ये च तृतीयांशमानेनाऽऽदित्यकोटिभम् ।। १८ ।।
स्वर्णप्राकारसंवीतं तोरणद्वारशोभितम् ।।
मण्डितं विविधै रत्नैरिन्द्राद्यैः परिवारितम् ।। १९ ।।
मणिमण्डपमेवन्तु ततस्तद्द्वारदेवताः ।।
सामान्यार्घजलैर्गन्धपुष्पाऽक्षतसमन्वितैः ।। २० ।।
वक्ष्यमाणप्रकारेण ध्यात्वा सम्यक् समर्चयेत् ।।
आदौ सुधार्णवानिष्ट्वा समुदायेन मंत्रवित् ।। २१ ।।
अकारादिक्षकारान्ताम् बिन्द्वन्तां मातृकां स्मरेत् ।।
नवरत्नमयं द्वीपं नवखण्डमयं यजेत् ।। २२ ।।
स्वर्णभूधरमभ्यर्च्य, चन्दनोद्यानमर्चयेत् ।।
स्वर्णप्राकारमभ्यर्च्य तद्द्वारस्य च शाखयोः ।। २३ ।।
ऊर्ध्वोदुम्बरदेहल्यां, गणेशं क्षेत्रपालकम् ।।
द्वारश्रियं देहलीञ्च यजेद्गन्धादिभिः क्रमात् ।। २४ ।।



प्राकारान्तः प्रविश्याऽथ, प्रादक्षिण्येन साधकः ।।
इन्द्रादीनथ दिक्पालानर्चयेत् स्वस्वदिक् स्थिताम् ।।२५ ।।
पश्चिमे मण्डपस्याथ मण्डपाऽभिमुखस्थिताम् ।।
वाराहीमर्चयेन्मंत्री, तन्मंत्रेण विचक्षणः ।। २६ ।।
ततः कामवसन्तौ च, नन्दनोद्यानपालकौ ।।
सपत्नीकौ यजेद् ध्यात्वा, पश्चिमद्वारसंस्थितौ ।। २७ ।।
पश्चिमद्वारमासाद्य, मण्डपस्यार्घ्यवारिणा ।।
अस्त्रेण तोरणद्वारमभ्युक्ष्याऽथ समर्चयेत् ।। २८ ।।
तद्द्वारोर्ध्वस्थशाखायां, वामदक्षिणयोः क्रमात् ।।
ध्यात्वा समर्चयेन्मंत्री महालक्ष्मीं सरस्वतीम् ।। २९ ।।
मध्ये दुर्गां समभ्यर्च्य, द्वारश्रियमथाऽर्चयेत् ।।
स्वस्वनामाद्यवर्णन्तु बिन्दुदीर्घसमन्वितम् ।। ३० ।।
महालक्ष्मीसरस्वत्योर्बीजं द्वारश्रियस्तथा ।।
दूमित्येकाक्षरं बीजं दुर्गायाः परिकीर्तितम् ।। ३१ ।।
द्वारस्य शाखयोः पूज्यौ शङ्खपद्मनिधी क्रमात् ।।
सपत्नीकौ ततः पूज्यौ, गणेशक्षेत्रपालकौ ।। ३२ ।।
मायाशक्तिञ्च चिच्छक्ति, गङ्गाञ्च यमुनान्तथा ।।
धातारं च विधातारं देहल्यां देहलीं यजेत् ।। ३३ ।।
द्वाराग्रे वरुणञ्चैव स्वनामाद्यक्षरैर्यजेत् ।।
बिन्दुयुक्तैर्नामभिः स्वैश्चतुर्थीहृदयान्वितैः ।। ३४ ।।
साधकेन्द्रस्ततो गत्वा, सम्प्रोक्ष्य द्वारमुत्तमम् ।।
महालक्ष्मीसरस्वत्यौ, प्राग्वत् सम्पूज्य मध्यतः ।। ३५ ।।
सम्पूज्य बटुकं द्वारश्रियं चाभ्यर्च्य पूर्ववत् ।।
शाखानिध्यादिकान् दृष्ट्वा देहल्यां तान् समर्चयेत् ।।३६।।
कुबेरं पूर्वगद्वारं संप्रोक्ष्याऽभ्यर्च्य पूर्ववत् ।।
महालक्ष्मीसरस्वत्यौ, क्षेत्रेशं मध्यतो यजेत् ।। ३७ ।।
द्वारश्रियं ततोऽभ्यर्च्य, शङ्खनिध्यादि पूर्ववत् ।।
देहल्यन्तं समभ्यर्च्य, द्वाराग्रे शक्रमर्चयेत् ।। ३८ ।।
ततो दक्षिणमभ्येत्य, द्वारमभ्युक्ष्य पूर्ववत् ।।
महालक्ष्मीसरस्वत्यौ, प्राग्वदभ्यर्च्य मध्यतः ।। ३९ ।।

गणनाथं समभ्यर्च्य, ग्लौं-बीजेन ततो गुरुम् ।।
द्वारश्रियं समभ्यर्च्य, शङ्खनिध्यादि पूर्ववत् ।। ४० ।।
देहल्यन्तं समभ्यर्च्य द्वाराग्रे यममर्चयेत् ।।
स्वनामाद्यक्षरं बीजं, प्राग्वज्जलधनेशयोः ।। ४१ ।।
चक्रस्य च यमस्यापि, लंटं बीजद्वयं भवेत् ।।
पुनः पश्चिममासाद्य, द्वारं साधकसत्तमः ।। ४२ ।।
वामपादं पुरस्कृत्य, तोरणान्तः प्रविश्य च ।।
रत्नसोपानपंक्तिञ्च, पूजयेच्चन्दनादिभिः ।। ४३ ।।
तामारुह्य ततो गत्वा, मञ्चस्योपरि मंत्रवित् ।।
पश्चिमद्वारबाह्ये तु, समासीनां वरानने ।। ४४ ।।
तद्द्वाराऽभिमुखीं देवीं, तिरस्करणिकां यजेत् ।।

तिरस्करिणीध्यानम् —

श्यामवर्णां मदाघूर्णरक्तनेत्रत्रयान्विताम् ।। ४५ ।।
कृष्णाम्बरां गदां खड्गं, दधतीञ्च भुजद्वये ।।
दोर्भ्यां मनोहराभ्याञ्च, खर्जूरीकुम्भधारिणीम् ।। ४६ ।।
नीलन्तुरङ्गमारूढां, प्रौढां पीनघनस्तनीम् ।।
मुक्तकेशीं विवसनां, सर्वालङ्कारभूषिताम् ।। ४७ ।।
स्वयोनिदर्शनान्मुह्यत्पशुवर्गामुपास्महे ।।

तिरस्करिणीमन्त्रोद्धारः —

इति ध्यात्वा यजेद् देवीं, तन्मंत्रेणैव मंत्रवित् ।। ४८ ।।
वाग्भवं बीजमुच्चार्य, नमो भगवतीति च ।।
माहेश्वरि पदस्यान्ते, पशुजनमनः पदम् ।। ४९ ।।
चक्षुस्तिरस्करपदे, णं कुरु द्वितयं द्विठः ।।
तिरस्करिण्या विद्यायाः, त्रिंशदर्णाः समीरिताः ।। ५० ।।
नमोऽन्ते श्रीपदं पश्चात्पादुकां पूजयामि च ।।
इत्युच्चार्य यजेद् देवीं, प्रोक्तरूपां धिया स्मरन् ।। ५१ ।।
मञ्चस्य पश्चिमद्वारपार्श्वयोर्दक्षिणाऽन्ययोः ।।
सरस्वतीं महालक्ष्मीमन्तराले तयोस्ततः ।। ५२ ।।
यजेदुपर्यधोग्रेषु गौरीलोकपदादिकाम् ।।
धात्रीं वागीश्वरीं पश्चादुत्तरद्वारपार्श्वयोः ।। ५३ ।।



मायां दुर्गां समभ्यर्च्य, यजेद् गौर्यादि पूर्ववत् ।।
एवञ्च दक्षिणद्वारि, स्वाहाञ्चैव शुभङ्करीम् ।। ५४ ।।
गौर्याद्याश्च समभ्यर्च्य, पुनर्द्वारञ्च पश्चिमम् ।।
आसाद्य तालत्रितयमस्त्रमंत्रेण साधकः ।। ५५ ।।
कृत्वा बद्धाथ समादाय, कुशभस्मादिसर्षपान् ।।
गन्धपुष्पाक्षतयुतान्, सदूर्वानभिमन्त्र्य च ।। ५६ ।।
अस्त्रमन्त्रेणाष्टवारं, मण्डपान्तर्विकीर्य च ।।
नाराचमुद्रया मन्त्री मन्त्रद्वयमिमं पठन् ।। ५७ ।।

भूतापसारणम् —

अपक्रामन्तु भूतानि, पिशाचाः प्रेतगुह्यकाः ।।
ये चात्र निवसन्त्यन्ये, देवता भुवि संस्थिताः ।। ५८ ।।
अपसर्पन्तु ते भूता, ये भूता भुवि संस्थिताः ।।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।। ५९ ।।
इत्यन्ते रोषतोऽस्त्रेण, तस्मान्निर्गच्छतां बुधः ।।
दद्यात्स्ववामतो मार्गं, भूतानां विघ्नकारिणाम् ।। ६० ।।
पाखण्डचारिणो भूताः, भूमौ ये चान्तरिक्षगाः ।।
दिवि लोके स्थिता ये च, ते नश्यन्तु शिवाज्ञया ।। ६१ ।।
इत्यन्तेऽस्त्रं पठन् मन्त्री, पार्ष्णिघातत्रयेण तु ।।
भौमानूर्ध्वोर्ध्वतस्तालत्रितयेनाऽन्तरिक्षगान् ।। ६२ ।।
तीक्ष्णदृष्ट्यवलोकेन, दिव्यान् विघ्नान् निवारयेत् ।।
मण्डपाऽभ्यन्तरे वास्तुपुरुषं नैर्ऋते यजेत् ।। ६३ ।।
तत्रैव वास्त्वधीशानं, ब्रह्माणं चन्दनादिना ।।
ऐशान्यां कुलनाथञ्च, दीपनाथञ्च पूजयेत् ।। ६४ ।।
दीपनाथं रक्तवर्णं, द्वारे द्वादशशक्तिभिः ।।
सहितं पूजयेन्मंत्री, श्रीसप्ताक्षरविद्यया ।। ६५ ।।
ततः सम्प्रार्थयेद् दीपनाथस्याज्ञां समाहितः ।।
अस्मिन् क्षेत्रे दीपनाथ निर्विघ्नं सिद्धिहेतवे ।। ६६ ।।
श्रीचक्रक्रमपूजार्थमनुज्ञां दीयतां मम ।।
पश्चिमद्वारमारभ्य, नवशक्तीरिमा यजेत् ।। ६७ ।।
शक्तिद्वयं प्रतिद्वारं, मध्ये चैकां यथाक्रमम् ।।
दूतरी सुन्दरी चैव, सुमुखी चा विरूपगा ।। ६८ ।।

एवमेताः समभ्यर्च्य, भैरवाज्ञामथाऽर्थयेत् ॥
तीक्ष्णदंष्ट्र महाकाय, कल्पान्तदहनोपम ॥ ७० ॥
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥
इति प्रार्थ्य च लब्धाज्ञो यागरक्षार्थमर्चयेत् ॥ ७१ ॥
रुद्रं शलभनामानं, सुदर्शनहरिं ततः ॥
अघोररुद्रं गन्धाद्यैर्दुर्गां विन्ध्यनिवासिनीम् ॥ ७२ ॥
उत्तरद्वारमारभ्य, यावद्द्वारन्तु पश्चिमम् ॥
तत्रादावुत्तरद्वारे, रुद्रं शलभसंज्ञकम् ॥ ७३ ॥
तारहृद्भागमानीय, कामिका सोर्ध्वकेशिनी ॥
बकेशश्च पिनाकीशो, निद्रा वै मृत्युरूपिणी ॥ ७४ ॥
सदीर्घाऽथ पिनाकीशो जलस्थोऽनन्तसंयुतः ॥
वायुश्च लोहितेशश्च संवर्तेशः सलोचनः ॥ ७५ ॥
वह्निदीर्घयुतः छान्तो, दीर्घावान् मारुतस्ततः ॥
महाकालो महाकालो, बकेशः पूतनाग्नियुक् ॥ ७६ ॥
वामकर्णयुतावाथ, सदीर्घः शेषयुग्मकम् ॥
सन्ध्यावायुः पुनश्चैतत् त्रयं मेधाद्वयं पृथक् ॥ ७७ ॥
कवचास्त्राग्नि — जायातश्चतुस्त्रिंशद्भिरक्षरैः ॥
मन्त्रेणाऽनेन सम्पूज्य, शलभं चन्दनादिभिः ॥ ७८ ॥

अथ पूर्वद्वारार्चनम् —

श्रीगुरो ! दक्षिणामूर्ते ! भक्तानुग्रहकारक ।
अनुज्ञां भगवन देहि, पूर्व – द्वारार्चनाय मे ॥ ७९ ॥
पूर्वाम्नायमयं पूर्वद्वारं देवि भजामि ते ।
यजेऽहं द्वारदेवेशं, सर्वकामार्थसिद्धये ॥ ८० ॥
पूर्वद्वारं समासाद्य, मण्डपस्यार्घ्यवारिणा ।
ततश्च तोरणद्वारमभ्युक्ष्याऽथ समर्चयेत् ॥ ८१ ॥
तद् द्वारोर्ध्वस्थशाखायां वामदक्षिणयोः क्रमात् ।
ध्यात्वा समर्चयेन्मन्त्री, महालक्ष्मीं सरस्वतीम् ॥ ८२ ॥
द्वारश्रियं च निध्यादिं, कच्छपं च मुकुन्दकम् ।
पूर्वस्यामुन्मनीं दिव्यां, विरिञ्चिं च गणाधिपम् ॥ ८३ ॥



क्षेत्रपालं च मायां च, चिच्छक्तिं चैव दिव्यगाम् ।
यमुनां धातृविधातारौ, देहल्यां शक्रमर्चयेत् ॥ ८४ ॥

अथ दक्षिणद्वारार्चनम् —

श्रीगुरो ! दक्षिणामूर्ते ! भक्तानुग्रहकारक ।
दक्षिणद्वारपूजार्थमाज्ञां यच्छ महेश्वर ॥ ८५ ॥
दक्षिणाम्नायरूपं ते, दक्षिणद्वारमाश्रये ।
यजेऽहं द्वारदेवेशं, सर्वकामार्थसिद्धये ॥ ८६ ॥
अथ दक्षिणमभ्येत्य द्वारमभ्युक्ष्य पूर्ववत् ।
सरस्वतीं महालक्ष्मीं प्राग्वदभ्यर्च्य मध्यतः ॥ ८७ ॥
गणनाथं समभ्यर्च्य, ग्लौं–बीजेन ततः सदा ।
द्वारश्रियं च निध्यादिं, नन्दनीलौ च कालिकाम् ॥ ८८ ॥
लक्ष्मीं गणपतिं चैव, क्षेत्रेशं क्षत्रपालकम् ।
मायाशक्तिं च चिच्छक्तिं, गंगां च यमुनान्तथा ॥ ८९ ॥
धातारं च विधातारं, तन्मन्त्रेण विचक्षणः ।
देहल्यां तु समभ्यर्च्य, द्वाराग्रे यममर्चयेत् ॥ ९० ॥

अथ पश्चिमद्वारार्चनम् —

श्रीगुरो ! दक्षिणामूर्ते ! भक्तानुग्रहकारक ।
पश्चिमद्वारपूजार्थमनुज्ञां यच्छ यच्छ मे ॥ ९१ ॥
नमामि ते परं द्वारं, पश्चिमाम्नायरूपकम् ।
यजेऽहं द्वारदेवेशं, सर्वकामार्थसिद्धये ॥ ९२ ॥
पश्चिमे मण्डपस्याथ, मण्डपाऽभिमुखस्थिताम् ।
वाराहीमर्चयेन्मन्त्री, तन्मन्त्रेण विचक्षणः ॥ ९३ ॥
मध्ये दुर्गां समभ्यर्च्य, द्वारश्रियमथार्चयेत् ।
स्वस्वनामाद्यवर्णन्तु, बिन्दुदीर्घसमन्वितम् ॥ ९४ ॥
महालक्ष्म्याः सरस्वत्याः बीजं द्वारश्रियं तथा ।
दुमित्येकाक्षरं बीजं, दुर्गायाः परिकीर्तितम् ॥ ९५ ॥
द्वारस्य शाखयोः पूज्यौ, शङ्खपद्मनिधी क्रमात् ।
सपत्नीकैस्ततः पूज्ये, विघ्नेशाघोरकुब्जिके ॥ ९६ ॥
क्षेत्रपालञ्च सम्पूज्य, पुष्पगन्धैर्विधानतः ।
मायाशक्तिञ्च चिच्छक्तिं, गंगां च यमुनां तथा ॥ ९७ ॥

धातारं च विधातारं, देहल्यां देहलीं यजेत् ।
द्वाराग्रे वं वरुणाय, पूजयेद् भक्तिमान्नरः ॥ ९८ ॥

अथ उत्तरद्वारार्चनम् —

श्रीगुरो ! दक्षिणामूर्ते ! भक्तानुग्रहकारक ।
अनुज्ञां भगवन् देहि, द्वारोत्तरार्चनाय मे ॥ ९९ ॥
वन्देऽहमुत्तरं द्वारमुत्तराम्नायरूपकम् ।
यजेऽहं द्वारदेवेशं, सर्वकामार्थसिद्धये ॥ १०० ॥
साधकेन्द्रस्ततो गत्वा, सम्प्रोक्ष्य द्वारमुत्तरम् ।
महालक्ष्मी-सरस्वत्यौ, प्राग्वत् संपूज्य मध्यतः ॥ १०१ ॥
सम्पूज्य बटुकं द्वारश्रियं चाभ्यर्च्य पूर्ववत् ।
महापद्मनिधिं यष्ट्वा, पूजयेन्मकरं निधिम् ॥ १०२ ॥
सिद्धलक्ष्मीं समुद्दिष्टामुच्छिष्टगणनायकम् ।
महालक्ष्मी-सरस्वत्यौ, क्षेत्रेशं मध्यतो यजेत् ॥ १०३ ॥
मायाशक्तिं च चिच्छक्तिं, गंगां च यमुनान्तथा ।
धातारं च विधातारं देहल्यां सोममर्चयेत् ॥ १०४ ॥

अथ ऊर्ध्वद्वारार्चनम् —

श्रीगुरो ! दक्षिणामूर्ते ! भक्तानुग्रहकारक ।
अनुज्ञां भगवन् देहि, ऊर्ध्वद्वारार्चनाय मे ॥ १०५ ॥
ऊर्ध्वाम्नायमहं वन्दे, ऊर्ध्वद्वारं कुलेश्वरि ।
यजेऽहं द्वारदेवेशं सर्वकामार्थसिद्धये ॥ १०६ ॥
ऊर्ध्वोदुम्बरदेहल्यां, महागणपतिं यजेत् ।
क्षेत्रपालं ततो द्वारश्रियं च देहलीं क्रमात् ॥ १०७ ॥
प्राकारान्तः प्रविश्याथ, प्रादक्षिण्येन साधकः ।
इन्द्रादीनथ दिक्पालानर्चयेत् स्वदिगास्थितान् ॥ १०८ ॥*

---

* प्रातः सृष्टिक्रमे, पूर्व-दक्षिण-पश्चिम-उत्तरद्वारपूजाक्रमो विधत्ते ।
मध्यान्हे स्थितिक्रमे, दक्षिण-पश्चिम-उत्तर-पूर्वद्वारपूजाक्रमो भवति ।
सायंकाले संहारक्रमे, पश्चिम-उत्तर-पूर्व-दक्षिणद्वारपूजाक्रमो भवति ।
अनाख्यायां भासायां च उत्तर-पश्चिम-दक्षिण-पूर्वद्वारपूजाक्रमोऽस्ति ॥



सृष्टिक्रमे आसनम् —

पद्मासनं नमस्यामि, सर्वत्रैकरसं स्थिरम् ।
महाप्रेतासनं वंदे, पर्यङ्कपीठकासनम् ॥
नवयोन्यासनं नौमि, साध्यसिद्धासनं भजे ।
सर्वमन्त्रासनं नत्वा, सर्वचक्रासनं भजे ॥
ततो दिव्यासनं नौमि, नौमि पीताम्बुजासनम्
कालचक्रासनं नौमि, सुधार्णवासनं पुनः ॥

सृष्टिक्रमे योगिन्यः —

परापरातिरहस्याऽतिरहस्या ततः परम् ।
रहस्ययोगिनी पूज्या निगर्भा कुलकौलिनी ॥
सम्प्रदाया गुप्ततरा गुप्तान्ते मातृका स्मृता ।
ततः प्रकटयोगिन्यः सृष्टिमार्गस्य पूजने ॥

सृष्टिक्रमे चक्रनायिकाः —

चक्रेश्वरी तु प्रथमा, महात्रिपुरसुन्दरी ।
द्वितीया तु सदा पूज्या, श्रीमत्त्रिपुरभैरवी ॥
तृतीया त्रिपुराम्बा स्यात्सदा सृष्टिक्रमार्चने ।
चतुर्थी त्रिपुरा सिद्धा, ततस्त्रिपुरमालिनी ॥
त्रिपुराश्रीर्भवेत् षष्ठी, ततस्त्रिपुरसुन्दरी ।
सर्वान्ते त्रिपुरा पूज्या, सृष्टिमार्गसमर्चने ॥

स्थितिक्रमे आसनम् —

सुधार्णवासनं नौमि, कालचक्रासनं ततः ।
पीताम्बुजासनं नौमि, वंदे दिव्यासनं ततः ॥
महाप्रेतासनं वन्दे, पर्यङ्कपीठकासनम् ।
नवयोन्यासनं नौमि, साध्यसिद्धासनं भजे ॥
सर्वमंत्रासनं नत्वा, सर्वचक्रासनं भजे ।
पद्मासनं नमस्यामि, सर्वत्रैकरसं स्थिरम् ॥

स्थितिक्रमे योगिन्यः —

प्रकटा मातृका गुप्ता, तथा गुप्ततरा स्मृता ।
परापरातिरहस्या, ततश्चातिरहस्यकाः ॥
रहस्या च निगर्भाख्या, कुलोत्तीर्णास्ततः परम् ।
सम्प्रदायाख्ययोगिन्यः, पूज्याः स्थितिक्रमार्चने ॥

# अथ मन्दिरार्चनम्

भक्त्या नत्वा यन्त्रराजं, कुर्यात् श्रीमन्दिरार्चनम् ।
अमृताम्भोनिधिं तत्र, रत्नद्वीपं नमाम्यहम् ॥ १०६ ॥

नानावृक्षमहोद्यानं वन्देऽहं कल्पवाटिकाम् ।
सन्तानवाटिकां वन्दे, हरिचन्दनवाटिकाम् ॥ ११० ॥

मन्दारवाटिकां वन्दे, पारिजाताख्यवाटिकाम् ।
नमामि तव देवेशि, कदम्बवनवाटिकाम् ॥ १११ ॥

---

स्थितिक्रमे चक्रनायिकाः—

त्रिपुरा त्रिपुरेशी च, ततश्च त्रिपुरेशिनी ।
त्रिपुरसुन्दरी चैव, चतुर्थी चाष्टपत्रके ॥
चतुर्दशारे सम्पूज्या, महात्रिपुरसुन्दरी ।
त्रिपुरभैरवी चैव, त्रिपुराम्बा ततः परम् ॥
ततस्तु त्रिपुरा सिद्धा, ततस्त्रिपुरमालिनी ।
त्रिपुराश्रीः सदा पूज्या, स्थितिमार्गार्चने बुधैः ॥

संहारक्रमे आसनम् —

सुधार्णवं नमस्यामि, कालचक्रासनं तथा ।
पीताम्बुजं च देव्यात्मसर्वचक्रासने सदा ॥
सर्वमन्त्रं नमस्यामि, साध्यसिद्धं तथा भजे ।
नवयोन्यासनं वन्दे पर्यङ्कमासनं तथा ॥
सदाशिवं महाप्रेतं, देवतासनमुत्तमम् ।
षड्दलं कमलं वन्दे, देवतासनमुत्तमम् ॥
षट्त्रिंशद् योगतत्त्वं च, नमस्यामि महेश्वरि ॥
वन्देऽहं महापीठयोगासनं शुभं सदा ॥

संहारक्रमे योगिन्यः—

प्रकट-मातृका-गुप्त-गुप्तत्तर, सम्प्रदाय-कुलोत्तीर्ण-निगर्भ
रहस्य-अतिरहस्य-परापररहस्याख्याः ।

संहारक्रमे चक्रनायिकाः—

(1) त्रिपुरा (2) त्रिपुरेशानी (3) त्रिपुरेशी
(4) त्रिपुरसुन्दरी (5) त्रिपुरवासिनी
(6) त्रिपुराश्रीः (7) त्रिपुरमालिनी
(8) त्रिपुरासिद्धा (9) त्रिपुराम्बा (10) त्रिपुरभैरवीसंज्ञकाः ।



पुष्पराग – महारत्न – प्राकारं प्रणमाम्यहम् ।
पद्मरागाख्यरत्नानां, प्राकारं सर्वदा भजे ॥ ११२ ॥

गोमेद – रत्न – प्राकारं, वज्रप्राकारमाश्रये ।
वैडूर्य – रत्न – प्राकारं, प्रणमामि तवेश्वरि ॥ ११३ ॥

इन्द्रनीलाख्यरत्नानां, प्राकारं प्रणमाम्यहम् ।
मुक्तारत्नमयं चैव, प्राकारं सर्वदा भजे ॥ ११४ ॥

मरकताख्य - महारत्न-प्राकाराय नमस्तव ।
विद्रुमाख्य - महारत्न-प्राकारं तु तवाश्रये ॥ ११५ ॥

माणिक्य-मण्डपं वन्दे, सहस्रस्तम्भमण्डपम् ।
त्रिपुरे तव देवेशि, भजाम्यमृतवापिकाम् ॥ ११६ ॥

आनन्दवापिकां वन्दे, भजे चैव विमर्शिकाम् ।
भजे बालातपोद्गारं, चन्द्रिकोद्गारमाश्रये ॥ ११७ ॥

महाशृङ्गारपरिखां, महापद्माटवीं भजे ।
चिन्तामणिमहारत्नगृहराजं, नमाम्यहम् ॥ ११८ ॥

ब्रह्मात्मकं मञ्चपादमेकं तव नमाम्यहम् ।
एकं विष्णुमयं मञ्चपादं तव नमाम्यहम् ॥ ११६ ॥

एकं रूद्रमयं मञ्चपादं तव नमाम्यहम् ।
मञ्चपादं नमाम्येकं तव देवीश्वरात्मकम् ॥ १२० ॥

मञ्चैकं फलकं वन्दे, सदाशिवमयं शुभम् ।
नमामि ते हंसतूलतूलिकाम् परमेश्वरि ॥ १२१ ॥

भजामि ते हंसतूलमहोपधानमुत्तमम् ।
कौसुंभास्तरणं देवि, तव नित्यं भजाम्यहम् ॥ १२२ ॥

महावितानकं वन्दे, महाजवनिकां भजे ।
एवं पूजागृहं ध्यात्वा, श्रीचक्रस्य शिवप्रिये ॥ १२३ ॥

मद्दक्षिणे स्थापयामि, भागे पुष्पाक्षतादिकम् ।
लयस्वरूपिणीं ध्याये, महात्रिपुरसुन्दरीम् ॥ १२४ ॥

जलसंशोधनं मन्त्रं, न्यस्य वस्तुषु प्रोक्षणम् ।
ततोऽमृतीकृत्य तालं, त्रिधाऽवगुण्ठ्य चेक्षणम् ॥ १२५ ॥

अधिष्ठाने च पुष्पस्य, प्रणवं पूर्वमुद्धरेत् ।
शताभिषेकेति पदं, शतमीति ततः परम् ॥ १२६ ॥

खेकेति च ततः प्रोक्तं, हुंफट् स्वाहा ततः परम् ।
प्रणवं पुष्पकेतुश्च, तथा राजार्हतेऽपि च ॥ १२७ ॥

शताय सम्यगित्युक्त्वा, जपेच्चैव च हूमिति ।
पुष्पचयावकीर्णे हुँफट्स्वाहा च ततः परम् ॥ १२८ ॥

विशोध्य पुष्पमेतेन, जलं पूर्ववदाहरेत् ।
पुष्पे पुष्पे महापुष्पे, पुष्पावकीर्ण इत्यपि ॥ १२९ ॥

स्वाहेति शोधयेत् पुष्पं, तेन पुष्पेण पूजयेत् ।
अभितस्ते महादेवि, दीपाँस्तान्दर्शयाम्यहम् ॥ १३० ॥

[1]दीपदेवि ! महादेवि ! शुभं भवतु मे सदा ।
यावत्पूजासमाप्तिः स्यात्तावत्प्रज्वल सुस्थिर ॥ १३१ ॥

सुगन्ध-पुष्पाण्यादाय, चन्दनाक्तानि मन्त्रवित् ।
मन्त्रयित्वा करौ सम्यक्, सुरभीकृतविद्यया ॥ १३२ ॥

करशुद्धाख्यया वामकरेणादाय तान्यथ ।
नाराचमुद्रामंत्रेण, वक्ष्यमाणेन दूरतः ॥ १३३ ॥

ते सर्वे विलयं यान्तु, ये मां हिंसन्ति हिंसकाः ।
मृत्युरोगभयक्लेशाः, पतन्तु रिपुमस्तके ॥ १३४ ॥

पठित्वेत्थं परित्यज्य, वामे नाराचमुद्रया ।
पुनश्च करशुद्ध्याख्यविद्ययाऽन्योऽन्यमार्जनम् ॥ १३५ ॥

शोधयित्वा करौ पश्चात्, मध्यमादितलावधि ।
मध्याऽनामाकनिष्ठासु, तर्जन्यङ्गुष्ठयोरपि ॥ १३६ ॥

तलयोश्च न्यसेद् विद्यां, स्थित्या सा वक्ष्यतेऽधुना ।
मूलेन त्रिपुराचक्रं, तव सम्पूजयाम्यहम् ॥ १३७ ॥

त्रिभिः खण्डैस्तव त्र्यस्रं, पूजयामि शिवप्रिये ।
वाय्वग्निजलसंयुक्तप्राणायामैरहं शिवे ॥ १३८ ॥

शोषणं दाहकं देवि, करोम्याप्लावनं तथा ।
त्रिवारं मूलमन्त्रेण, प्राणायामं करोम्यहम् ॥ १३९ ॥

अस्त्रमन्त्रेणाष्टवारं, मण्डपान्तर्विकीर्य च ।
नाराचमुद्रया मन्त्री, मन्त्रद्वयमिमं पठन् ॥ १४० ॥

---

१. घृतदीपो दक्षिणे स्यात्तैलदीपस्तु वामतः ।
सितवर्तियुतो दक्षे, रक्तवर्तिस्तु वामतः ॥



अपक्रामन्तु भूतानि, पिशाचाः प्रेतगुह्यकाः ।
ये चात्र निवसन्त्यन्ये, देवता भुवि संस्थिताः ॥ १४१ ॥

अपसर्पन्तु ते भूता, ये भूता भुवि संस्थिताः ।
ये भूताः विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया ॥ १४२ ॥

इत्यन्ते रोषतोऽस्त्रेण, तस्मान्निर्गच्छतां बुधः ।
दद्यात्स्ववामतो मार्गं, भूतानां विघ्नकारिणाम् ॥ १४३ ॥

पाखण्डचारिणो भूताः, भूमौ ये चान्तरिक्षगाः ।
दिवि लोके स्थिता ये च, ते नश्यन्तु शिवाज्ञया ॥ १४४ ॥

ये चात्र विघ्नकर्त्तारो, भुवि दिव्यन्तरिक्षगाः ।
विघ्नभूताश्च ये चान्ये, मम मन्त्रस्य सिद्धिषु ॥ १४५ ॥

मयैतत् कीलितं क्षेत्रं, परित्यज्य विदूरतः ।
अपसर्पन्तु ते सर्वे, निर्विघ्नं सिद्धिरस्तु मे ॥ १४६ ॥

वेतालाश्च पिशाचाश्च, राक्षसाश्च सरीसृपाः ।
अपसर्पन्तु सर्वत्र, मन्त्ररूपास्त्रमाहितम् ॥ १४७ ॥

इत्यन्तेऽस्त्रं पठन् मंत्री, पार्ष्णिघातत्रयेण तु ।
भौमानूर्ध्वोर्ध्वतत्तालत्रितयेनाऽन्तरिक्षगान् ॥ १४८ ॥

तीक्ष्णदृष्ट्यावलोकेन, दिव्यान् विघ्नान् निवारयेत् ।
मण्डपाऽभ्यन्तरे वास्तुपुरूषं नैर्ऋते यजेत् ॥ १४९ ॥

तत्रैव वास्त्वधीशानं, ब्रह्माणं चन्दनादिभिः ।
ऐशान्यां कुलनाथञ्च, दीपनाथञ्च पूजयेत् ॥ १५० ॥

दीपनाथं रक्तवर्णं, द्वारद्वादशशक्तिभिः ।
रक्तप्रभा तथा ज्वाला, तेजोवती तथैव हि ॥ १५१ ॥

ज्योत्स्ना प्रकाशिनी शक्तिरूद्योतिनी तथैव च ।
अंशुभूता च संपूज्या, दुःस्पर्शनीतिनामिकाः ॥ १५२ ॥

मयूखमालिनीख्याता, निर्विकल्पेति शक्तयः ।
सहितं पूजयेन्मन्त्री, श्रीसप्ताक्षरविद्यया ॥ १५३ ॥

ततः संप्रार्थयेद् दीपनाथस्याज्ञां समाहितः ।
अस्मिन् क्षेत्रे दीपनाथ, निर्विघ्नं सिद्धिहेतवे ॥ १५४ ॥

श्रीचक्रक्रमपूजार्थमनुज्ञां दीयतां मम ।
श्रीगुरो ! दक्षिणामूर्ते ! भक्तानुग्रहकारक ॥ १५५ ॥

अनुज्ञां देहि भगवन्, श्रीचक्रयजनाय मे ।
एवमेतान् समभ्यर्च्य, भैरवाज्ञामथाऽर्थयेत् ।। १५६ ।

तीक्ष्णदंष्ट्र ! महाकाय ! कल्पान्तदहनोपम ! ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ।। १५७ ।।

गुरुदेवतयोर्मन्त्रदेवयोश्च क्षणं पुनः ।
ऐक्यं सञ्चिन्त्य गृह्णीयादाज्ञां बद्धाञ्जलिः पठन् ।। १५८ ।।

महात्रिपुरसुन्दरि ! देह्यनुज्ञां महेश्वरि ।
प्रयतिष्ये निदेशस्ते, योगक्षेमार्थसिद्धये ।। १५९ ।।

एवं निदेशं संगृह्य, योगक्षेमप्रदोत्तमम् ।
इति प्रार्थ्य च लब्धाज्ञो, यागरक्षार्थमर्चयेत् ।। १६० ।।

पश्चिमद्वारमारभ्य, नवशक्तीरिमा यजेत् ।
शक्तिद्वयं प्रतिद्वारं, मध्ये चैकां यथाक्रमम् ।। १६१ ।।

दूतरी सुन्दरी चैव, विरूपा सुमुखी तथा ।
विमला चान्तरी पश्चाद्, बन्दरी च पुरन्दरी ।। १६२ ।।

पुष्पमर्द्दिन्यथाऽम्बा श्रीपादुकां पूजयामि च ।
रुद्रं शलभनामानं सुदर्शनहरिं ततः ।। १६३ ।।

अघोररुद्रं गन्धाद्यैः दुर्गां विन्ध्यनिवासिनीम् ।
उत्तरद्वारमारभ्य यावद् द्वारन्तु पश्चिमम् ।। १६४ ।।

तत्रादावुत्तरद्वारे रुद्रं शलभसंज्ञकम् ।
तारहृद्भगमानीय कामिका सोर्ध्वकेशिनी ।। १६५ ।।

बकेशश्च पिनाकीशो निद्रा वै मृत्युरूपिणी ।
सदीर्घाथ पिनाकीशो जलस्थोऽनन्तसंयुतः ।। १६६ ।।

वायुस्तथा लोहितेशः संवर्तेशः सलोचनः ।
वह्निदीर्घयुतः छान्तो दीर्घावान मरुतस्तथा ।। १६७ ।।

महाकालो महाकालो बकेशः पूतनाग्नियुक् ।
वामकर्णयुतावाथ सदीर्घः शेषयुग्मकम् ।। १६८ ।।

सन्ध्यावायुः पुनश्चैतत् अयं मेधाद्वयं पृथक् ।
तद्वामपार्श्वे शलभं ध्यात्वा शिवसमाकृतिम् ।। १६९ ।।

तारहृद्भगवत्यन्ते शलभ्यन्ते च शालिनी ।
शलभीमर्चयेद् भक्त्या साधकश्चन्दनादिभिः ।। १७० ।।



पूर्वद्वारे यजेत्पश्चात् ध्यात्वा विष्णुं सुदर्शनम् ।
प्रणवौ भृगुहंसौ च पुनर्ब्रह्मासनो भृगुः ।। १७१ ।।

ततस्तु दक्षिणे द्वारे ह्यघोरं चन्दनादिभिः ।
अथ दुर्गां यजेद् द्वारि पश्चिमे विन्ध्यवासिनीम् ।। १७२ ।।

स्वाग्रे त्रिकोणं कुर्यादासनाधो महेश्वरि ।
तत्र योगासनं पूज्यं वीरासनमथाऽर्चयेत् ।। १७३ ।।

शरासनं पूजयित्वा चानन्तासनमर्चयेत् ।
अर्चयित्वा महेशानि विमलासनमुत्तमम्[1] ।। १७४ ।।

तत्रोपविश्य चाचम्य देहशुद्धिं करोम्यहम् ।
पूजावेदीं समासाद्य पृथिवीं प्रार्थयेत्ततः ।। १७५ ।।

मेरुपृष्ठ-ऋषिः प्रोक्तः सुतलं छन्द ईरितम् ।
कूर्मोऽत्र देवता प्रोक्ता आसनारोपणे तथा ।। १७६ ।।

विनियोगस्तु कथितस्ततो धृत्वा पठेदिदम् ।
पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।। १७७ ।।

त्वं च धारय मां देवि, पवित्रं कुरु चासनम् ।
वसुधे हेमगर्भाऽसि, शेषस्योपरिशायिनि ।। १७८ ।।

स्थानं मे देहि पूजार्थं, गृहाणार्घ्यं धरित्रि मे ।
ॐ नमो देव्यै भगवत्यै धरण्यै धारिणि धरे ।। १७९ ।।

स्वाहेत्यनेन मन्त्रेण, दद्यादर्घ्यं विधानतः ।
प्रथमं त्रिकोणमालिख्य, योगवीरौ शरं तथा ।। १८० ।।

कूर्मविमलावनन्तञ्च, पूजयेदासनं शुभम् ।
ॐ निमन्त्रिता मया देवि, साङ्गा च गुरुपूर्वकम् ।। १८१ ।।

पुष्पधूपादिसहिते, सौमनस्यं प्रयच्छ मे ।
आमंत्रिता मया भक्त्या, श्रीचक्रगुरुदेवता ।। १८२ ।।

दिव्ययागसमृध्यर्थमेह्येहि परमेश्वरि ।
इत्युक्त्वैव दूर्वाक्षतान्, वेद्यां मंत्री च निक्षिपेत् ।। १८३ ।।

किंचिद् विचिन्त्य स्वात्मानं, शिरसावरोहनं यजेत् ।
मंचस्य दक्षिणद्वारपार्श्वयोरुभयोः खलु ।। १८४ ।।

(१) आधारशक्तिकमलासनं देवी नमोऽर्च्यं ।

मायां दुर्गां समर्चेत, पूर्वोक्तसंविधानतः ।
मंचस्य पूर्वद्वारे तु, पार्श्वयोरूभयोस्ततः ।। १८५ ।।

भद्रकालीं च स्वस्ति श्रीमभ्यर्च्य च विधानतः ।
एवं तथोत्तरे द्वारि, पार्श्वयोरूभयोर्ननु ।। १८६ ।।

पूज्ये पूर्वविधानेन, स्वाहा चैव शुभङ्करी ।
गौरी श्रीलोकधारी च द्वाराग्रे दक्षिणोत्तरे ।। १८७ ।।

द्वाराग्रे पश्चिमे द्वारि पूज्या वागीश्वरी ततः ।
करोम्यनेन मन्त्रेण, तालत्रयमहं शिवे ।। १८८ ।।

नारायणोऽहं ब्रह्माहं, भैरवोऽहं शिवोऽस्म्यहम् ।
देवोऽहं परमात्माहं, महात्रिपुरसुन्दरि ।। १८९ ।।

ध्यात्वैवं वज्रकवचं, न्यासं तव करोम्यहम् ।
कुमारीबीजसंयुक्तं, महात्रिपुरसुन्दरि ।। १९० ।।

हृदि मां रक्ष रक्षेति, करोम्यञ्जलिमीश्वरि ।
सुधार्णवासनं नौमि, कालचक्रासनं ततः ।। १९१ ।।

पीताम्बुजासनं नौमि, वन्दे दिव्यासनं ततः ।
सर्वचक्रासनं वन्दे, सर्वमन्त्रासनं ततः ।। १९२ ।।

साध्यसिद्धासनं वन्दे, नवयोन्यासनं ततः ।
पर्यङ्कपीठासनकं, महाप्रेतासनं ततः ।। १९३ ।।

ततः पद्मासनं वन्दे, सर्वत्रैवं सुसंस्थिरम् ।
नमो देव्यासनायेति, प्रकरोम्यासनं शिवे ।। १९४ ।।

चन्द्रासनं नमस्यामि, सर्वमन्त्रासनं भजे ।
साध्य-सिद्धासनं वन्दे, मन्त्रैरेभिर्महेश्वरि ।। १९५ ।।

करोम्यस्मिंश्चक्रमन्त्रदेवतासनमुत्तमम् ।
वशिन्याद्यष्टकं न्यासं, नवयोन्याख्यमुत्तमम् ।। १९६ ।।

षोढान्यासं ततः कुर्वे, महाषोढामनन्तरम् ।
[षोढान्यासं तु वै कुर्यात् येन ब्रह्माण्डरूपकम् ।। १९७ ।। A

विराट्स्वरूपी परमात्मा, शिवः साक्षान्न संशयः ।
चक्रन्यासं ततः कुर्वे, श्रीकण्ठन्यासमुत्तमम् ।। १९८ ।।

A ऋषिस्तु दक्षिणामूर्तिः, गायत्री छन्द उच्यते ।
विराट्स्वरूपिणी देवी, महात्रिपुरसुन्दरी ।।



केशवादिमहान्यासं, कामन्यासं करोम्यहम् ।
कलान्यासं ततः कुर्वे कामकलाह्वयम् ।। १९९ ।।

पीठन्यासं ततः कुर्वे तत्त्वन्यासं करोम्यहम् ।
करोम्यथ षडङ्गाख्यं, मातृकाश्च करोम्यहम् ।। २०० ।। B

षोढान्यासस्य स्वरूपम् —

बीजकूटं क्रमो धातुस्तत्त्वं पञ्चमपञ्चकम् ।
पञ्चविंशतिसंख्याकाः न्यासा एते प्रकीर्तिताः ।। २०१ ।।

ततश्च लघुषोढा स्यात्, महाषोढा ततः परम् ।
महानिर्वाणषोढा च, सर्वे देवि प्रकीर्तिताः ।। २०२ ।।

अङ्गषोढा—

अङ्गषोढा कुलेशानि, कुर्यात् पूर्वोक्तवर्त्मना ।
महाषोढाह्वयं न्यासं, ततः कुर्यात् समाहितः ।। २०३ ।।

अधराम्नाय-षोढान्यासः—

रवौ पद्मे शिवकला, ग्रहदोषनिवारकः ।
दिक्पाल-डाकिनी-तारादिकं पीठं च विन्यसेत् ।। २०४ ।।

पूर्वाम्नायषोढान्यासः —

प्रातः श्रीभुवनेश्वर्याः, षोढान्यासं समाचरेत् ।
श्रीमहाभुवनेश्वर्याः महाषोढां तथा न्यसेत् ।। २०५ ।।

स्वाधिष्ठाने तु न्यस्तव्याः, पूर्वाम्नायक्रमादिमे ।
मध्याह्ने दक्षिणाकाल्याः, महाषोढां च विन्यसेत् ।। २०६ ।।

परा परात्परान्यासो, परात्परातीता तथा ।
चित्परा चित्परात्परा, सोमे स्वाधिष्ठाने तथा ।
सा चित्परात्परातीता, तथेयं भुवनेश्वरी ।। २०७ ।।

दक्षिणाम्नाय-षोढान्यासः —

मणिपूराख्यचक्रे तु, भक्तिभावसमन्वितः ।
महोग्रतारादेव्यास्तु, मूलाधारे न्यसेत् सदा ।। २०८ ।।

B वाग्दीक्षाक्रमश्चैव, दीक्षाक्रमस्तथैव च ।
न्यासश्च द्विविधाबुक्तौ, नित्यं नहि क्रियेत चेत् ।।

हंसः मन्त्रो लघुश्चैव, महाषोढा तथा स्मृतः ।
ग्रहाश्च राशिनक्षत्रे, योगः करण एव च ।
पञ्च संवत्सराः काल्याः मनोभौमे न्यसेत्तथा ॥ २०९ ॥

पश्चिमाम्नाय-षोढान्यासः —

घोराष्टकं त्रिखण्डा तु, चैवाक्षरो द्विपञ्चकम् ।
डादिषष्ठकन्यासोऽपि, षोढान्यास उदाहृतः ॥ २१० ॥

ग्रन्थिन्यासं तथाघोरं, द्वादशांगं षडङ्गकम् ।
मालिनी–शब्दराशी च षड्दूतं रत्नपञ्चकम् ।
नवात्मा नवघोराश्च, षोढाश्चैव त्रिविधया ॥ २११ ॥

त्रिखण्डं मन्त्रखण्डं, तु, मातृखण्डं तथैव च ।
रुद्रखण्डमिति प्रोक्तमनाहते बुधवासरे ।
रक्ष मां कुब्जिके देवि, रक्ष मां कुब्जिकेश्वरि ॥ २१२ ॥

रक्ष रक्ष महादेवि ! अस्मदीयमिदं वपुः ।
कुलदेवीतिविख्याता, कैलासशिखरालये ।
सा कुब्जिका महामाया, स्थातु श्रीर्मम मस्तके ॥ २१३ ॥

कवचपाठे महत्पुण्यं, जायते तेन निर्भयः ।
कवचेन रक्षां प्राप्नोति, तस्मान्नित्यं पठेन्नरः ॥ २१४ ॥

उत्तराम्नाय-षोढान्यासः —

प्रागेव ब्रह्ममुहूर्तात्, कुर्यात्षोढाचतुष्टयम् ।
बालायाः पञ्चदश्याञ्च, महाषोडशिकाख्यायाः ॥ २१५ ॥
महात्रिपुरसुन्दर्य्याः, आज्ञाचक्रे तु विन्यसेत् ।
उत्तराम्नायमाश्रित्य, प्राक् प्रातः कृत्यतश्चरेत् ॥ २१६ ॥

उग्रमातृक्रमः काली, कुलपीठानि योगिनी ।
देवता–मन्त्ररूपाणि, न्यासेऽयं कालिकाक्रमे ।
षोढान्यासो विशुद्धे तु, विन्यसेच्च क्रमात्तथा ॥ २१७ ॥

ततश्च लघुषोढा स्यात् महाषोढा ततः परम् ।
महानिर्वाणषोढा च, गुरावेतत् प्रकीर्तितम् ॥ २१८ ॥

ऊर्ध्वाम्नायलघुषोढान्यासः —

शुक्रवारे गणेशश्च, दशविद्यामयो ग्रहः ।
नक्षत्रयोगिनीराशि – पीठं लघुषोढा स्मृतः ॥ २१९ ॥



ऊर्ध्वाम्नायमहाषोढान्यासः —

प्रपञ्चभुवनं मूर्त्ति– मन्त्रदैवतमातरः । A
महाषोढा ह्ययं न्यास, आज्ञायां विन्यसेत्सदा ॥ २२० ॥
सास्मदीयं शिरःपातु, सदा तिष्ठतु भैरवी ।

या विशाला विशालाक्षी, निर्मला मलवर्जिता ।
मा योगिनी महामाया, स्थातु श्रीर्मस्तके मम ॥ २२१ ॥

सिद्धेश्वरी परापरा, महाविद्या महाकला ।
बीजकलावरोहाश्च, सहस्रारे शनौ न्यसेत् ॥ २२२ ॥

एतत्पाठे महत्पुण्यं, न्यासो देवस्वरूपगः ।
केवलन्यासपाठेन, तत्र तिष्ठन्ति देवताः ॥ २२३ ॥
( केवलं स्मृतिमात्रेण, तिष्ठन्ति सर्वदेवताः । )

## पात्रसाधनम्

ततः करोमि स्थित्यादिन्यासं त्वत्त्रिपुरेश्वरि ।
ततःशुद्धोदकेनाहं, वामभागे महेश्वरि ॥ २२४ ॥

करोमि मण्डलं वृत्तं, चतुरस्रं ,शिवप्रिये ।
पुष्पैरभ्यर्च्य साधारं, शङ्खं संस्थापयाम्यहम् ॥ २२५ ॥

अर्चयामि षडङ्गेन, जलमापूरयाम्यहम् ।
ददामि चादिमं बिन्दुं, कुर्वे मूलाभिमन्त्रितम् ॥ २२६ ॥

तज्जलेन जगन्मातस्त्रिकोणं वृत्तसंयुतम् ।
षट्कोणं चतुरस्रं च, मण्डलं प्रकरोम्यहम् ॥ २२७ ॥

विद्यया पूजनं मध्ये, खण्डैस्त्र्यस्राभिपूजनम् ।
बीजावृत्त्या कोणषट्कं पूजयामि शिवप्रिये ॥ २२८ ॥

तस्मिन्दशकलायुक्तमग्निमण्डलमाश्रये ।
धूम्रार्चिषं नमस्यामि उष्मांच ज्वलिनीं भजे ॥ २२९ ॥

ज्वालिनीं च नमस्यामि, वन्देऽहं विस्फुलिङ्गिनीम् ।
सुश्रियं च सुरूपां च, कपिलां प्रणमाम्यहम् ॥ २३० ॥

A कूटबीजैर्विना देवि, षोढान्यासो न सिद्ध्यति ।
तस्मात् सर्वप्रयत्नेन, कूटमन्त्रान् हि योजयेत् ॥

नौमि हव्यवहां नित्यं, भजे कव्यवहां कलाम् ।
यादिभिः सहिता वह्नेः, कला दश तथा भजे ॥ २३१ ॥

सूर्यस्य मण्डलं तत्र, कला द्वादशकात्मकम् ।
अर्घ्यपात्रे त्वहं वन्दे, तपिनीं तापिनीं भजे ॥ २३२ ॥

धूम्रां मरीचिं वन्देऽहं, ज्वालिनीं च रुचिं भजे ।
सुषुम्णां भोगदां वन्दे, भजे विश्वां च बोधिनीम् ॥ २३३ ॥

धारिणीं च क्षमां वन्दे, सौरा एताः कला भजे ।
सोमस्य मण्डलं तत्र, कलाः षोड़शकात्मकाः ॥ २३४ ॥

अग्राङ्किताः कला अमावस्यायाः खलु :—

अमृता मानसी तुष्टिः, पुष्टिः प्रीती रतिस्तथा ।
श्रीश्च ह्रीश्च स्वधा रात्रिर्ज्योत्स्ना हैमवती तथा ।
छायाऽन्या पूर्णिमा विद्या, अमावस्या च षोडशी ।
आभिर्वा पूजयेत् सोमं, पराभिर्वा यथाक्रमात् ॥

एताश्च शुक्ल पक्षस्य : —

अमृता मानदा पूषा, तुष्टिः पुष्टिः रतिर्धृतिः ।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा ।
पूर्णा पूर्णामृता कामदायिन्यः स्वरगाः कलाः ॥
अर्घ्यामृतात्मकं वन्देऽमृताञ्च मानदां स्तुवे ।
पूषां तुष्टिं भजे पुष्टिं, रतिं धृतिमहं भजे ॥ २३५ ॥

शशिनीं चन्द्रिकां वन्दे, कान्तिं ज्योत्स्नां श्रियं भजे ।
नौमि प्रीतिं चांगदां च, पूर्णां पूर्णामृतां भजे ॥ २३६ ॥

स्वरैःषोडशभिर्युक्ता, भजे सोमस्य वै कलाः ।
त्रिकोणलेखनं कुर्वे, अकथादिसुरेखकम् ॥ २३७ ॥
ह-ळ-क्षवर्णसंयुक्तं, स्थितान्तर्हंसभास्वरम् ।
वाक्कामशक्तिसंयुक्तहंसेनाराधयाम्यहम् ॥ २३८ ॥

वृत्ताद्बहिः षडस्त्रे च, लेखनं प्रकरोम्यहम् ।
पुरोमार्गादि-षट्कोणं, षडङ्गेनार्चयाम्यहम् ॥ २३९ ॥

श्रीविद्यायाः सप्तवारं, करोम्यत्राभिमन्त्रणम् ।
समर्पयामि विश्वेशि, तस्मिन् गन्धाक्षतादिकम् ॥ २४० ॥

ध्यायामि पूजाद्रव्यं ते, सर्वं विद्यामयं शुभम् ।
चतुर्नवतिसन्मन्त्रान् स्पृष्ट्वातत्प्रयजाम्यहम् ॥ २४१ ॥



वन्हेर्दशकलाः सूर्यकलाद्द्वादशकं भजे ।
आश्रये षोडशकलास्तत्र सोमस्य कामदाः ॥ २४२ ॥

सृष्टिमृद्धिं स्मृतिं वन्दे, मेधां कान्तिं नमाम्यहम् ।
लक्ष्मीं धृतिं स्थिरां वन्दे, स्थितिं सिद्धिं भजाम्यहम् ॥ २४३ ॥

एता ब्रह्मकला वन्दे, जरां तां पालिनीं भजे ।
शान्तिंनमामीश्वरीं च, रतिं वन्दे च कामिकाम् ॥ २४४ ॥

वरदां ह्लादिनीं वन्दे, प्रीतिं दीर्घां भजाम्यहम् ।
टादिभिः सहिता विष्णोः, कला दश तथा भजे ॥ २४५ ॥

एता विष्णोः कला वन्दे, तीक्ष्णां रौद्रीं भयां तथा ।
निद्रां तन्द्रां क्षुधां वन्दे, नमामि क्रोधिनीं क्रियाम् ॥ २४६ ॥
उद्गारीं च भजे मृत्युमेता रुद्रकला भजे ।
पीतां श्वेतां भजे नित्यमरुणां च तथा भजे ॥ २४७ ॥

भजेऽसितां तथाऽनन्तां, षादिभिः सहितास्तथा ।
ईश्वरस्य कला ह्येता, वन्दे नित्यमभीष्टदाः ॥ २४८ ॥

निवृत्तिं च प्रतिष्ठां च, विद्यां शान्तिं नमाम्यहम् ।
इन्धिकां दीपिकां चैव, रेचिकां मोचिकां तथा ॥ २४९ ॥

परां सूक्ष्मां नमस्यामि, नौमि सूक्ष्मामृतां कलाम् ।
वन्दे ज्ञानकलां चैव, तथा ज्ञानामृतां कलाम् ॥ २५० ॥

आप्यायिनीं व्यापिनीं च, व्योमरूपां नमाम्यहम् ।
कलाः सदाशिवस्यैताः, षोडश प्रणमाम्यहम् ॥ २५१ ॥

हंसाख्यं च महामन्त्रं, ज्योतिषं हंसमाश्रये ।
प्रतत्प्रथमविश्वान्तं, मन्त्रं ज्योतिषमाश्रये ॥ २५२ ॥

त्र्यम्बकं च नमस्यामि, तद्विष्णोः प्रणमाम्यहम् ।
विष्णुर्योनिं मूलविद्यां, मन्त्रैरेभिरनुत्तमैः ॥ २५३ ॥

अमृतं मन्त्रितं वन्दे, चतुर्नवतिभिस्तव ।
अखण्डैकरसानन्दकरेऽपरसुधात्मनि ॥ २५४ ॥
स्वच्छन्द - स्फुरणामत्र निधेह्यकुलरूपिणि ।
अकुलस्याऽमृताकारे, शुद्धज्ञानकरे परे ॥ २५५ ॥

अमृतत्वं निधेह्यस्मिन्, वस्तुनि क्लिन्नरूपिणि ।
तद्रूपिण्यैकरस्य त्वं, कृत्वा ह्येतत्स्वरूपिणि ॥ २५६ ॥

भूत्वा परामृताकारा, मयि चित्स्फुरणं कुरु ।
अमृतेशीं नमस्यामि, सर्वदामृतवर्षिणीम् ।। २५७ ।।

वाग्वादिनीं नमस्यामि, श्रीविद्यां प्रणमाम्यहम् ।
एभिर्मनूत्तमैर्वन्दे, मन्त्रितं परमामृतम् ।। २५८ ।।

ज्योतिर्मयमिदं कुर्वे, परमर्घ्यं महेश्वरि ।
तद्बिन्दुभिर्मे शिरसि, त्रिगुरुन्पूजयाम्यहम् ।। २५९ ।।

साक्षी तु सर्वभूतानां, ज्ञानात्मा परिकीर्तितः ।
आत्मान्तरात्मपरमज्ञानात्मानः प्रकीर्तिताः ।। २६० ।।

एतद्रूपं हि चित्कुण्डं, चतुरस्रं विभावयेत् ।
आनन्दमेखलारम्यं, बिन्दुत्रिवलयान्वितम् ।। २६१ ।।

अर्धमात्रा - योनिरूपं, ब्रह्मानन्दमयं सदा ।
परदेवमये सर्वज्ञानदीपविजृम्भिते ।। २६२ ।।

ब्रह्माहमस्मि तद्बिन्दुं कुण्डलिन्यां जुहोम्यहम् ।
हृच्चक्रस्थां महादेवीं, महात्रिपुरसुन्दरीम् ।। २६३ ।।

जुहुयात् सन्निभे वह्नौ, प्रपञ्चाहुतिमुत्कटम् ।
शब्दाख्यमातृकारूपमक्षवर्णविराजितम् ।। २६४ ।।

---

← (अ) हँसशुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योम सदब्जा गोजाऋतजाअद्रिजा ऋतं बृहत् ।। नमः ।।
ऋक् ४।४०।५

प्रतद्विष्णु स्तवेत् वीर्याय मृगोन भीमः कुचरोगिरिष्ठाः ।
यस्योरुषु त्रिपु विक्रमणेष्वधिक्षियन्ति भुवनानिविश्वा ।। नमः ।। शु.य. ५।२०
त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ।। नमः ।। शु.य. ३।६०
तद्विष्णोः परमं पद ँ सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसः सभिन्धते ।
विष्णोर्यत्परमंपदम् ।। नमः ।। शु.य. ६।५
विष्णुर्योनिं कल्पयुत त्वष्टा रूपाणि पिंशतु ।
आसिञ्चतु प्रजापति र्धाता गर्भं दधातु ते ।। ऋक् १०।१८४।१
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा ।। नमः ।। ऋक् १०।१८४।२



अक्षराणि हुतान्यत्र निःशब्दं ब्रह्म जायते ।
कृत्याकृत्ये पापपुण्ये, संकल्पञ्च विकल्पनम् ।। २६५ ।।

धर्माधर्मैः साधकेन्द्रो, हविस्तेन प्रकल्पयेत् ।
जुहुयाच् चित्स्वरूपाग्नौ, मनुभिस्तेन याजकः ।। २६६ ।।

मूलविद्यां ब्रह्मरूपां, ध्यात्वा संविन्मयीं पराम् ।
धर्माधर्महविर्दीप्त, आत्माग्नौ मनसा स्रुचा ।। २६७ ।।

सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम् ।
अग्निजायान्वितो मन्त्रो, मूलान्ते प्रकटीकृतः ।। २६८ ।।

नाभौ चैतन्यरूपाग्नौ, हविषा मनसा स्रुचा ।
ज्ञानप्रदीपिते नित्यमक्षवृत्तीर्जुहोम्यहम् ।। २६९ ।।

वह्निजायान्वितो मन्त्रो, मूलान्ते समुदाहृतः ।
प्रकाशमक्षहस्ताभ्यामवलम्ब्योन्मनी स्रुचा ।। २७० ।।

धर्माधर्मकलास्नेह-पूर्णमग्नौ जुहोम्यहम् ।
अग्निजायान्वितो मन्त्रो, मूलान्ते च महात्मना ।। २७१ ।।

अन्तर्निरन्तरनिरिन्धनमेधमाने
मायान्धकारपरिपन्थिनि संविदग्नौ ।
कस्मिंश्चिदद्भुतमरीचिविकाशभूमौ
विश्वं जुहोमि वसुधादि शिवावसानम् ।। २७२ ।।

जुहुयान्मूलमन्त्रान्ते, ब्रह्मप्राप्त्यै च साधकः ।
निष्प्रपंचो यदा काले, जायते ब्रह्मविन्नरः ।। २७३ ।।

तदा संविन्मयः साक्षात्, केवलं ब्रह्मरूपतः ।
अन्तर्होममनुः प्रोक्तः, सर्वपापनिकृन्तनः ।। २७४ ।।

येनेदं ज्ञायते सर्वं, समत्वेन च सर्वदा ।
चन्द्रःसूर्यो यथा नित्यं, नीरक्षीरेषु दृश्यते ।। २७५ ।।

तद्वत् क्षीरस्य समता, नीरक्षीरविभेदतः ।
कर्दमे चन्दने भिन्नं, न भवेदन्त्यजे द्विजे ।। २७६ ।।

निरस्तमोहतिमिरां, साक्षात्संवित्स्वरूपिणीम् ।
नासापुटे परकलमथ निर्गमयाम्यहम् ।। २७७ ।।

समानयामि तां हस्ते, त्रिखण्डकुसुमाञ्जलौ ।
जगन्मातर्महादेवि, महात्रिपुरसुन्दरि ।। २७८ ।।

सुधाचैतन्यमूर्त्तिं ते, कल्पयामि नमःशिवे ।
अनेन मनुना देवि, यन्त्रे त्वां स्थापयाम्यहम् ।। २७९ ।।

महापद्मवनान्तस्थे, कारणानन्दविग्रहे ।
सर्वभूतहिते मातरेह्येहि परमेश्वरि ।। २८० ।।

देवेशि भक्तिसुलभे, सर्वावरणसंयुते ।
यावत्त्वां पूजयिष्यामि, तावत्त्वं सुस्थिरा भव ।। २८१ ।।

अनेन मन्त्रयुग्मेन, त्वामत्रावाहयाम्यहम् ।
कल्पयामि नमः पाद्यमर्घ्यं ते कल्पयाम्यहम् ।। २८२ ।।

पादुके परिधायाम्ब, त्रिपुरे रत्ननिर्मिते ।
सुगन्धतैलाभ्यङ्गं च, मज्जशालाप्रवेशनम् ।। २८३ ।।

स्नानमण्डपमायाहि, स्नानार्थं शक्रदिग्गतम् ।
आगच्छ निर्मलं याम्यमलङ्कारस्य मण्डपम् ।। २८४ ।।

पादुकायुग्ममारुह्य, पञ्चवाद्यपुरःसरम् ।
यागमण्डपमायाहि, परिवारगणैः सह ।। २८५ ।।

कल्पयामि नमस्तस्मिन्, मणिपीठोपवेशनम् ।
दिव्यस्नानीयमीशानि, गृहाणोद्वर्तनं शुभम् ।। २८६ ।।
गृहाणोष्णोदकस्नानं, कल्पयामि नमस्तव ।
हेमकुम्भच्युतैस्तीर्थैः, कल्पयाम्यभिषेचनम् ।। २८७ ।।

कल्पयामि नमस्तुभ्यं, धौतेन परिमार्जनम् ।
बालभानुप्रतीकाशं, दुकूलपरिधानकम् ।। २८८ ।।

अरुणेन दुकूलेनोत्तरीयं कल्पयामि ते ।
प्रवेशनं कल्पयामि, तत्रालेपनमण्डपम् ।। २८९ ।।

नमस्ते कल्पयाम्यत्र, मणिपीठोपवेशनम् ।
अष्टगन्धैः कल्पयामि, सर्वाङ्गेषु विलेपनम् ।। २९० ।।
कालागरुमहाधूपस्तव केशभरस्य हि ।
मल्लिका - मालती - जाती - चम्पकादिमनोरमैः ।। २९१ ।।

रचिताः कुसुमैर्मालाः, कल्पयामि नमस्तव ।
प्रवेशनं कल्पयामि, नमो भूषणमण्डपम् ।। २९२ ।।

स्नानमण्डपमायाहि, स्नानार्थं शक्रदिग्गतम् ।
आगच्छ निर्मलं याम्यमलङ्कारस्य मण्डपम् ।। २९३ ।।



पादुकायुग्ममारुह्य, पञ्चवाद्यपुरःसरम् ।
यागमण्डपमायाहि, परिवारगणैः सहः ।। २९४ ।।

उपवेशं रत्नपीठे, तत्र ते कल्पयाम्यहम् ।
ततः सीमन्तसिन्दूरं, ततस्तिलकमुत्तमम् ।। २९५ ।।

नवमाणिक्यमुकुटं, तच्चन्द्रशकलं ततः ।
कालाञ्जनं कल्पयामि, पालीयुगल मुत्तमम् ।। २९६ ।।

मणिकुण्डलयुग्मं ते, नासाभरणमीश्वरि ।
ते कल्पयामि त्रिपुरे, ललिताऽधरयावकम् ।। २९७ ।।

अथाऽऽभूषणं कण्ठे हेमचिन्ताकमुत्तमम् ।
पदकं ते कल्पयामि, महापदकमुत्तमम् ।। २९८ ।।
कल्पयामि नमो मुक्तावलिमेकावलिं च ते ।
छन्नवीरं च केयूर-युगलानां चतुष्टयम् ।। २९९ ।।

वलयावलिमीशानि ऊर्मिकावलिमीश्वरि ।
काञ्चीदामकटीसूत्रं, सौभाग्याभरणं च ते ।। ३०० ।।

त्रिपुरे पादकटकं, कल्पये रत्ननूपुरम् ।
पादांगुलीयक तुभ्यं, पाशमेकं करे तव ।। ३०१ ।।

अन्यस्मिन्नंकुशं देवि, पुंड्रेक्षुधनुषं परे ।
अपरे पुष्पबाणांश्च, श्रीमन्माणिक्यपादुके ।। ३०२ ।।

नवावरणदेवीभिर्महाचक्राधिरोहणम् ।
कामेश्वराङ्कपर्यङ्क, उपवेशनमुत्तमम् ।। ३०३ ।।

सुधासवाख्यं चषकं, तत आचमनीयकम् ।
कर्पूरवीटिकां तुभ्यं, कल्पयामि नमः शिवे ।। ३०४ ।।

आनन्दोल्लासवैलासहासं ते कल्पयाम्यहम् ।
मङ्गलारार्तिकं देवि, छत्रं ते कल्पयाम्यहम् ।। ३०५ ।।

ततश्चामरयुग्मं ते, दर्पणं कल्पयाम्यहम् ।
तालवृन्तं कल्पयामि, गन्धं पुष्पं महेश्वरि ।। ३०६ ।।

धूपं दीपं च नैवेद्यं, कल्पयामि नमस्तव ।
अथाहं बैन्दवे चक्रे, सर्वानन्दमयात्मके ।। ३०७ ।।

रत्नसिंहासने रम्ये, समासीनां शिवप्रियाम् ।
सृष्टिक्रमेण ध्यायामि महात्रिपुरसुन्दरि ।। ३०८ ।।

# अथ प्रथमावरणार्चनम्

अथ वक्ष्ये, महेशानि, प्रथमावरणार्चनम् ।
त्रैलोक्यमोहनं चक्रं, सृष्टिसृष्ट्यात्मकं खलु ॥ ३०९ ॥

अथ प्राथमिके देवि, चतुरस्रे तवेश्वरि ।
त्रैलोक्यमोहने चक्रे, बाह्यरेखां समाश्रिताः ॥ ३१० ॥

सामान्यपात्रसुधया, पूजयेत् सिद्धिदेवताः ।
चतुरस्रान्तरेखायां, पश्चिमादिषु वै क्रमात् ॥ ३११ ॥

द्वारेषु वायुकोणादिकोणेषु ह्यध ऊर्ध्वतः ।
दक्षिणावर्तयोगेन, यजेत् सर्वार्थसिद्धये ॥ ३१२ ॥

चतुरस्रान्तरेखातः, बहिरेवं यजेत् सुधीः ।
उत्तरे शरभो देवो, पूर्वद्वारे सुदर्शनः ।
अघोरो दक्षिणद्वारे, वनदुर्गा च पश्चिमे ॥ ३१३ ॥

गणपतिः क्षेत्रपालश्च, दक्षिणपूर्वयोस्तथा ।
पश्चिमे योगिनी चैव, बटुकस्त्वुत्तरे ननु ॥ ३१४ ॥

इन्द्राग्नियमाश्चैव, निऋर्तिर्वरुणस्तथा ।
वायुः सोमस्तथैशानः, ब्रह्मानन्तौ तथैव च ॥ ३१५ ॥

वज्रशक्तिस्तथा दण्डं, खड्गपाशाङ्कुशाः गदा ।
त्रिशूलं पद्मचक्रे च, पूज्या चायुधदेवता ॥ ३१६ ॥

आम्नायनायिका पूज्या, द्वारेषु च यथाविधि ।
द्वारे वै पश्चिमे पूज्या, नायिका घोरकुब्जिका ॥ ३१७ ॥

उत्तरे सिद्धलक्ष्मीश्च, पूर्वे चोन्मनी तथा ।
आद्याकाली दक्षिणे स्यात्, पूज्या द्वाराङ्गदेवताः ॥ ३१८ ॥

नैऋर्त्ये चैव संपूज्या, तिरस्करिणीति वै शुभा ।
चामुण्डा भद्रकालीति, कथिता द्वारदेवता ॥ ३१९ ॥

आग्नेये वनदुर्गा च महालक्ष्मीति-विश्रुता ।
कामरतिस्तथैशाने, महाकालीति वै शुभा ॥ ३२० ॥

वसन्तप्रीतिर्वायव्ये, महासरस्वती तथा ।
द्वारपार्श्वेषु पूज्या हि, निधिदेवता वै क्रमात् ॥ ३२१ ॥



पूर्वादौ दक्षपार्श्वे तु, वामपार्श्वे क्रमात्ततः ।
कच्छपश्च मुकुन्दश्च, नन्दो नीलनिधिस्तथा ॥ ३२२ ॥

शंखपद्म-महापद्म-मकराः निधयस्तथा ।
अणिमा गरिमासिद्धिः, लघिमा महिमा तथा ॥ ३२३ ॥

ईशित्वं च वशित्वं च, प्राकाम्यं मुक्तिरेव च ।
इच्छाप्राप्तिः सर्वकामा, मोक्षसिद्धिः क्रमात् प्रिये ॥ ३२४ ॥

सद्यः सन्तप्तहेमाभाः, पाशाङ्कुशधराः शुभाः ।
महाभरणरत्नानि, ससुवर्णानि वै निधीन् ॥ ३२५ ॥

(अभीष्टसिद्धिम्मे देहि शरणागत-पालिके ।
भक्त्यासमर्पये तुभ्यमिदमावरणार्चनम् ॥ ३२६ ॥)

प्रयच्छन्त्यः साधकेभ्यः, पद्मयुग्मधरास्तथा ।
त्रैलोक्यमोहने चक्रे, मध्यरेखां समाश्रिताः ॥ ३२७ ॥

तप्तजाम्बूनदाभासाः पञ्चाशत्पीठदेवताः ।
पाशाङ्कुशाभयवरकराः प्रकटरूपकाः ॥ ३२८ ॥

ताः पूजयित्वा च ततो, ब्राह्म्याद्याः सिद्धिवद्यजेत् ।
पूर्वद्वारादिद्वारेषु, शुचिकोणादिषु क्रमात् ॥ ३२९ ॥

ब्राह्मी माहेश्वरी चैव, कौमारी वैष्णवी तथा ।
वाराह्यैन्द्री च चामुण्डा, महालक्ष्मीः क्रमात् प्रिये ॥३३०॥

असिताङ्गो रुरुश्चण्डः, क्रोधश्चोन्मत्तसंज्ञकः ।
कपाली भीषणश्चैव, संहारश्चाष्टभैरवाः ॥ ३३१ ॥

कामरूपं च मलयं, कौल्लाख्यं च कुलान्तकम् ।
चोहारपीठं देवेशि, जालन्धरमतः परम् ॥ ३३२ ॥

उड्यानं देविकोट्टं च, पीठाष्टकमुदाहृतम् ।
मातरो भैरवाङ्कस्थाः, स्मेरवक्त्राः मदालसाः ॥ ३३३ ॥

ब्राह्मीप्रभृतयो दिव्या, योगिन्यः प्रकटाः शुभाः ।
पाशाङ्कुशधराः सर्वाः, क्रमेण दधतीः स्मरेत् ॥ ३३४ ॥

विघ्नं शूलं च शक्तिं च, चक्रं चैव गदां ततः ।
वज्रं वैदूर्यमालां च, पद्मं च वरदं तथा ॥ ३३५ ॥

भैरवास्त्वसिताङ्गाद्याः पीठाष्टकनिवासिनः ।
शूलं कपालं प्रेतं च, बिभ्राणाः क्षुद्रदुन्दुभिम् ॥ ३३६ ॥

गजत्वगम्बरा भीमाः, कुटिलालकशोभिनः ।
पाशाङ्कुशकरा भीतिकराः पीठाष्टकदेवताः ।। ३३७ ।।

तत्र जाम्बूनदप्रख्या, योगिन्यः प्रकटाः शुभाः ।
एवं तृतीयरेखायां, सिद्धिवत् पूजयेत् प्रिये ।। ३३८ ।।

मुद्रादेवीप्रयत्नेन, सर्वसंक्षोभणादिकाः ।
सर्वसंक्षोभिणी, चैव सर्वविद्राविणी तथा ।। ३३९ ।।

सर्वाकर्षणिका सर्ववशीकरणिका तथा ।
सर्वोन्मादिनिका चैव, ततः सर्वमहाङ्कुशा ।। ३४० ।।

सर्वखेचरिका सर्वबीजमुद्रा तथैव च ।
सर्वयोनिस्ततः सर्वत्रिखण्डा परिकीर्तिता ।। ३४१ ।।

त्रिपुरा चोन्मनी पूज्ये, चक्राम्नायनायिके ।
यथोपचारैराराध्य, चतुष्पीठाधिदेवताः ।। ३४२ ।।

चतुरस्रे तु पूर्वादि, श्रीपात्रामृतबिन्दुभिः ।
श्रीविद्यैकाक्षरी चैव, महालक्ष्मीस्तथैव च ।। ३४३ ।।

त्रिशक्तिसर्वसाम्राज्यलक्ष्मीति पञ्च कीर्तिताः ।
चक्राग्रे वै प्रपूज्येत, अणिमा सिद्धिरेव च ।। ३४४ ।।

पाशाङ्कुशकरारक्त-निजायुधकरद्वयाः ।
सर्वसंक्षोभणीरूपा, चार्वाकदर्शनं शुभम् ।। ३४५ ।।

यजेद् यथोपचारैश्च, सायुधाः देवताः सदा ।
तप्तचामीकाराभासा, योगिन्यः प्रकटाः शुभाः ।। ३४६ ।।

पाशाङ्कुशोत्पलाभीतिपाणयो रक्तविग्रहाः ।
पञ्चोपचारैराराध्य, मुद्रामाद्यां च दर्शयेत् ।। ३४७ ।।

एताः प्रकटयोगिन्यश्चतुरस्रे व्यवस्थिताः ।
त्रैलोक्यमोहिनीचक्रे, समुद्राः सायुधास्तथा ।। ३४८ ।।

सवाहनाश्च सपरिवाराश्चैव ससिद्धयः ।
साङ्गोपाङ्गाश्च सर्वोपचारैः संपूजितास्तथा ।। ३४९ ।।

तर्पिताः सन्त्विति वदेज्जलं तत्र विनिक्षिपेत् ।
हृदयं प्रणमेद् भक्त्या, त्रिपुरां मनसि स्थिताम् ।। ३५० ।।

अभीष्टसिद्धिं मे देहि, त्रिपुरे देवपूजिते ।
भक्त्या समर्पये तुभ्यं, प्रथमावरणार्चनम् ।। ३५१ ।।



इत्युच्चार्य महादेव्यै, दद्यात् पुष्पाञ्जलिं ततः ।
इति ते कथितं भद्रे, प्रथमावरणार्चनम् ।। ३५२ ।।

## अथ द्वितीयावरणार्चनम्

अथ वक्ष्ये महेशानि, द्वितीयावरणार्चनम् ।
त्रैवर्गसा[illegible]के चक्रे, ब्रह्माण्डसृष्ट्यात्मकं ननु ।। ३५३ ।।

कालरात्रिश्च खातीता, गायत्रीं तदनन्तरम् ।
घण्टाधारिणिका चैव, ततोऽङ्कारार्णात्मिका तथा ।। ३५४ ।।

चामुण्डा चैव छाया च, जया भङ्कारिणी तथा ।
आर्णात्मिका टङ्कहस्ता, ततष्ठङ्कारिणी तथा ।। ३५५ ।।

डामरी चैव ढङ्कारिणी णङ्कारी तामसी ततः ।
स्थानदेवी च दाक्षायण्यथ धात्री च नन्दिका ।। ३५६ ।।

पार्वती चैव फट्कारी, बन्धिनी भद्रकालिका ।
महामाया च शशिनी, षण्डा चैव सरस्वती ।। ३५७ ।।

ततो हंसवती पूज्या, सौभाग्यहेतवे सदा ।
यथाक्रमं विधानेन, पूजनीयाः प्रयत्नतः ।। ३५८ ।।

अमृताकर्षिणीन्द्राणी, ईशान्युमोर्ध्वकेशिनी ।
ऋद्धिदा च तथा ऋषा, लृकारा लृषिका तथा ।। ३५९ ।।

एकपादा तथैश्वर्या, ओङ्कारा चौषधात्मिका ।
अम्बिका चाक्षरात्मा च, विश्रुताः शक्तयः क्रमात् ।। ३६० ।।

कामेश्वरी महानित्या, ततो वै भगमालिनी ।
नित्यक्लिन्ना महानित्या, भेरुण्डा वह्निवासिनी ।। ३६१ ।।

महावज्रेश्वरी नित्या, शिवदूती तथैव च ।
त्वरिता च महादेवी, ततो वै कुलसुन्दरी ।। ३६२ ।।

विमला नीलपताका च, विजया सर्वमङ्गला ।
ज्वालामालिन्यथ ततश्चित्रा त्रिपुरसुन्दरी ।। ३६३ ।।

महानित्या ललिता च चक्रेशी त्रिपुरेशिनी ।
आम्नायनायिका चैव, पूज्या महोन्मनी शुभा ।। ३६४ ।।

पञ्चकामदुघा चैव, पूजनीया यथाविधि ।
श्रीविद्यामतपीठेशी, सुधासूरमृतेश्वरी ।। ३६५ ।।

अन्नपूर्णेति विख्याता, पञ्चकामदुधा क्रमात् ।
पूजयित्वा कामदुधाः, पञ्च सर्वसमृद्धये ।। ३६६ ।।
त्रैवर्गसाधनं चक्रं, पशुबुद्धिविनाशनम् ।
त्रैवर्गसाधने चक्रे, समुद्राः सायुधास्तथा ।। ३६७ ।।
सवाहनाः सपरिवारास्तथैव च ससिद्धयः ।
साङ्गोपाङ्गैश्चोपचारैः, सर्वाः संपूजितास्तथा ।। ३६८ ।।
तर्पिताः सन्त्विति वदेज्जलं तत्र विनिक्षिपेत् ।
भुवनेशी प्रधाना च, गरिमासिद्धिरेव च ।। ३६९ ।।
महायोनीति मुद्रां च, मातृकायोगिनीं तथा ।
स्मार्तं च दर्शनं पुण्यं, कण्ठे च प्रणमेत् सदा ।। ३७० ।।
अभीष्टसिद्धिं मे देहि, त्रिपुरे देवपूजिते ।
भक्त्या समर्पये तुभ्यं, द्वितीयावरणार्चनम् ।
इत्युच्चार्य महादेव्यै, दद्यात् पुष्पाञ्जलिं ततः ।। ३७१ ।।

## तृतीयावरणार्चनम्

अथ वक्ष्ये महेशानि, तृतीयावरणार्चनम् ।
सर्वाशापूरकं चक्रं, सृष्टिस्थित्यात्मकं खलु ।। ३७२ ।।
सामान्यपात्रसुधया, पश्चिमादिक्रमेण तु ।
ततः षोडशपत्रेषु, कामाकर्षणिकां यजेत् ।। ३७३ ।।
कामाकर्षणिका चैव, बुद्ध्याकर्षणिका तथा ।
अहंकाराकर्षणी च, शब्दाकर्षणिका तथा ।। ३७४ ।।
स्पर्शाकर्षणिका चैव, रूपाकर्षणिका तथा ।
रसाकर्षणिका चैव, गन्धाकर्षणिका तथा ।। ३७५ ।।
चित्ताकर्षणिका चैव, धैर्याकर्षणिका तथा ।
स्मृत्याकर्षणीका चैव, नामाकर्षणिका तथा ।। ३७६ ।।
बीजाकर्षणिका चैवामृताकर्षणिका तथा ।
आत्माकर्षणिका चैव, शरीराकर्षणी तथा ।। ३७७ ।।❀

❀ कामाकर्षणिकाद्याश्च योगिन्यो गुप्तसंज्ञकाः ।
कलाः षोडशरूपाश्च चन्द्रमण्डलमध्यगाः ।।
ततः पूज्याः प्रयत्नेन नित्या निर्मलबुद्धिदाः ।
सत्या च सर्वभूतस्था, रत्नगर्भान्तिरस्थिता ।।
रम्या शुद्धा च कान्ता च, कान्तिमद्भासिताङ्गका ।
सर्वसौख्यप्रदा देवी, भक्तौघाऽभयदायिनी ।
श्वेतद्वीप—कृतावासा, जगन्माता जगन्मयी ।
रत्नगर्भस्थिता सौम्या, पञ्चकोशार्चनम्भवेत् ।।



त्रिपुरेशी च चक्रेशी, अन्नपूर्णेश्वरी तथा ।
षोडशारे तु पूर्वादि—श्रीपात्रामृतबिन्दुभिः ।। ३७८ ।।
पूज्या च पंचकोशाम्बा, यथाशास्त्रं विधानतः ।
श्रीविद्या च परं ज्योतिः, परनिष्कलशाम्भवी ।। ३७९ ।।
अजपामातृका चेति, पञ्चकोशाः प्रकीर्तिताः ।
स्वरवर्णा रक्तवर्णाः, स्रवत्पीयूषविग्रहाः ।। ३८० ।।
पाशाङ्कुश (धरा)सुधापूर्ण-काश्मीरीघटदानदाः ।
लघिमा पूजयेन्नित्यं, कामाकर्षणिकाग्रतः ।। ३८१ ।।
सर्वविद्राविणीं मुद्रां, तथा च बौद्धदर्शनम् ।
सर्वाशापूरकं चक्रं, तथा च गुप्तयोगिनीम् ।। ३८२ ।।
मुखं च प्रणमेदत्र, ध्यात्वा वै भक्तिभावतः ।
पुष्पादिभिर्यजेद् विद्वान्, समुद्राः सायुधास्तथा ।। ३८३ ।।
सवाहनपरीवारास्तथा चैव ससिद्धयः ।
साङ्गोपाङ्गाश्च सर्वोपचारैः संपूजितास्तथा ।। ३८४ ।।
तर्पिताः सन्त्विति वदेज्जलं तत्र विनिक्षिपेत् ।
अभीष्टसिद्धिं मे देहि त्रिपुरे देवपूजिते ।
भक्त्या समर्पये तुभ्यं, तृतीयावरणार्चनम् ।। ३८५ ।।

## ४ सर्वसंक्षोभणंचक्रम्

अथ वक्ष्ये महेशानि चतुर्थावरणार्चनम् ।
सर्व-संक्षोभणं चक्रं, प्रोक्तं सृष्टिलयात्मकम् ।। ३८६ ।।
इत्युच्चार्य च देवेश्यै, दद्यात् पुष्पाञ्जलिं ततः ।
सर्व-संक्षोभणे चक्रे, दलाष्टकविजृम्भिते ।। ३८७ ।।
यजेत् सामान्यसुधया, अनङ्गकुसुमादिकाः ।
पूर्वादिदिक्षु पत्रेषु, आग्नेयादि—विदिक्षु च ।। ३८८ ।।

अनङ्गकुसुमानङ्गमेखला तदनन्तरम् ।
अनङ्गमदना पश्चादनङ्गमदनातुरा ॥ ३८९ ॥

अनङ्गरेखानङ्ग-वेगिन्यथानङ्गाङ्कुशा ततः ।
अनङ्गमालिनी ह्येता, बन्धूककुसुमप्रभाः ॥ ३९० ॥

पाशाङ्कुशस्फुरत्कुन्दमीलोत्पलकराः शुभाः ।
अनङ्गकुसुमाग्रे तु, यजेत् त्रिपुरसुन्दरीम् ॥ ३९१ ॥

भुवना भुवनेशी च, पद्मसिंहासना तथा ।
पूज्या यथाक्रमं भक्त्या, पुष्पदीपादिभिः सदा ॥ ३९२ ॥

बाला सम्पत्प्रदा चैव, चैतन्या तदनन्तरम् ।
द्वितीया चैतन्यरूपा, कामेशी भैरवी तथा ॥ ३९३ ॥

सिंहासनं तथाग्नेयं, यजेच्च तदनन्तरम् ।
रुद्रप्रेतासनं चैवं, तथान्येषां दिशि क्रमात् ॥ ३९४ ॥

अघोरभैरवी चैव, भैरवी च महाधिका ।
ललिता भैरवी चैव, कामेशी भैरवी तथा ॥ ३९५ ॥

भैरवी रक्तनेत्रा च, विष्णुप्रेतासनस्थिता ।
दक्षिणे संस्थिताश्चैव, यजेत् सौभाग्यहेतवे ॥ ३९६ ॥

षट्कूटा भैरवी नित्या, भैरवी तदनन्तरम् ।
मृत-संजीवनी चैव, मृत्युञ्जयपरा तथा ॥ ३९७ ॥

वज्रप्रस्तारिणी चैव, कुब्जिका रौद्रमेव च ।
यजेद्रुद्रासने देवि, पश्चिमायां दिशि क्रमात् ॥ ३९८ ॥

सिंहासने तूत्तरे तु, पूजयेद् भुवनेश्वरीम् ।
भैरवीं कमलेशीं च, सिद्धकौलेशभैरवीम् ॥ ३९९ ॥

डामराख्यां भैरवीं च, कामिनीभैरवीं तथा ।
ब्रह्मासने च वायव्ये, यजेद् धीमान् यथाविधि ॥ ४०० ॥

ईशानाधिपतेः विष्णोरासनं च ततो यजेत् ।
कालिकामीश्वराख्यां च, यजेत् सिंहासनं बुधः ॥ ४०१ ॥

बिन्दुमध्ये महेशानि, ऊर्ध्वं सिंहासनस्थिताः ।
बाला कुलसुन्दरी च, संपत्प्रदा च भैरवी ॥ ४०२ ॥

प्रथमा सुन्दरी चैव, द्वितीया सुन्दरी तथा ।
तृतीया सुन्दरी चैव, चतुर्थी सुन्दरी तथा ॥ ४०३ ॥



पञ्चमी सुन्दरी चैव, महात्रिपुरसुन्दरी ।
सदाशिवाख्यं देवेशि, मध्ये सिंहासनं यजेत् ॥ ४०४ ॥

महिमासिद्धिमत्रैव, मुद्रां च सर्वाकर्षणीम् ।
तथैवानन्तरञ्चैव, गं-गाणपत्यदर्शनम् ॥ ४०५ ॥

एता गुप्ततराश्चैव, योगिन्यः सर्वसम्मताः ।
वराभयकरारक्ताः, पाशाङ्कुशकराः शुभाः ॥ ४०६ ॥

सर्वसंक्षोभणे चक्रे, समुद्राः सायुधास्तथा ।
सवाहन-परीवारास्तथैव च ससिद्धयः ॥ ४०७ ॥

साङ्गोपाङ्गाश्च सर्वोपचारैः संपूजितास्तथा ।
तर्पिताः सन्त्विति-वदेज्जलं तत्र विनिक्षिपेत् ॥ ४०८ ॥

नमेद् भक्त्या भ्रुवोर्मध्ये, साधकस्तदनन्तरम् ।
अभीष्टसिद्धिं मे देहि, त्रिपुरे देवपूजिते ।
भक्त्या समर्पये तुभ्यं, चतुर्थावरणार्चनम् ॥ ४०९ ॥

## पूर्वाम्नायसमष्टिक्रमः

चतुरस्रे धरा पूज्या, त्रिवृत्ते जलपूजनम् ।
सोमं षोडशपत्रे च, व्योम चाष्टदले यजेत् ॥ ४१० ॥

चतुरस्रे तु सम्पूज्या, उन्मनाऽऽम्नायिकेश्वरी ।
महोन्मनी त्रिवृत्ते च, यजनीया प्रयत्नतः ॥ ४११ ॥

अन्नपूर्णा महेशानी, पूज्या षोडशपत्रके ।
अष्टपत्रे तु भुवना, पूज्या सृष्टिसमष्टिके ॥ ४१२ ॥

लीयन्ते भुवनायां वै, गुर्वन्ताश्च शिवादिकाः ।
सृष्टिकामेश्वरीमध्ये, लीयते भुवनेश्वरी ॥ ४१३ ॥

अनाख्यायां सिद्धलक्ष्मीः, कामेश्वर्यां विलीयते ।
भासायां लयमायाति, देवी बालाख्यसुन्दरी ॥ ४१४ ॥

स्थितौ पूर्ववदभ्यर्च्याः, धरा वारि नभः शशी ।
स्थिति-भुवनेश्वरीमध्ये, देवतानां लयो भवेत् ॥ ४१५ ॥

स्थिति-कामेश्वरीमध्ये, लीयते भुवना तु सा ।
संहारसृष्टौ सम्पूज्या, धरा वारि शशी नभः ॥ ४१६ ॥

लय-भुवनेश्वरीमध्ये, देवतानां लयो भवेत् ।
लय-कामेश्वरीमध्ये, भुवना सा लयं व्रजेत् ॥ ४१७ ॥

## अथ पञ्चमावरणम्

अथ वक्ष्ये महेशानि, पञ्चमावरणार्चनम् ।
स्थितिसृष्टयात्मकं चक्रं, सर्वसौभाग्यदायकम् ॥ ४१८ ॥

चतुर्दशारके चक्रे, सर्वसौभाग्यदाभिधे ।
सामान्याद्भिः पश्चिमादिवामावर्तक्रमेण च ॥ ४१९ ॥

सर्वसंक्षोभिणीमुख्याः, शक्तीर्वै पूजयेत् प्रिये ।
सर्वसंक्षोभिणी शक्तिः, सर्वविद्राविणी तथा ॥ ४२० ॥

सर्वाकर्षिण्यथ ततः, सर्वाह्लादिन्यनन्तरम् ।
सर्वसंमोहिनी सर्वस्तम्भिनी सर्वजृम्भणी ॥ ४२१ ॥

सर्ववशङ्करी शक्तिः, तथा सर्वार्थरञ्जिनी ।
ततः सर्वोन्मादिनी च, तथा सर्वार्थसाधनी ॥ ४२२ ॥

ततो वै सर्वसंपत्ति-पूरणी शक्तिरेव च ।
सर्वमन्त्रमयी शक्तिः, सर्वद्वन्द्वक्षयङ्करी ॥ ४२३ ॥×

चक्रेश्वरी ततः पूज्या, देवी त्रिपुरवासिनी ।
आद्याकालीति-विख्याता, तथा चाम्नायनायिका ॥ ४२४ ॥

ततश्चेशित्वसिद्धिश्च, पूज्या ह्यत्र प्रयत्नतः ।
चक्राग्रे च पञ्चकल्पं लताम्बां पूजयेत्ततः ॥ ४२५ ॥

चतुर्दशारे पूर्वादिश्रीपात्रामृतबिन्दुभिः ।
श्रीविद्या त्वरिता चैव, पारिजातेश्वरी तथा ॥ ४२६ ॥

त्रिकूटा पञ्चबाणेशी-पञ्चकल्पलताः स्मृताः ।
पाशाङ्कुशकरा रक्ताः, निजायुधकरद्वयाः ॥ ४२७ ॥

× चतुर्दशारे चक्रे तु, पार्श्वयोरुभयोस्तथा ।
अग्रे च बिन्दुमध्ये च, सामान्यामृतबिन्दुभिः ॥
वेदसंख्या अवस्थाश्च, यजेत् सर्वार्थसिद्धये ।
जाग्रत्स्वप्नसुषुप्त्यश्च, तुरीया च प्रकीर्तिताः ।
वराभयकरारक्ता धृतपाशाङ्कुशाः शुभाः ।
अथाष्टदलमूले च, वृत्ते वेष्टनया शिवे ॥



सर्ववशङ्करी मुद्रा सांख्यादिदर्शनं शुभम् ।
सर्वसौभाग्यदे चक्रे, सर्वसंक्षोभिणीमुखाः ॥ ४२८ ॥

संप्रदायाख्य—योगिन्यः सर्वाभरणभूषिताः ।
इन्द्रगोपनिभाः सर्वाः, सगर्वोन्मत्तयौवनाः ॥ ४२९ ॥

पाशाङ्कुशौ दर्पणं च, पानपात्रं सुधामयम् ।
बिभ्रत्यः सर्वसुभगाः, साधकाभीष्टदायिकाः ॥ ४३० ॥

सवाहनपरीवाराः, समुद्राः सायुधाश्च ताः ।
साङ्गोपाङ्गाश्च सर्वोपचारैः संपूजितास्तथा ॥ ४३१ ॥

तर्पिताः सन्त्विति वदेज्जलं तत्र विनिक्षिपेत् ।
ललाटे प्रणमेदत्र साधको भक्तिभावतः ॥ ४३२ ॥

अभीष्टसिद्धिं मे देहि, त्रिपुरे देवपूजिते ।
भक्त्या समर्पये तुभ्यं, पञ्चमावरणार्चनम् ॥ ४३३ ॥

## अथ षष्ठावरणार्चनम्

अथ वक्ष्ये महेशानि, षष्ठावरणार्चनम् ।
सर्वार्थसाधकं चक्रं, बहिर्दशारकस्थितम् ॥ ४३४ ॥

देव्यै पुष्पाञ्जलिं दद्यात्, ततः सर्वार्थसाधके ।
बहिर्दशारके चक्रे, सामान्यसुधया शिवे ॥ ४३५ ॥

पूर्ववत् पूजयेद् देवी, सर्वसिद्धिप्रदामुखाः ।
सर्वप्रियङ्करी देवी, सर्वमङ्गलकारिणी ॥ ४३६ ॥

सर्वकामप्रदा देवी सर्वदुःखविमोचनी ।
सर्वमृत्युप्रशमनी, सर्वविघ्नविनाशिनी ॥ ४३७ ॥

सर्वसुन्दरी देवी, सर्वसौभाग्यदायिनी ।
सर्वार्थसाधके चक्रे, कुलकौलाभिधाः पराः ॥ ४३८ ॥

सर्वसिद्धिप्रदाद्याश्च, योगिन्यः सर्वकामदाः ।
जपाकुसुमसंकाशाः, स्फुरन्मणिविभूषिताः ॥ ४३९ ॥

महासौभाग्यगम्भीराः पीनवृत्तघनस्तनाः ।
रत्नपेटी-विनिक्षिप्तसाधकेप्सितभूषणाः ॥ ४४० ॥

नानारत्नमयान् दीपान्, दधत्यो हसिताननाः ।
पाशाङ्कुशधराः सर्वा, रत्नदानपरास्तथा ॥ ४४१ ॥
सर्वसिद्धिप्रदां देवीं, चक्रेशीं च तथा यजेत् ।
श्यामाकालीं दक्षिणां हि, पूजयेदाम्नायनायिकाम् ॥ ४४२ ॥

बहिर्दशारे पूर्वादि—श्रीपात्रामृतबिन्दुभिः ।
चक्राग्रे पञ्चरत्नाभेऽर्चयेच्च यथाविधि ॥ ४४३ ॥

श्रीविघ्नसिद्धिलक्ष्मीश्च, मातङ्गी भुवनेश्वरी ।
वाराहीति महेशानि, पञ्चरत्नं प्रकीर्तितम् ॥ ४४४ ॥ A

श्रीविघ्नपूजनस्थाने, चक्रराजे महेश्वरी ।
महारत्नेश्वरी-वृन्दमण्डितासनसंस्थिता ॥ ४४५ ॥

सर्वसौभाग्यजननी-पादुकां पूजयामि च ।
पाशाङ्कुशकरा रक्ता निजायुधकरद्वया ॥ ४४६ ॥

पञ्चरत्नं प्रपूज्याथ मुद्रादिकं यजेन्नरः ।
सर्वार्थसाधके चक्रे ससमुद्राः सायुधास्तथा ॥ ४४७ ॥

सवाहनाश्च सपरिवाराश्चैव ससिद्धयः ।
साङ्गोपाङ्गाश्च सर्वोपचारैः संपूजितास्तथा ॥ ४४८ ॥

वैदिकं दर्शनं चास्य, कुलोत्तीर्णं च योगिनीम् ।
देव्यै पुष्पाञ्जलिं दद्यात् ततः षष्ठावृतं यजेत् ॥ ४४९ ॥

तर्पिताः सन्त्विति वदेज्जलं तत्र विनिःक्षिपेत् ।
पूजिताः सम्प्रयच्छन्ति, ह्यनायासेन तत्फलम् ॥ ४५० ॥

बहिर्दशारे षड्वाचः, कामवत् पूजयेत् प्रिये ।
सामान्यपात्रसुधया, लीना वागपरा परा ॥ ४५१ ॥

मध्यमा वाक् च पश्यन्ती वैखरीति-प्रकीर्तिताः ।
ज्ञानमुद्राभयाः शुक्ला वीणापुस्तकपाणयः ॥ ४५२ ॥

ततः सर्वोन्मादिनीं च, मुद्रां संदर्शयेद् बुधः ।
एताश्च कुलकौलाख्य-योगिन्य-इति पूर्ववत् ॥ ४५३ ॥

---

A वैकुण्ठ-नगरस्था च, क्षीरसागरकन्यका ।
योगिहृत्पद्मसंस्था च, कल्पवल्ली दयावती ॥
भक्तचिन्तामणिश्चैव, ह्यादिमायेन्दिरा रमा ।
निराकारा च साकारा, पञ्चरत्नं प्रपूजयेत् ॥



इत्युच्चार्य यजेदत्र, योनिमुद्रां प्रदर्शयेत् ।
अभीष्टसिद्धिं मे देवि त्रिपुरे देवपूजिते । B
भक्त्या समर्पये तुभ्यं षष्ठावरणार्चनम् ॥ ४५४ ॥

## सप्तमावरणार्चनम्

अथ वक्ष्ये महेशानि, सप्तमावरणार्चनम् ।
स्थितिलयात्मकं चक्रं, सर्वरक्षाकरं शुभम् ॥ ४५५ ॥

सर्वरक्षाकरे चक्रेऽन्तर्दशारे महेश्वरि ।
सामान्यपात्रसुधया, पश्चिमादिक्रमेण तु ॥ ४५६ ॥

सर्वज्ञा सर्वशक्तिश्च, सर्वैश्वर्यप्रदा तथा ।
सर्वज्ञानमयी चैव, सर्वव्याधिविनाशनी ॥ ४५७ ॥

सर्वाधारस्वरूपा च, सर्वपापहरा तथा ।
सर्वानन्दमयी देवी, सर्वरक्षास्वरूपिणी ॥ ४५८ ॥

पूजनीया प्रयत्नेन, सर्वेप्सितफलप्रदाः ।
सर्वाज्ञाद्याश्च योगिन्यो, ज्वलत्पावकतेजसः ॥ ४५९ ॥

उद्यत्सूर्य-सहस्राभा, मुक्तालङ्कारभूषिताः ।
पाशटङ्कायुधज्ञानमुद्रा-वरदसत्कराः ॥ ४६० ॥

सर्वज्ञा पुरतो देवि, यजेत् त्रिपुरमालिनीम् ।
सिद्धिदां सिद्धिकालीं च, तथाम्नायनायिकाम् ॥ ४६१ ॥

वैदिकं शैवसौरे च, गाणपत्यं तथैव च ।
वैष्णवं शाक्तमित्येव, यजेच्च षड्दर्शनम् ॥ ४६२ ॥

रक्षायै रक्षयेदत्र, ततश्च सूर्यदर्शनम् ।
निगर्भ-योगिनीः ध्यायेन्नादे नत्वा यथाविधि ॥ ४६३ ॥

---

B अथवा रश्मयः सर्वाः देवीरूपेण चिन्तयेत् ।
श्रीचक्रपरमेशानि, स्वतंत्रे स्वस्वसंनिभाः ॥
चक्रेशीं रतिपूर्वे तु, महात्रिपुरभैरवीम् ।
पूजयित्वा ततः सर्वयोनिमुद्रां प्रदर्शयेत् ॥
परापररहस्याख्या योगिनीत्यादिना प्रिये ।
देव्यै पुष्पाञ्जलिं दत्वा, तर्पयेच्च त्रिधा त्रिधा ॥

प्राकाम्यसिद्धिमुद्रां च, सर्वमहाङ्कुशां तथा ।
वराभयकरारक्ताः स्वसायुधकरद्वयाः ॥ ४६४ ॥

पञ्चोपचारैराराध्य, लिङ्गमुद्रां प्रदर्शयेत् ।
अन्तर्दशारे देवेशि, पार्श्वयोरग्रयोस्तथा ॥ ४६५ ॥

बाणवद् यजनं कुर्यात्पञ्चकामान् प्रपूजयेत् ।
काम-मन्मथ-कन्दर्प-मकरध्वजसंज्ञकाः ॥ ४६६ ॥

मीनकेतुर्महेशानि, पञ्चकामाः प्रकीर्तिताः ।
न कदापि भवेद्रोगो, दारिद्र्यं नोपजायते ॥ ४६७ ॥

ग्रहपीडां विजित्याशु, पुत्रपौत्रैः समेधते ।
सर्वरक्षाकरे चक्रे, समुद्राः सायुधास्तथा ॥ ४६८ ॥

सवाहनाश्च सपरिवाराश्चैव ससिद्धयः ।
साङ्गोपाङ्गाश्च सर्वोपचारैः संपूजितास्तथा ॥ ४६९ ॥

तर्पिताः सन्त्विति वदेज्जलं तत्र विनिक्षिपेत् ।
अभीष्टसिद्धिं मे देहि, त्रिपुरे देवपूजिते ।
भक्त्या समर्पये तुभ्यं, सप्तमावरणार्चनम् ॥ ४७० ॥

## दक्षिणाम्नायसमष्टिः

मायापूर्वां विश्वयोनिः, मनुकोणे प्रपूज्यते ।
वायुर्बहिर्दशारेऽर्च्यो, ह्यग्निरन्तर्दशारके ॥ ४७१ ॥

स्थितौ सृष्टौ देवतानां, पूजनक्रम ईरितः ।
स्थितिस्थितौ पूजनीयौ, वह्निरन्तर्दशारके ॥ ४७२ ॥

मायापूर्वां विश्वयोनिं मन्त्री चैवं प्रपूजयेत् ।
बहिर्दशारे वायुञ्च, पूजयेच्च समष्टिषु ॥ ४७३ ॥

स्थिति-कामेश्वरी-मध्ये दक्षिणायाः लयो भवेत् ।
कालिका दक्षिणा याति, लयं कामेश्वरीतनौ ॥ ४७४ ॥

दक्षिणाम्नायमार्गेण, समष्टिक्रम ईरितः ।
अनाख्यायां गुह्यकाली, भरतोपासिता तु या ॥ ४७५ ॥

सा देवी लयमायाति, स्थितिकामेश्वरीतनौ ।
स्थितिसंहारमध्ये तु चक्रे मन्वस्रके यजेत् ॥ ४७६ ॥
मायापूर्वां विश्वयोनिं बहिर्दिक्कोणकेऽनिलम् ।
अन्तर्दशारे वह्निं च, पूजयेत् साधकोत्तमः ॥ ४७७ ॥



या बालासुन्दरी देवी, भासायां सुप्रतिष्ठिता ।
सा देवी लयमायाति, लयकामेश्वरीतनौ ॥ ४७८ ॥

## अष्टमावरणार्चनम्

## ( सर्वरोगहरं चक्रम् )

अथ वक्ष्ये महेशानि अष्टमावरणार्चनम् ।
सर्वरोगहरं चक्रं लयसृष्टिस्वरूपिणम् ॥ ४७९ ॥

सर्वहराष्टारे चक्रे, यजेत् सामान्यबिन्दुभिः ।
पश्चिमादिक्रमेणैव, वशिन्याद्यां यजेत् क्रमात् ॥ ४८० ॥

वशिनी कामेश्वरी च, मोदिनी विमलारुणा ।
जयिनी सर्वेश्वरी च, कौलिनी वागधीश्वरी ॥ ४८१ ॥

सर्वरोगहरे चक्रे, रहस्याख्याः शुभप्रदाः ।
योगिन्यः कामदायिन्यो, दाडिमीकुसुमप्रभाः ॥ ४८२ ॥

रक्तवस्त्रपरीधामा, रक्तगन्धानुलेपनाः ।
नानाभरणसंम्पन्नाः, पञ्चबाणधनुर्धराः ॥ ४८३ ॥

पुस्तकं वरदानं च, दधाना वाक्प्रदा इमाः ।
यजेत् त्रिपुरसिद्धां च, चक्रेशीं वशिनीं पुरः ॥ ४८४ ॥

समय-कुब्जिकां चाथ, सर्वाम्नायनायिकाम् ।
वसुकोणे च पूर्वादि-श्रीपात्रामृतबिन्दुभिः ॥ ४८५ ॥

पूर्वाम्नायोन्मनी चैव, दक्षिणां भोगिनीं तथा ।
पश्चिमां, कुब्जिकां चैवोत्तराम्नायस्य कालिकाम् ॥ ४८६ ॥

ऊर्ध्वाम्नायेश्वरीं देवीं, श्रीविद्यामर्चयेद्बुधः ।
अनुत्तरवादिनीति—महात्रिपुरसुन्दरीम् ॥ ४८७ ॥

वराभयकरारक्ताः, पाशाङ्कुशधराः शुभाः ।
मुक्तिसिद्धिं ततो कालीं, पूजयेद् दक्षिणां तथा ॥ ४८८ ॥

मुद्रां प्रदर्शयेत्सर्वखेचरीं भाग्यहेतवे ।
वैष्णवं दर्शनं चाथ, सरहस्याख्ययोगिनी ॥ ४८९ ॥

अभीष्टसिद्धिं प्राप्नोति, देव्यै पुष्पाञ्जलिं क्षिपेत् ।
नावान्ते प्रणमेन्नित्यं, सदा कार्यार्थसिद्धये ॥ ४९० ॥

पञ्चोपचारैः संपूज्य, योनिमुद्रां च दर्शयेत् ।
भक्त्या समर्पये तुभ्यमष्टमावरणार्चनम् ।। ४९१ ।।+

## गुरुस्मरणम्

अथ वक्ष्ये गुरोश्चैव, परिवारप्रपूजनम् ।
कृतेन येन मन्त्रज्ञो, लभते वांछिताधिकम् ।। ४९२ ।।
मूलेन षोडशीमध्ये, यजेत् त्रिपुरसुन्दरीम् ।
बिन्दुत्रिकोणयोर्मध्ये, त्रिभङ्गीभिर्गुरुन् यजेत् ।। ४९३ ।।
दिव्यौघाश्चापि सिद्धौघा, मानवौघास्त्रिधा हि ते ।
परप्रकाशः प्रथमस्ततः परशिवाभिधः ।। ४९४ ।।
परशक्तिश्च कौलेशः, शुक्लादेवी कुलेश्वरः ।
कामेश्वरीति सप्तैव, दिव्यौघा गुरवः पराः ।। ४९५ ।।
भोगक्रीडश्च समयः, सहजश्च परावरः ।
सिद्धौघा गुरवश्चैते चत्वारःपरिकीर्तिताः ।। ४९६ ।।
गगनौ विश्वविमलौ मदनो भुवनस्तथा ।
लीला(सीता) स्वात्मप्रियेत्यष्टौ, मानवा अपरे मताः ।।४९७।।
आनन्दनाथशब्दान्ताः, पुरुषा गुरवः स्मृताः ।
अम्बान्तास्तु स्त्रियः कार्य्याः, सर्वसिद्धिप्रदायिकाः ।।४९८।।

---

+ आम्नायां तु प्रपूज्याथ, पञ्चबाणं यजेन्नरः ।
देवीमध्यविधानीहावरणानि शृणु प्रिये ।।
तुरीयोपासकानां च, एतान्यावश्यकानि वै ।
अष्टारपार्श्वयोरग्रे सामान्यामृतबिन्दुभिः ।।
उदीच्यां प्रयजेद् देवि क्षोभणद्रावणौ ततः ।
आकर्षवश्यबाणौ च दक्षिणे च समर्चयेत् ।।
अग्रे संमोहनं यष्ट्वा चिन्तयेद् बाणदेवताः ।
वराभयकरारक्ताः सृष्टिबाणधनुर्धराः ।।
मध्ये दिक्षु क्रमेणैव यजेत् सर्वार्थसिद्धये ।
सर्वज्ञा नित्यतृप्ता तथाऽनादिप्रबोधिनी ।।
स्वतन्त्रा च महाशक्तिर्नित्याऽलुप्ता तथैव च ।
नित्याऽनन्ता च कथिता देव्याः शुभे षडङ्गके ।।



परशक्तिस्तथा शुक्ला देवी कामेश्वरीति च ।
तिस्रः स्त्रियस्तु दिव्येषु प्रियलीलेति मानवी ।। ४९९ ।।
श्रीपादुकां पूजयामीत्यन्ते सर्वत्र योजयेत् ।
श्रीगुरुं परमगुरुं परात्परगुरुंस्तथा ।। ५०० ।।
परमेष्ठिगुरूंश्चैव दक्षिणामूर्तिरूपिणम् ।
आचार्यश्रीगुरुं वन्दे, परमाचार्यरूपिणम् ।। ५०१ ।।
पूर्वसिद्धगुरुं वन्दे आदिसिद्धगुरुंस्तथा ।
श्रीनाथादिगुरुं वन्दे सिद्धनाथादिरुपिणम् ।। ५०२ ।।
त्रिपुरादिनाथं वन्दे, पूजायाम्यात्मपादुकाम् ।
त्रिकोणशीर्षे द्वे द्वे च, पूजयेदङ्गदेवताः ।। ५०३ ।।
शुक्लपक्षे यजेन्नित्या कामेश्वर्यादि—षोडश ।
कृष्णपक्षे विचित्राद्याः कामेश्वर्यादिनामिकाः ।। ५०४ ।।
षोडशीं च यजेन्मध्ये वक्ष्ये तद्यजनक्रमम् ।
एकैकं हि समुच्चार्य नित्यामन्त्रं समुच्चरेत् ।। ५०५ ।।
कामेश्वर्यादि नमोन्ते च, नित्यां श्रीपादुकां पठेत् ।
पूजयामि तर्पयामि, हृदयं प्रोच्य पूजयेत् ।। ५०६ ।।
बिन्दुं परित आकल्प्य कल्प्यते बिन्दुतोऽन्तिमः ।
दक्षहस्तेन पुष्पादि वामेनाम्भो विनिःक्षिपेत् ।। ५०७ ।।
वामावर्तेन सम्पूज्याःकोणपार्श्वेषु पञ्चशः ।
गुरुक्रमं प्रपूज्याथ, यजेदाम्नायदेवताः ।। ५०८ ।।
आम्नायान्ते प्रपूज्याथ पंचबाणं यजेन्नरः ।
देवीं मध्यविधयान्यावरणानि शृणु प्रिये ।। ५०९ ।।
तुरीयोपासकानां च एतान्यावश्यकानि वै ।
अष्टारपार्श्वयोरग्रे सामान्यामृतबिन्दुभिः ।। ५१० ।।
उदीच्यां प्रयजेद् देवि, क्षोभणद्रावणौ यतः ।
आकर्षवश्यबाणौ च, दक्षिणे तु समर्चयेत् ।। ५११ ।।
अग्रे संमोहनं यष्ट्वा, चिन्तयेद् बाणदेवताः ।
वराभयकरा रक्ताः सृष्टिबाणधनुर्धराः ।। ५१२ ।।

# अथ नवमावरणार्चनम्

अथ वक्ष्ये महेशानि, नवमावरणार्चनम् ।
त्रिकोणे तु महाचक्रे, सर्वसिद्धिप्रदायकम् ।। ५१३ ।।
अन्तराले महाचक्रे, सर्वसिद्धिप्रदाभिधे ।
सामान्यपात्रसुधया, यजेदायुधदेवताः ।। ५१४ ।।
ततः श्रीपात्रसुधया, निजाग्रादित्रिकोणके ।
वाग्भवाख्ये सूर्यचक्रे कामरूपे च पीठके ।। ५१५ ।।
मित्रेशनायिकात्मिका, तथा जाग्रदधिष्ठिता ।
रूद्रात्मशक्तिसहिता, कामेशी सर्वसिद्धिदा ।। ५१६ ।।
कामेश्वरस्य कामेश्या, जृम्भका बाणदेवताः ।
मोहकाश्चापदेव्यश्च, पाशदेव्यो वशङ्कराः ।। ५१७ ।।
स्तम्भकाख्या महादेवि, तथैवाङ्कुशदेवताः ।
प्रसन्नां स्मेरवदनां, पाणिद्वयसमन्विताम् ।। ५१८ ।।
दक्षिणे शुद्धगुटिकां, वामे च मधुपात्रकाम् ।
वृषासनगतां दक्षे, लोहिताभां चतुर्भुजाम् ।। ५१९ ।।
दक्षिणे चाङ्कुशं खड्गं, वामे खेटकपालकौ ।
वायुतत्त्वाधिष्ठात्री देवी श्रीभगमालिनी ।। ५२० ।।
नित्यक्लिन्ना महेशानि यजेदाम्नायदेवताः ।
अग्नितत्त्वाधिष्ठात्री, भेरूण्डा वह्निवासिनी ।। ५२१ ।।
महावज्रेश्वरी देवी, जलतत्त्वाधिनायिका ।
शिवदूती त्वरिता च तथा वै कुलसुन्दरी ।। ५२२ ।।
विमला नीलपताका च, भूतत्त्वाधिनायिका ।
श्रीविजया नित्या चैव, तथा च सर्वमंगला ।। ५२३ ।।
ज्वालामालिनी चित्रा च, ललिता त्रिपुरेश्वरी ।
कामेश्वर्यादिनित्या च, तिथिरूपे दिने दिने ।। ५२४ ।।
नित्या सप्तदश प्रोक्ता, नित्या चाष्टदशात्मिका ।
लयकामेश्वरी चैव, गुटिका च कामेश्वरः ।। ५२५ ।।
खड्गं च खेटकं चैव कपालमङ्कुशन्तथा ।
ततो वै कामराजाख्ये, सोमचक्रे महेश्वरि ।। ५२६ ।।



पीठे पूर्णगिरौ चैवोड्डीशनाथात्मिका ततः ।
तथा स्वप्नाधिष्ठिता च विष्णुशक्तिरूदीरिता ।। ५२७ ।।
महावज्रेश्वरी देवी ततस्तृतीयकोणके ।
शक्त्याख्ये वह्निचक्रे च, पीठे जालन्धरे तथा ।। ५२८ ।।
षष्ठेशनाथात्मिका च तथा सुषुप्त्यधिष्ठिता ।
ब्रह्मात्मशक्तिरूदिता, देवी श्रीभगमालिनी ।। ५२९ ।।
बिन्दुमध्ये महेशानि, कूटत्रयविजृम्भिते ।
समस्तव्योमचक्रे च पीठे चोड्यानसंज्ञके ।। ५३० ।।
चर्य्या नाथात्मिका चैव तुरीयाधिष्ठिता ततः ।
परब्रह्मात्मशक्तिः श्रीमहात्रिपुरसुन्दरी ।। ५३१ ।।
सर्वसिद्धिप्रदे चक्रे, योगिन्यः सिद्धिदायिकाः ।
अतिरहस्यसंज्ञास्ता आयुधाष्टकदेवताः ।। ५३२ ।।
कामेश्वरीमुखास्तिस्रः कोणत्रयविराजिताः ।
आयुधाष्टकदेव्यस्ता, यौवनोन्मत्तविग्रहाः ।। ५३३ ।।
रक्ता विद्युल्लताकारा उद्दामकुसुमान्विताः ।
नवरत्नविशोभाढ्याः, स्वस्वायुधधराः क्रमात् ।। ५३४ ।।
वराभये सुधापात्रं, धारयन्त्यः सुखावहाः ।
कामेश्वरी शुक्लवर्णा, शुक्लमाल्यानुलेपना ।। ५३५ ।।
मुक्ताफलस्फुरद्भूषा नानाभरणभूषिताः ।
पुस्तकं चाक्षसूत्रं च, वरदं चाभयं तथा ।। ५३६ ।।
दधती चाग्रकोणस्था, रूद्रशक्तिः प्रकीर्तिता ।
वज्रेश्वरी कुङ्कुमाभा, स्फुरद्रत्नविभूषणा ।। ५३७ ।।
बालार्कवसना नीलकर्णचुम्बिविलोचना ।
इक्षुकोदण्डपुष्पेषु वरदाभयशोभिता ।। ५३८ ।।
वक्षकोणस्थिता देवी, विष्णुशक्तिरियं मता ।
सद्यः सन्तप्तहेमाभा भगमालासुशोभना ।। ५३९ ।।
अनर्घरत्नघटितभूषणा भुवनेश्वरी ।
पाशाङ्कुशज्ञानमुद्रावरदानकराम्बुजा ।। ५४० ।।
ब्रह्मशक्तिर्महेशानि तापत्रयनिकृन्तनी ।
उदक्कोणस्थिता देवी, सर्वकामफलप्रदा ।। ५४१ ।।

चक्रेशीं त्रिपुराम्बां च, कामेशीं पुरतो यजेत् ।
पञ्चोपचारैराराध्य बीजमुद्रां प्रदर्शयेत् ।। ५४२ ।।

एता अपि रहस्याख्या, योगिन्य इति पूर्ववत् ।
पुष्पाञ्जलिं प्रदद्याद्वै देव्यै देवि महेश्वरि ।। ५४३ ।।

अभीष्टसिद्धि मे देहि, त्रिपुरे देवपूजिते ।
भक्त्या समर्पये तुभ्यं नवमावरणार्चनम् ।। ५४४ ।।

## अथ दशमावरणार्चनम्

अथ वक्ष्ये महेशानि दशमावरणार्चनम् ।
सर्वानन्दमये चक्रे महात्रिपुरसुन्दरीम् ।। ५४५ ।।

शक्तिधाम्ने नमः प्रोच्य, सदैवोक्तक्रमेण च ।
संहारचक्रे चाग्नीशासुरवायव्यकोणके ।। ५४६ ।।

बिन्दुमध्ये चतुर्दिक्षु, श्रीपात्रामृतबिन्दुभिः ।
मध्ये दिक्षु क्रमेणैव यजेत् सर्वार्थसिद्धये ।। ५४७ ।।

सर्वानन्दमये चक्रे, रतिः प्रीतिः मनोभुवा ।
द्राविणी क्षोभिणी चैव, वशिनां च वशङ्करी ।। ५४८ ।।

आकर्षिणी मनोरम्या, शोभना मीनकेतना ।
सुभगा भगा तथानन्ता, तथा च भगसर्पिणी ।। ५४९ ।।

भगमालिनिकाऽनङ्गा तथाऽनङ्गमेखला ।
अनङ्गमदना दिव्यानंगमदातुरा ।। ५५० ।।

एताश्चक्रस्थिता नित्याः पूजयेत्ताः सुधीः नरः ।
साम्बसदाशिवश्चैव सद्योजातस्ततः परम् ।। ५५१ ।।

वामदेवस्तत्पुरुषोऽघोरः कालाग्निरुद्रकः ।
ईशानश्चैव सर्वज्ञा नित्यतृप्ताऽनन्दिबोधना ।। ५५२ ।।

स्वतन्त्रतामहाशक्तिः नित्यालुप्ता ह्यनन्तता ।
त्रिपुरभैरवी चक्रनायिकाऽघोरकुब्जिका ।। ५५३ ।।

प्राप्तिसिद्धिः सदा पूज्या षडाधारं ततोऽर्चयेत् ।
डाकिनी जीवजीवेशौ, साकिनी च सदाशिवः ।। ५५४ ।।

लाकिनीसहितो विष्णुः ,ब्रह्मा काकिन्या सह ।
ससाकिनीगणेशश्च, परमात्मा स–हाकिनी ।। ५५५ ।।



सयाकिनी गुरुर्देवः पूज्यश्च यथाविधि ।
सर्वयोनिमुद्रां चैव, दर्शयेत् शैवदर्शनम् ।। ५५६ ।।

योगिन्यश्चापरापरातिरहस्ययुक्ताः सदा ।
भक्त्या समर्पये तुभ्यमित्युच्चार्य पुनः पुनः ।। ५५७ ।।

बिन्दौ पुष्पांजलिं दद्यात्, योनिमुद्रां च दर्शयेत् ।
प्रणमेत्पादयोरत्र, साधको भक्तितः सदा ।। ५५८ ।।

देव्यै पुष्पाञ्जलिं दत्वा तर्पयेच्च त्रिधा त्रिधा ।
इति ते कथितं भद्रे दशमावरणार्चनम् ।। ५५९ ।।

## पश्चिमाम्नायसमष्टिक्रमः

संहारसृष्टिपूजायां, शिवं बिन्दौ समर्चयेत् ।
त्रिकोणे नादमभ्यर्च्य, काममष्टारके यजेत् ।। ५६० ।।

अष्टकोणे यजेत् कामं, शिवं बिन्दौ समर्चयेत् ।
त्रिकोणे पूजयेन्नादं, संहारस्थितिपूजने ।। ५६१ ।।

अष्टकोणे कामदेवं, त्रिकोणे नादमर्चयेत् ।
शिवं संहारसंहारे, बिन्दुचक्रे प्रपूजयेत् ।। ५६२ ।।

अघोरकुब्जिकायां हि, देवतानां लयो भवेत् ।
कुब्जिकैषा लयं याति, लयकामेश्वरीतनौ ।। ५६३ ।।

रामेणोपासिता गुह्यकाली स्याच्चक्रनायिका ।
तस्यां लयो देवतानां, भवेदेष लयक्रमः ।। ५६४ ।।

तस्यास्तु विलयो देव्याः, लयकामेश्वरीतनौ ।
अनाख्यायां क्रमः प्रोक्तः, समभ्यर्चासु सर्वदा ।। ५६५ ।।

भासा समष्टिपूजायां, देवतानां लयो भवेत् ।
देव्याः बाला-भैरवाख्या, तनौ भवति सर्वदा ।। ५६६ ।।

सा बालाभैरवी देवी, देवैः सह लयं व्रजेत् ।
लयकामेश्वरीदेहे, तद्रूपं प्रतिपद्यते ।। ५६७ ।।

## एकादशावरणार्चनम्

(मन्वस्रादि-त्रिकोणान्तर्विनिर्मित-स्पन्दिचक्राय नमः)

अथ वक्ष्ये महेशान्येकादशावरणार्चनम् ।
स्पन्दिचक्रे शिवां वन्दे, श्रीगायत्री—स्वरूपिणीम् ।। ५६८ ।।

गुरुरेव परब्रह्म गुरोराज्ञा गरीयसी ।
गुर्वनुज्ञया देवी-कुलपूजां समाचरेत् ।। ५६६ ।।

गायत्रीं तु समुच्चार्य, तत्तदावृत्तिदेवताः ।
पूजनीयाः प्रयत्नेन सर्वकामार्थसिद्धये ।। ५७० ।।

अथवा सर्वदा पूज्या गायत्र्याः नामबोधिभिः ।
द्वात्रिंशदक्षरैः पूज्या गायत्री परमा शुभा ।। ५७१ ।।

त्रिपदा गायत्री —

(त) [1]तत्त्वज्ञा ज्ञानदात्री च (त्) तत्त्वज्ञानप्रबोधिनी ।
शास्त्रे ख्याता सदा वन्द्या (स) सर्वशास्त्रार्थवादिनी ।। ५७२ ।।

विबुधेषु च विज्ञेया (वि) विबुधार्थस्वरूपिणी ।
सर्वज्ञा सर्वदा देवी (तु) तुर्यामार्गप्रदर्शिनी ।। ५७३ ।।

सनातना(र्)रमा दिव्या (व) वयोवस्थाविवर्जिता ।
रेवायाः रम्यतीर्थे च (रे) रेवातीरनिवासिनी ।। ५७४ ।।

आगमैकसदारूपा (ण) निखिलागमवेदिनी ।
(य)यमुना(म्)मोक्षदा रम्या(भ)भक्ताभीष्टप्रदायिनी ।।५७५।।

भक्ताभीष्टप्रदा(र)रम्या (गो) गोवर्धनविवर्धिनी ।
शान्तिप्रिया च विघ्नेशी (दे) देशोपद्रवनाशिनी ।। ५७६ ।।

वरदात्री सर्वदा सा (व) वक्रतुण्डवरप्रदा ।
(स) स्पन्दरूपा (य)योगगम्या ज्ञानविज्ञानसौख्यदा ।। ५७७ ।।

(धी) धीरबन्धा वन्दिता च (म) महावैरिविनाशिनी ।
समग्रेषु च कार्येषु (म) हितकर्मफलप्रदा ।। ५७८ ।।

१. श्रीमदाद्यशंकरभगवत्पादाचार्यवर्यैः प्रणीतायां यतिदण्डैश्वर्यविधानान्तर्गतपूजा-पद्धतौ गायत्र्याश्चत्वारिंशन्नामानि बोध्यानि ।



(धि) धिषणा (यो) योधिनी चान्या (यो) योगक्षेमविहारिणी ।
(नः)नवसिद्धिसमाराध्या(प)प्रभवा (र्)रोग-शमनी ।। ५७९ ।।

(चो)चोरघ्नी चोरहन्त्री च (द) दक्षिणामूर्तिरूपिणी ।
वन्द्या च वेदमाता सा (या) यात्रापापविवर्जिता ।। ५८० ।।

स्तोतव्या छन्दसां माता (त्) तुरीयपथगामिनी ।

चतुष्पदा गायत्री —

(प)परब्रह्मात्मिका ब्राह्मी (रो)रोगेशी (र)रमणी-प्रिया। ।।५८१।।

(ज)जगत्-प्रिया (से)सेव्यमाना परमा (सा) सागराम्बरा ।
(व)वेदाक्षरपरीताङ्गी (दो)दोहिनी (म्)माधवी तथा ।।५८२।।

द्वात्रिंशदक्षरै रक्ता गायत्री परमा शुभा ।
अतोऽस्य पाठमात्रेण फलं प्राप्नोति वै शुभम् ।। ५८३ ।।

........................................................

पूजयेच्च विधानेन, योगक्षेमार्थसिद्धये ।। ५८४ ।।
पूज्या चक्रेश्वरी चैव, बालात्रिपुरसुन्दरी ।
महात्रिपुरेश्वरी चैव, सर्वाम्नायनायिका ।। ५८५ ।।
चक्रस्थसिद्धा मुद्रा च, स्पन्दीचक्रनायिका ।
चक्रस्थयोगिनी चैव, महात्रिपुरसुन्दरी ।। ५८६ ।।
इत्युच्चार्य च संपूज्य पुष्पाञ्जलिभिस्ततः ।
हृदि च प्रणमेद्भक्त्या, योनिमुद्रां प्रदर्शयेत् ।। ५८७ ।।
साङ्गाः सवाहनाश्चैव सायुधाश्च ससिद्धयः ।
तर्पिताः सन्त्विति वदेज्जलं तत्र विनिक्षिपेत् ।। ५८८ ।।
अभीष्टसिद्धिं मे देहि, त्रिपुरे देवपूजिते ।
भक्त्या समर्पये तुभ्यं, शुभं चैतत् तवार्चनम् ।। ५८९ ।।

## द्वादशावरणार्चनम्

अथ वक्ष्ये महेशानि, द्वादशावरणार्चनम् ।
स्पन्दीषु शिवां वन्दे, महाविद्यास्वरूपिणीम् ।। ५९० ।।

दश महाविद्याः—

A काली तारा B षोडशीच, परमा भुवनेश्वरी।
त्रिपुराभैरवी वन्द्या, छिन्नमस्ता तथैव च ॥ ५९१ ॥
धूमावती च बगला, मातङ्गी कमला तथा।
दशविद्यामयी देवी, महात्रिपुरसुन्दरी ॥ ५९२ ॥
पूर्वस्य सिद्धलक्ष्मीश्च पञ्चवक्त्रा तथोत्तरा।
मिलित्वा दशवक्त्राऽथ, महाकालीति-कथ्यते ॥ ५९३ ॥
कमला हि महालक्ष्मीः बगला दक्षिणोत्तरा।
मिलित्वाऽग्नेयकोणस्य, महालक्ष्मीर्निगद्यते ॥ ५९४ ॥
दक्षिणस्योग्रताराऽथ, मोहनी च सरस्वती।
पश्चिमस्यां च चामुण्डा, भद्रकाली हि प्रोच्यते ॥ ५९५ ॥
प्रतीच्यां चण्डमातङ्गी, छिन्नमस्ता तथोत्तरा।
वायव्यस्य मिलिता च, महासरस्वती ननु ॥ ५९६ ॥
अथैतास्त्वन्तराले च, पूजनीया विधानतः।
बिन्दौ नवार्णमन्त्रं च, पूजयेद् यत्नतो ननु ॥ ५९७ ॥
चामुण्डा भद्रकाली च, तथोपाम्नायनायिका।
त्रिशक्तिचामुण्डायुक्ता, महात्रिपुरसुन्दरी ॥ ५९८ ॥
बालाचक्रेश्वरी चैव, तथा प्राकाम्यसिद्धिदा।
महायोनिमुद्रा चैव, स्पन्दीयचक्रनायिका ॥ ५९९ ॥
निगर्भयोगिनी चैव, महात्रिपुरसुन्दरी।
इत्युच्चार्य च संपूज्य, पुष्पाञ्जलिभिस्ततः ॥ ६०० ॥
हृदि च प्रणमेद्भक्त्या, योनिमुद्रां प्रदर्शयेत्।
साङ्गाः सवाहनाश्चैव, सायुधाश्च ससिद्धयः ॥ ६०१ ॥
तर्पिताः सन्त्विति वदेज्जलं तत्र विनिः क्षिपेत्।
अभीष्टसिद्धिं मे देहि, त्रिपुरे देवपूजिते।
भक्त्या समर्पये तुभ्यं द्वादशावरणार्चनम् ॥ ६०२ ॥

समष्टिपूजनम्—

कलानादः शिवश्चार्यं, वसुकोणं त्रिकोणकम्।
बिन्द्वात्मकमिति तथा, पश्चिमाम्नायो वै तथा ॥ ६०३ ॥

A. आद्या B. श्रीविद्या, त्रिपुरसुन्दरी, ललिता—इति नामान्तराणि।



समिष्टं च महाकीर्तिप्रदं चक्रं तथैव च।
लयश्चाघोरकुब्जेति, तथा च कुब्जिकेश्वरः ॥ ६०४ ॥
लयः कामेश्वरश्चैव, साम्बा कामेश्वरी तथा।
पराशक्त्यादिसहितं, समस्तं गुरुमण्डलम् ॥ ६०५ ॥ (अ)

## त्रयोदशावरणार्चनम्

अथ वक्ष्ये महेशानि त्रयोदशावरणार्चनम्।
वन्दे स्पन्दीषु बिन्दौ च महात्रिपुरसुन्दरीम् ॥ ६०६ ॥
गुह्या कामकला काली, संहारभैरवस्तथा।
भुवनेशी सदाशम्भुः भैरवी दक्षकालिका ॥ ६०७ ॥
भैरवेति महाकालोऽक्षोभ्यो महोग्रतारका।
रुद्रश्चाथ महाकाली, लक्ष्मीर्विष्णुभैरवः ॥ ६०८ ॥
महासरस्वती ब्रह्मा, चामुण्डा भीषणस्तथा।
अथोग्रचण्डा दुर्गा च, पाण्डनाथोऽथ भैरवः ॥ ६०९ ॥
वज्रकुब्जा शिखाच्छन्दः कुब्जिकेश्वरभैरवः।
शारदा त्रिपुराबाला, त्रिपुरो भैरवस्तथा ॥ ६१० ॥
बाला वै सुन्दरी प्रोक्ता, वटुको भैरवस्तथा।
बाला-त्रिपुरसुन्दर्याः, त्रिपुरेश्वरभैरवः ॥ ६११ ॥
कादिविद्येश्वरी काली, हादिविद्या च सुन्दरी।
सादि-तारिणी विद्या ललिता पञ्चदशी तु सा ॥ ६१२ ॥
अथातो विबुधैर्ज्ञेया, महात्रिपुरसुन्दरी।
ललितेशो भैरवश्चैव, ललितेश्वरषोडशी ॥ ६१३ ॥

(अ) अतिरिक्त-समष्टिपूजनम्—

बिन्द्वादिभूपुरे पूज्या, दशचक्रस्थिता परा
दिव्योत्तराख्यके चक्रेऽनाख्यायां शुभे तथा
ब्रह्मादिपञ्चप्रेतस्था, रक्तोत्पलसुशोभिता
चतुःपञ्चाशदद्दलैर्युक्त-कमलोपरिराजिता
सिद्धकाली शुभा पूज्या, त्र्यम्बिका त्रिपुरेश्वरी
भुवनमोहिनी पूज्या सर्वदानन्दिनी शुभा ॥

कामेश्वरः शिवश्चैव, महात्रिपुरसुन्दरी ।
महाकामेश्वरश्चैव भैरवो मंगलप्रदः ॥ ६१४ ॥
ललिता गुह्यकाली च सर्वकामार्थसिद्धिदा ।
तथा त्रिखण्डा मुद्रा च, परारहस्ययोगिनी ॥ ६१५ ॥

इत्युच्चार्य च संपूज्य, पुष्पाञ्जलिभिस्ततः ।
हृदि प्रणमेद् भक्त्या, योनिमुद्रां प्रदर्शयेत् ॥ ६१६ ॥
सांगाः सवाहनाश्चैव सायुधाश्च ससिद्धयः ।
तर्पिताः सन्त्विति वदेज्जलं तत्र विनिक्षिपेत् ॥ ६१७ ॥
अभीष्टसिद्धिं मे देहि त्रिपुरे देवपूजिते ।
भक्त्या समर्पये तुभ्यं त्रयोदशावरणार्चनम् ॥ ६१८ ॥

## अथ चतुर्दशावरणार्चनम्

श्रीगुरो दक्षिणामूर्ते, भक्तानुग्रहकारक ।
अनुज्ञां भगवन् देहि, लयक्रमार्चनाय मे ॥ ६१९ ॥

ऋक्रूपिणी तु ब्रह्माणी, रुद्राणी यजुरूपिणी ।
सामवेदस्वरूपा च, वैष्णवी परिकीर्तिता ॥ ६२० ॥

त्रिशक्तिरूपिणं तत्र, वेदाद्यं प्रणवं स्मरेत् ।
अम्बाऽम्बिकाऽम्बालिकाश्च, विद्याऽविद्ये परं शिवम् ॥६२१॥
सर्वमन्त्रेश्वरी चैव सृष्टिस्थितिलयात्मिका ।
अनाख्याभासा चैव सुन्दरीति प्रकथ्यते ॥ ६२२ ॥
ऊर्ध्वाम्नायात्मिका पूज्या, महात्रिपुरसुन्दरी
महाकामेश्वरी चैव, महावज्रेश्वरी तथा ॥ ६२३ ॥
महासमया नित्या च, प्रयजेत् भगमालिनीम् ।
बालां समयानित्यां च, महात्रिपुरसुन्दरीम् ॥ ६२४ ॥

शुक्लं रक्तञ्च मिश्रञ्च, विश्रान्तिचरणं तथा ।
निर्वाणचरणञ्चेति, तुरीयचरणं तथा ॥ ६२५ ॥
तुरीयातीतचरणं, पूजयामीह सर्वदा ।
प्रथमः परमेश्वरश्चैव, द्वितीयो विच्चेश्वरस्तथा ॥ ६२६ ॥
अन्यो हंसेश्वरश्चैव, संवर्तेश्वरसंज्ञकः ।
ततो दीपेश्वरश्चैव, नवात्मेश्वरसंज्ञकः ॥ ६२७ ॥
षडन्वयेति–सुप्रोक्तो, रश्मिरहितशाम्भवः ।
षडन्वयो वाग्भवः कूटः, कामराजस्तथैव च ॥ ६२८ ॥



सोम्यैन्द्री पश्चिमाम्नायः त्रितयात्मा च वाग्भवः ।
कादिः स एव कथितः, कूटस्तन्त्रविशारदैः ॥ ६२९ ॥
हादिः स एव कथितः, कूट-आगमवेदिभिः ।
षोडशकूटात्मिकेयं, कथ्यते चक्रनायिका ॥ ६३० ॥

ऊर्ध्वाम्नायेश्वरी चैव, सुप्रोक्ता महाषोडशी ।
यजेद् वै सर्वसिद्धीश्च सर्वकामार्थसिद्धिदाः ॥ ६३१ ॥
इत्युच्चार्य च संपूज्य, पुष्पाञ्जलिभिस्ततः ।
हृदि च प्रणमेद्भक्त्या, योनिमुद्रां प्रदर्शयेत् ॥ ६३२ ॥

साङ्गाः सवाहनाश्चैव, सायुधाश्च ससिद्धयः ।
तर्पिताः सन्त्विति वदेज्जलं तत्र विनिक्षिपेत् ॥ ६३३ ॥
अभीष्टसिद्धिं मे देहि, त्रिपुरे देवपूजिते ।
भक्त्या समर्पये तुभ्यं शुभमेतत् तवार्चनम् ॥ ६३४ ॥

## अथ पञ्चदशावरणार्चनम्

श्रीगुरो दक्षिणामूर्ते भक्तानुग्रहकारक ।
अनुज्ञां भगवन् देहि सृष्टिक्रमार्चनाय मे ॥ ६३५ ॥
बिन्दौ षट्कोणमाकल्प्य, चिन्तयेत् शाम्भवं शिवम् ।
सभैरवमुदीच्याथ, पूजयेदत्र देवताः ॥ ६३६ ॥
दक्षिणे पूजनीया च, दक्षिणा कालिका शिवा ।
महाकाली भैरवश्च, तया सार्द्धं प्रपूजयेत् ॥ ६३७ ॥

सर्वाम्नायात्मिका पूज्या, महात्रिपुरसुन्दरी ।
निर्वाणभैरवं चात्र यथाशास्त्रं समर्चयेत् ॥ ६३८ ॥
शाम्भवं रश्मिसहितं, प्रोच्यते च पृथक् पृथक् ।
यजेन्नवात्मेश्वरोऽत्र, दीपेश्वरस्तथैव च ॥ ६३९ ॥
संवर्तेश्वरः सुप्रोक्तः हंसेश्वरस्तथैव च ।
विच्चेश्वरः सुप्रोक्तः, परेश्वरस्तथैव च ॥ ६४० ॥

पूर्वाम्नाये यजेच्चैव, निर्वाणभुवनेश्वरीम् ।
दक्षिणाम्नाये निर्वाणकालिकां दक्षिणां यजेत् ।: ६४१ ॥
अधराम्नाये निर्वाण–महोग्रतारां यजेत् ।
निर्वाणकुब्जिकां चैव, यजेत् पश्चिमाम्नायके ॥ ६४२ ॥
उत्तरे गुह्यकालीञ्च यजेदेवं विधानतः ।
ऊर्ध्वाम्नाये प्रपूज्या हि, महात्रिपुरसुन्दरी ॥ ६४३ ॥

श्रीविद्या बगला चैव, कालरात्रिस्तथैव च ।
जयदुर्गा छिन्नमस्ता, महात्रिपुरसुन्दरी ॥ ६४४ ॥
समयाविद्या कथिताः यदेताश्च यथाविधि ।
अघोरवज्रसमया च, घोरा वीरा जयस्तथा ॥ ६४५ ॥
सिद्धभोगौ च मोक्षश्च यजेन्नवरत्नकुब्जिकाः ।
कामतारा रमा माया, वाग्दिव्ये तथा परा ॥ ६४६ ॥
निर्वाणश्च तथा मोक्षः, यजेन्नवरत्नसुन्दरीम् ।
पूजयेदत्र निर्वाणमहात्रिपुरसुन्दरीम् ॥ ६४७ ॥
महात्रिपुरसुन्दर्याः द्वादश च चतुर्दश ।
षोडशकूटात्मिकेयं, सर्वाम्नायात्मिका तथा ॥ ६४८ ॥
अष्टादशी प्रपूज्या हि महात्रिपुरसुन्दरी ।
मोक्षसिद्धिः त्रिखण्डा च परापरातियोगिनी ॥ ६४९ ॥
इत्युच्चार्य च संपूज्य पुष्पांजलिभिस्ततः ।
हृदि च प्रणमेद् भक्त्या योनिमुद्रां प्रदर्शयेत् ॥ ६५० ॥
सांगाः सवाहनाश्चैव सायुधाश्च ससिद्धयः ।
तर्पिताः सन्त्विति वदेज्जलं तत्र विनिक्षिपेत् ॥ ६५१ ॥

## अथ षोडशावरणार्चनम्

अथ वक्ष्ये महेशानि षोडशावरणार्चनम् ।
भूपुराद् बहिः पूजयेदतोऽऽकारावधिस्ततः ॥ ६५२ ॥
कलां तत्त्वं च वर्णं च, भुवनं च पदं तथा ।
मन्त्राध्वानं यजेच्चैव, तत्त्वाध्यानं च तत्त्वतः ॥ ६५३ ॥
त्रिवेश्वरं यजेदत्र, डाकिनीसहितं सदा ।
ससाकिनं सदाशिवं, विष्णुं च लाकिन्या सह ॥ ६५४ ॥
काकिन्या गणनाथं च, याकिन्या स्वगुरुं तथा ।
यजेत्सदा शुभां चैव, महात्रिपुरसुन्दरीम् ॥ ६५५ ॥
मोक्षसिद्धां त्रिखण्डां च मुद्रां तत्र प्रदर्शयेत् ।
सर्वदर्शनमुत्तीर्णां सर्वाध्वशोधनेश्वरीम् ॥ ६५६ ॥
परापरातियोगिनीं, यजेच्च रहस्यात्मिकाम् ।
त्रैलोक्यमोहने चक्रे, चतुरस्रे महेश्वरि ॥ ६५७ ॥
चतुरस्रान्तरेखातः बहिरेवं यजेद् बुधः ।
कच्छपश्च मुकुन्दश्च नन्दो नीलनिधिस्तथा ॥ ६५८ ॥



शंख–पद्म–महापद्म – मकराः निधयस्तथा ।
आम्नायनायिका पूज्या, द्वारेषु च यथाविधि ॥ ६५९ ॥
द्वारे वै पश्चिमे पूज्या, नायिका घोरकुब्जिका ।
उत्तरे सिद्धलक्ष्मीश्च, पूर्वे चोन्मनी तथा ॥ ६६० ॥
आद्याकाली दक्षिणे स्यात्पूज्या द्वाराङ्गदेवताः ।
नैर्ऋत्ये चैव संपूज्या, तिरस्करणीति वै शुभा ॥ ६६१ ॥
आग्नेये वनदुर्गा च, महालक्ष्मीति-विश्रुता ।
कामरतिस्तथैशाने, महाकालीति वै शुभा ॥ ६६२ ॥
वसन्तप्रीतिर्वायव्ये, महासरस्वती तथा ।
द्वारपार्श्वेषु पूज्या हि, निधिदेवता वै क्रमात् ॥ ६६३ ॥
वज्रशक्तिस्तथा दण्डं, खड्गपाशाङ्कुशा गदाः ।
त्रिशूलं पद्मचक्रे च, पूज्या आयुधदेवताः ॥ ६६४ ॥
इन्द्राग्नियमाश्चैव, निर्ऋतिर्वरुणस्तथा ।
वायुः सोमस्तथैशानो, ब्रह्मानन्तौ तथैव च ॥ ६६५ ॥
उदीच्यां बटुकस्त्वत्र, प्रतीच्यां योगिनी तथा ।
क्षेत्रपालो गणपतिः, दक्षिणपूर्वयोस्तथा ॥ ६६६ ॥
प्रतीच्यां वनदुर्गा च द्वारेऽघोरस्तु दक्षिणे ।
पूर्वे सुदर्शनो ज्ञेयः, शरभः स्यादुत्तरे खलु ॥ ६६७ ॥
इत्युच्चार्य च संपूज्य पुष्पाञ्जलिभिस्ततः ।
हृदि च प्रणमेद् भक्त्या, योनिमुद्रां प्रदर्शयेत् ॥ ६६८ ॥
साङ्गाः सवाहनाश्चैव सायुधाश्च ससिद्धयः ।
तर्पिताः सन्त्विति वदेज्जलं तत्र विनिक्षिपेत् ॥ ६६९ ॥
अभीष्टसिद्धिं मे देहि, त्रिपुरे देवपूजिते ।
भक्त्या समर्पये तुभ्यं षोडशावरणार्चनम् ॥ ६७० ॥

समष्टिपूजनम् —

भासा समष्टिपूजायां देवतानां लयो भवेत् ।
देव्याः हि बालाभैरव्यास्तनौ भवति सर्वदा ॥ ६७१ ॥
सा बालाभैरवी देवी, देवैः सह लयं व्रजेत् ।
लयकामेश्वरीदेहे, तद्रूपं प्रतिपद्यते ॥ ६७२ ॥

इति श्रीमदाद्यशङ्कराचार्यविरचित-यतिदण्डैश्वर्यविधानान्तर्गता
पूजापद्धतिः समाप्ता ।

# अथ हंस - षोढोपनिषद्

अथाह वै हंसषोढान्यासी शिवो भवेत् । सर्वसिद्धेश्वरो भवेत् । एतत्फलं वक्तुं सदाशिवोऽपि न समर्थः ।

**विनियोगः—**

अस्य श्रीहंसषोढान्यासस्य विरूपाक्षमहाकालऋषिः, अनुष्टुप्छन्दः, काली देवता, कालीदेहार्थे विनियोगः ।

**ऋष्यादिन्यासः—**

ह्सां ह्सीं ह्सूं ह्सैं ह्सौं ह्सः इति षट्कम् । हंसः सोहमिति ध्यानम् । निर्वाणरूपो भवेत् । हंसः कं खं गं घं ङं महामुण्डमालाधारिणि महाकालप्रिये मां रक्ष रक्ष— हृदये [1] षट्चक्रवासिनि वाणीश्वरि जिह्वाग्रे वस वस हं नमः—शिरसि । हंसः चं छं जं झं ञं महात्रिपुरभैरवि पुस्तकाक्षमालाधारिणि शत्रुमुखस्तम्भनं कुरु कुरु स्वाहा । ( सहस्रारमहापद्मे । ) हंसः टं ठं डं ढं णं डां डीं डूं डाकिनि मां रक्ष रक्ष स्वाहा । इति न्यसेत् । तृतीया भवति । हंसः तं थं दं धं नं महामारि मारहारिणि हुं हुं दारिद्र्यं हर हर स्वाहा (गुह्ये न्यसेत् ।) स ब्रह्मकालीत्वं गच्छति । चतुर्थत्वं गच्छति । हं सः पं फं बं भं मं मार्जारि वीरावलि मसालस्यं नाशय नाशय । पञ्चमत्वं गच्छति । हं सः यं रं लं वं शं षं सं हं लम्बोदरि मातमंङ्गलप्रिये मम जाड्यं छेदय छेदय, भ्रंश भ्रंश, भगवति मां रक्ष रक्ष भुवनधारिणि मां धारय धारय स्वाहा । ( पदद्वये न्यसेत् । ) शिवो भवति । अथ वै षष्ठीं न्यसेत् । हं सः ळं क्षं महालक्ष्मि महालक्ष्मि राजराजेश्वरि महाकालप्रिये कालखण्डिनि खण्डिनि खण्डय खण्डय खां खीं खूं खैं खौं खः खानित्रि स मे स्वाहा । (इति सर्वाङ्गे न्यसेत्) (हंसः ५० व्यापकं कुर्यात्) । इति षष्ठी । स शिवो भवेत् । स सोमयाजी भवेत् । स विरक्तो भवेत् । स सर्वदीक्षितो भवेत् । सोऽमृतत्वं गच्छति । स सर्वकालत्वं गच्छति । स सर्वन्यासकारी भवति । अनधीतविद्यां लभते । कर्तव्याकरणादिकर्त्ता भवेत् । सर्वसिद्धीश्वरो भवेत् । कालीरूपो भवेत् । सोऽहं हंसः इत्याह भगवान् सदाशिव इति प्रोक्तं वेद ।

**इति आथर्वणे सौभाग्यकाण्डे हंसषोढान्यासः ।**

---

१—प्रोक्तं वेदशिरो भवेत् ।



# अथ तारा-महाषोढा-न्यासः[1]

ॐ अस्य श्रीअधराम्नायतारा-महाषोढान्यासस्य अक्षोभ्यऋषिः, उष्णिक् छन्दः, श्रीताराभगवती देवता, शिवकलाग्रहबीजं, दिक्पालषट्चक्रं शक्तिः, तारापीठ—कीलकं, श्रीतारा-प्रीत्यर्थं महाषोढान्यासे विनियोगः ।

**ऋष्यादि-न्यासः—**

अक्षोभ्यऋषये नमः— शिरसि, उष्णिक्छन्दसे नमः— मुखे, श्रीताराभगवतीदेवतायै नमः— हृदये, शिवकला-ग्रह-बीजाय नमः— गुह्ये, दिक्पाल– षट्चक्रशक्तये नमः— पादयोः, तारा-पीठ-कीलकाय नमः— नाभौ, श्रीताराप्रीत्यर्थं महाषोढान्यासे विनियोगाय नमः— सर्वाङ्गे ।

**कर-हृदयादि न्यासाः—**

'स्त्रीं हूं फट्' इत्यनेन कर-हृदयादिन्यासान् कुर्यात् ।

**ध्यानम् —**

**ध्यायेत् कोटिदिवाकरद्युतिनिभां बालेन्दुयुक्शेखरां,**
**रक्ताङ्गीं रसनां सुरक्तवसनां पूर्णेन्दुबिम्बाननाम् ।**
**पाशं कर्त्रि-महाङ्कुशाम्बुजधरां दोर्भिश्चतुर्भिर्युतां,**
**नानाभूषणभूषितां भगवतीं तारां जगत्तारिणीम् ॥**

[ १ ] **शिवकला-न्यासः—**

अस्य श्रीशिवकलामातृकान्यासमन्त्रस्य दक्षिणामूर्ति ऋषिः गायत्रीच्छन्दः, अर्धनारीश्वरो देवता, हलो बीजानि, स्वराः शक्तयः, क्षं बिन्दुः कीलकं स्वाभीष्टसिद्धये न्यासे विनियोगः ।

( क ) **ऋष्यादि-न्यासाः ।** ( ख ) **करहृदयादि-न्यासाः—**'ह्सां ह्सीं' इति दीर्घषट्केन यथा– ॐ ह्सां अङ्गुष्ठाभ्यां नमः— हृदयाय नमः । ॐ ह्सीं तर्जनीभ्यांनमः— शिरसे स्वाहा । ॐ ह्सूं मध्यमाभ्यां नमः—शिखायै वषट् ॥ ॐ ह्सैं अनामिकाभ्यां नमः — कवचाय हुम् ॥ ॐ ह्सौं कनिष्ठिकाभ्यां नमः— नेत्रत्रयाय वौषट् ॥ ॐ ह्सः करतलकरपृष्ठाभ्यां नमः—अस्त्राय फट् ॥

---

१—रवौ पद्मे शिवकला ग्रह-दोष-निवारकाः ।
दिक्पाल–डाकिनी–नागादिकं पीठं च विन्यसेत् ॥
(पद्मे — मूलाधारे । डाकिनी=षट्चक्रमिति ।)

**( ग ) ध्यानम्—**

**पाशाङ्कुशवराक्षस्रक्पाणिशीतांशुशेखरम् ।**
**त्र्यक्षं रक्त-सुवर्णाभमर्द्धनारीश्वरं भजे ॥**

| | |
|---|---|
| ॐ ह्सौं अं श्रीकण्ठेश-पूर्णोदरीभ्यां नमः | ललाटे |
| „ आं अनन्तेश-विरजाभ्यां नमः | मुखवृत्ते |
| „ इं सूक्ष्मेश-शाल्मलीभ्यां नमः | दक्षनेत्रे |
| „ ईं त्रिमूर्तीश-लोलाक्षीभ्यां नमः | वामनेत्रे |
| „ उं अमरेश-वर्तुलाक्षीभ्यां नमः | दक्षकर्णे |
| „ ऊं अर्घीश-घोणाभ्यां नमः | वामकर्णे |
| „ ऋं भारभूतेश-दीर्घमुखीभ्यां नमः | दक्षनासायाम् |
| „ ॠं तिथीशगोमुखीभ्यां नमः | वामनासायाम् |
| „ लृं स्थाण्वीश-दीर्घजिह्वाभ्यां नमः | दक्षगण्डे |
| „ लॄं हरेश-कुण्डोदरीभ्यां नमः | वामगण्डे |
| „ एं झिण्टीश-ऊर्ध्वकेशीभ्यां नमः | ऊर्ध्वोष्ठे |
| „ ऐं भौतिकेश-विकृतमुखीभ्यां नमः | अधरोष्ठे |
| „ ओं सद्योजात-ज्वालामुखीभ्यां नमः | ऊर्ध्वदन्तपङ्क्तौ |
| „ औं अनुग्रहेश-उल्कामुखीभ्यां नमः | अधो दन्तपङ्क्तौ |
| „ अं अक्रूरेश-श्रीमुखीभ्यां नमः | शिरसि |
| „ अः महासेनेश-विद्यामुखीभ्यां नमः | मुखे |
| „ कं क्रोधीश-महाकालीभ्यां नमः | जिह्वाग्रे |
| „ खं चण्डेश-सरस्वतीभ्यां नमः | कण्ठदेशे |
| „ गं पञ्चान्तकेश-सर्वसिद्धि गौरीभ्यां नमः | दक्षबाहुमूले |
| „ घं शिवोत्तमेशत्रैलोक्येशविद्याभ्यां नमः | दक्षकूर्परे |
| „ ङं एकरुद्रेशमन्त्रशक्तिभ्यां नमः | मणिबन्धे |
| ॐ ह्सौ चं कूर्मेश—आत्मशक्तिभ्यां नमः | दक्षहस्ताङ्गुलिमूले |
| „ छं एकनेत्रेश—भूतमातृभ्यां नमः | दक्षहस्ताङ्गुल्यग्रे |
| „ जं चतुराननेश-लम्बोदरीभ्यां नमः | वामबाहुमूले |
| „ झं अजेश-द्राविणीभ्यां नमः | वामकूर्परे |
| „ ञं सर्वेश-नागरीभ्यां नमः | वाममणिबन्धे |
| „ टं सोमेश-खेचरीभ्यां नमः | वामहस्ताङ्गुलिमूले |
| „ ठं लाङ्गलीश-मञ्जरीभ्यां नमः | वामहस्ताङ्गुल्यग्रे |
| „ डं दारुकेश-रूपिणीभ्यां नमः | दक्षजानुनि |



| | |
|---|---|
| ॐ ह्सौं ढं अर्धनारीश-वीरिणीभ्यां नमः | दक्षपादमूले |
| „ णं उमाकान्तेश-काकोदरीभ्यां नमः | दक्षपादगुल्फे |
| „ तं आषाढीश-पूतनाभ्यां नमः | दक्षपादाङ्गुलिमूले |
| „ थं चण्डीश-भद्रकालीभ्यां नमः | दक्षपादाङ्गुल्यग्रे |
| „ दं अत्रीश-योगिनीभ्यां नमः | वामपादमूले |
| „ धं मीनेश-शङ्खिनीभ्यां नमः | वामजानौ |
| „ नं मेषेश-तर्जनीभ्यां नमः | वामपादगुल्फे |
| „ पं लोहितेश-कालरात्रीभ्यां नमः | वामपादाङ्गुलिमूले |
| „ फं शिखीश-कुब्जिनीभ्यां नमः | वामपादाङ्गुल्यग्रे |
| „ बं छागलण्डेश-कपर्दिनीभ्यां नमः | दक्षपार्श्वे |
| „ भं द्विरण्डेश-वज्रीभ्यां नमः | वामपार्श्वे |
| „ मं महाकालेश-जयाभ्यां नमः | पृष्ठे |
| „ यं त्वगात्मभ्यां वालीशमुमुखेश्वरीभ्यां नमः | उदरे |
| „ रं असृगात्मभ्यां भुजगेश-रेवतीभ्यां नमः | हृदि |
| „ लं मांसात्मभ्यां पिनाकीश-माधवीभ्यां नमः | दक्षांसे |
| „ वं मेदआत्मभ्यां खड्गीश-वारुणीभ्यां नमः | ककुदि |
| „ शं अस्थ्यात्मभ्यां वकेश-वायवीभ्यां नमः | वामांसे |
| „ षं मज्जात्मभ्यां श्वेतेशरक्षोविदारिणीभ्यां नमः | हृदयादिदक्ष-हस्तान्तम् |
| „ सं शुक्रात्मभ्यां भृग्वीश-सहजयाभ्यां नमः | हृदयादिवाम-हस्तान्तम् |
| „ हं प्राणात्मभ्यां नकुलीश लक्ष्मीभ्यां नमः | हृदयादिदक्षपादान्तम् |
| „ ळं शक्त्यात्मभ्यां शिवेश-व्यापिनीभ्यां नमः | हृदयादिवामपादान्तम् |
| „ क्षं क्रोधात्मभ्यां संवर्तकेश-महामायाभ्यां नमः | हृदयादि-मस्तकान्तम् |

## [२] ग्रहन्यासः

| | |
|---|---|
| ॐ ह्रीं स्त्रीं हूं अं...............अः रक्तवर्णाय सूर्याय नमः | हृदि |
| „ यं रं लं वं शुक्लवर्णाय सोमाय नमः | भ्रूद्वये |
| „ कं खं गं घं ङं रक्तवर्णाय मङ्गलाय नमः | लोचनद्वये |
| „ चं छं जं झं ञं श्यामवर्णाय बुधाय नमः | वक्षःस्थले |
| „ टं ठं डं ढं णं पीतवर्णाय बृहस्पतये नमः | कण्ठकूपे |
| „ तं थं दं धं नं श्वेतवर्णाय भार्गवाय नमः | घण्टिकायां |

ॐ ह्रीं स्त्रीं हूं पं फं बं भं मं नीलवर्णाय शनैश्चराय नाभेरधोदेशे
,, शं षं सं हं धूम्रवर्णाय राहवे नमः मुखे
,, ळं क्षं धूम्रवर्णाय केतवे नमः नाभौ

**[ ३ ] दिक्पालन्यासः**

ॐ ह्रीं स्त्रीं हूं अं इं उं ऋं लृं एं ओं अं इन्द्राय नमः ललाटपूर्वभागे
,, आं ईं ऊं ॠं लॄं ऐं औं अः अग्नये नमः ललाटस्याग्नेये
,, कं खं गं घं ङं यमाय नमः ललाटदक्षिणभागे
,, चं छं जं झं ञं निर्ऋतये नमः ललाटनैर्ऋत्यभागे
,, टं ठं डं ढं णं वरुणाय नमः ललाटपश्चिमभागे
,, तं थं दं धं नं वायवे नमः ललाटवायव्यभागे
,, पं फं बं भं मं सोमाय नमः ललाटोत्तरभागे
,, यं रं लं वं ईशानाय नमः ललाटईशानभागे
,, शं षं सं हं ब्रह्मणे नमः ललाटऊर्ध्वभागे
,, ळं क्षं अनन्ताय नमः ललाटपूर्वभागे

**[ ४ ] षट्चक्रन्यासः**

ॐ ह्रीं स्त्रीं हूं वं शं षं सं डाकिनीयुताय ब्रह्मणे नमः मूलाधारे
,, बं भं मं यं रं लं राकिनीयुताय विष्णवे नमः स्वाधिष्ठाने
,, डं ढं णं तं थं दं धं नं पं फं लाकिनीयुताय रुद्राय नमः
मणिपूरे
,, कं खं गं घं ङं चं छं जं झं ञं टं ठं काकिनीयुताय ईश्वराय नमः
अनाहते
,, अं आं ......... अः साकिनीयुताय सदाशिवाय नमः विशुद्धौ
,, हं ळं क्षं हाकिनीयुताय परशिवाय ब्रह्मणे नमः आज्ञायां

**[ ५ ] तारादि-न्यासः—**

ॐ ह्रीं स्त्रीं हूं अं आं कं खं गं घं ङं तारायै नमः ब्रह्मरन्ध्रे
,, इं ईं चं छं जं झं ञं उग्रायै नमः ललाटे
,, उं ऊं टं ठं डं ढं णं महोग्रायै नमः भ्रूमध्ये
,, ऋं ॠं तं थं दं धं नं वज्रायै नमः कण्ठे
,, लृं लॄं पं फं बं भं मं महाकाल्यै नमः हृदि
,, एं ऐं यं रं लं वं सरस्वत्यै नमः नाभौ
,, ओं औं शं षं सं हं कामेश्वर्यै नमः लिङ्गे
,, अं अः ळं क्षं चामुण्डायै नमः मूलाधारे



**[ ६ ] पीठ-न्यासः—**

ॐ ह्रीं स्त्रीं हूं अं इं उं ऋं लृं एं ओं अं कामरूपपीठाय नमः आधारे
,, आं ईं ऊं ॠं लॄं ऐं औं अः जालन्धरपीठाय नमः हृदि
,, कं खं गं घं ङं पूर्णगिरिपीठाय नमः ललाटे
,, चं छं जं झं ञं ओड्याणपीठाय नमः केशसन्धौ
,, टं ठं डं ढं णं वाराणसीपीठाय नमः भ्रुवोः
,, तं थं दं धं नं अवन्तीपीठाय नमः नेत्रयोः
,, पं फं बं भं मं मायापुरीपीठाय नमः मुखे
,, यं रं लं वं मथुरापीठाय नमः कण्ठे
,, शं षं सं हं अयोध्यापीठाय नमः नाभौ
,, ळं क्षं काञ्चीपुरीपीठाय नमः कट्याम्

## अथ भुवनेश्वरी-महाषोढा-न्यासः[१]

**विनियोगः —**

ॐ अस्य पूर्वाम्नायश्रीभुवनेश्वरी-महाषोढान्यासस्य शक्तिः ऋषि-र्गायत्रीछन्दः, श्रीभुवनेश्वरी देवता, ह्रीं बीजं, श्रीं शक्तिः, क्लीं कीलकं, (अथवा परा-परात्परा बीजं, परात्परातीना-चित्परा शक्तिः, चित्परात्परा-चित्परात्परातीता कीलकं,) श्रीभुवनेश्वरीप्रीत्यर्थं न्यासे विनियोगः ।

**ऋष्यादिन्यासः —**

'ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः' इति षडङ्गन्यासः ।

**ध्यानम्—**

**उद्यद्दिनद्युतिमिन्दुकिरीटां तुङ्गकुचां नयनत्रययुक्ताम् ।**
**स्मेरमुखीं वरदाङ्कुशपाशाभीतिकरां प्रभजे भुवनेशीम् ॥**

**१— परा-न्यासः**

अस्य श्रीपरान्यासमन्त्रस्य०

ॐ अं ॐ अं ॐ अं नमः ललाटे
ॐ आं ॐ आं ॐ आं नमः मुखवृत्ते

[१]परा परात्परा [२]न्यासः [३]परात्परातीता तथा ।
[४]चित्परा [५]चित्परात्परा सोमे स्वाधिष्ठाने तथा ॥
[६]सच्चित्परात्परातीता तथेयं भुवनेश्वरी ।

| | |
|---|---|
| ॐ इं ॐ इं ॐ इं नमः | दक्षनेत्रे |
| ॐ ईं ॐ ईं ॐ ईं नमः | वामनेत्रे |
| ॐ उं ॐ उं ॐ उं नमः | दक्षकर्णे |
| ॐ ऊं ॐ ऊं ॐ ऊं नमः | वामकर्णे |
| ॐ ऋं ॐ ऋं ॐ ऋं नमः | दक्षनासायाम् |
| ॐ ॠं ॐ ॠं ॐ ॠं नमः | वामनासायाम् |
| ॐ ऌं ॐ ऌं ॐ ऌं नमः | दक्षकपोले |
| ॐ ॡं ॐ ॡं ॐ ॡं नमः | वामकपोले |
| ॐ एं ॐ एं ॐ एं नमः | ऊर्ध्वोष्ठे |
| ॐ ऐं ॐ ऐं ॐ ऐं नमः | अधरोष्ठे |
| ॐ ओं ॐ ओं ॐ ओं नमः | ऊर्ध्वदन्तपङ्क्तौ |
| ॐ ओं ॐ औं ॐ औं नमः | अधोदन्तपङ्क्तौ |
| ॐ अं ॐ अं ॐ अं नमः | मूर्धनि |
| ॐ अः ॐ अः ॐ अः नमः | मुखे |
| ॐ कं ॐ कं ॐ कं नमः | दक्षिणबाहुमूले |
| ॐ खं ॐ खं ॐ खं नमः | दक्षिणकूर्परे |
| ॐ गं ॐ गं ॐ गं नमः | दक्षिणमणिबन्धे |
| ॐ घं ॐ घं ॐ घं नमः | हस्ताङ्गुलिमूले |
| ॐ ङं ॐ ङं ॐ ङं नमः | दक्षिणहस्तागुल्यग्रे |
| ॐ चं ॐ चं ॐ चं नमः | वामबाहुमूले |
| ॐ छं ॐ छं ॐ छं नमः | वामकूर्परे |
| ॐ जं ॐ जं ॐ जं नमः | वाम-मणिबन्धे |
| ॐ झं ॐ झं ॐ झं नमः | वाम-हस्ताङ्गुलिमूले |
| ॐ ञं ॐ ञं ॐ ञं नमः | वाम-हस्ताङ्गुल्यग्रे |
| ॐ टं ॐ टं ॐ टं नमः | दक्षिण पादमूले |
| ॐ ठं ॐ ठं ॐ ठं नमः | ,, जानुनि |
| ॐ डं ॐ डं ॐ डं नमः | ,, गुल्फे |
| ॐ ढं ॐ ढं ॐ ढं नमः | दक्षिण पादाङ्गुलिमूले |
| ॐ णं ॐ णं ॐ णं नमः | ,, पादाङ्गुल्यग्रे |
| ॐ तं ॐ तं ॐ तं नमः | वाम-पादमूले |
| ॐ थं ॐ थं ॐ थं नमः | वाम-जानुनि |
| ॐ दं ॐ दं ॐ दं नमः | वाम-गुल्फे |
| ॐ धं ॐ धं ॐ धं नमः | वाम-पादाङ्गुलिमूले |



| | |
|---|---|
| ॐ नं ॐ नं ॐ नं नमः | वाम-पादाङ्गुल्यग्रे |
| ॐ पं ॐ पं ॐ पं नमः | दक्षपार्श्वे |
| ॐ फं ॐ फ ॐ फं नमः | वाम-पाश्व |
| ॐ बं ॐ बं ॐ बं नमः | पृष्ठे |
| ॐ भं ॐ भं ॐ भं नमः | नाभौ |
| ॐ मं ॐ मं ॐ मं नमः | उदरे |
| ॐ यं ॐ यं ॐ यं नमः | त्वगात्मने नमः, हृदि |
| ॐ रं ॐ रं ॐ रं नमः | असृगात्मने नमः, दक्षांसे |
| ॐ लं ॐ लं ॐ लं नमः | मांसात्मने नमः, ककुदि |
| ॐ वं ॐ वं ॐ वं नमः | भेदआत्मने नमः वामांसे |
| ॐ शं ॐ शं ॐ शं नमः | अस्थ्यात्मने नमः हृदयादिदक्षहस्तान्तम् |
| ॐ षं ॐ षं ॐ षं नमः | मज्जात्मने नमः, हृदयादिवामहस्तान्तम् |
| ॐ सं ॐ सं ॐ सं नमः | शुक्रात्मने नमः, हृदयादिदक्षपादान्तम् |
| ॐ हं ॐ हं ॐ हं नमः | आत्मने नमः, हृदयादिवामपादान्तम् |
| ॐ ळं ॐ ळं ॐ ळं नमः | परमात्मने नमः, जठरे |
| ॐ क्षं ॐ क्षं ॐ क्षं नमः | प्राणात्मने नमः, हृदयादिमस्तकान्तम् |

२—परात्परान्यासः —

| | |
|---|---|
| श्रीं अं श्रीं अं श्रीं अं नमः | ललाटे |
| श्रीं आं श्रीं आं श्रीं आं नमः | मुखवृत्ते |
| श्रीं इं श्रीं इं श्रीं इं नमः | दक्षनेत्रे |
| श्रीं ईं श्रीं ईं श्रीं ईं नमः | वामनेत्रे |
| श्रीं उं श्रीं उं श्रीं उं नमः | दक्षकर्णे |
| श्रीं ऊं श्रीं ऊं श्रीं ऊं नमः | वामकर्णे |
| श्रीं ऋं श्रीं ऋं श्रीं ऋं नमः | दक्षनासायाम् |
| श्रीं ॠं श्रीं ॠं श्रीं ॠं नमः | वामनासायाम् |
| श्रीं ऌं श्रीं ऌं श्रीं ऌं नमः | दक्षकपोले |
| श्रीं ॡं श्रीं ॡं श्रीं ॡं नमः | वामकपोले |
| श्रीं एं श्रीं एं श्रीं एं नमः | ऊर्ध्वोष्ठे |
| श्रीं ऐं श्रीं ऐं श्रीं ऐं नमः | अधरोष्ठे |
| श्रीं ओं श्रीं ओं श्रीं ओं नमः | ऊर्ध्वदन्तपङ्क्तौ |
| श्रीं औं श्रीं औं श्रीं औं नमः | अधोदन्तपङ्क्तौ |
| श्रीं अं श्रीं अं श्रीं अं नमः | मूर्धनि |

| | |
|---|---|
| श्रीं अः श्रीं अः श्रीं अः नमः | मुखे |
| श्रीं कं श्रीं कं श्रीं कं नमः | दक्षिण-बाहुमूले |
| श्रीं खं श्रीं खं श्रीं खं नमः | दक्षिणकूर्परे |
| श्रीं गं श्रीं गं श्रीं गं नमः | दक्षिणमणिबन्धे |
| श्रीं घं श्रीं घं श्रीं घं नमः | दक्षिणहस्ताङ्गुलिमूले |
| श्रीं ङं श्रीं ङं श्रीं ङं नमः | दक्षिणहस्ताङ्गुल्यग्रे |
| श्रीं चं श्रीं चं श्रीं चं नमः | वामबाहुमूले |
| श्रीं छं श्रीं छं श्रीं छं नमः | वामकूर्परे |
| श्रीं जं श्रीं जं श्रीं जं नमः | वाममणिबन्धे |
| श्रीं झं श्रीं झं श्रीं झं नमः | वामहस्ताङ्गुलिमूले |
| श्रीं ञं श्रीं ञं श्रीं ञं नमः | वाम-हस्ताङ्गुल्यग्रे |
| श्रीं टं श्रीं टं श्रीं टं नमः | दक्षिण-पादमूले |
| श्रीं ठं श्रीं ठं श्री ठं नमः | दक्षिण-जानुनि |
| श्रीं डं श्रीं डं श्रीं डं नमः | दक्षिण-पादगुल्फे |
| श्रीं ढं श्रीं ढं श्रीं ढं नमः | दक्षिण-पादाङ्गुलिमूले |
| श्रीं णं श्रीं णं श्रीं णं नमः | दक्षिण-पादाङ्गुल्यग्रे |
| श्रीं तं श्रीं तं श्रीं तं नमः | वाम-पादमूले |
| श्रीं थं श्रीं थं श्रीं थं नमः | वाम-जानुनि |
| श्रीं दं श्रीं दं श्रीं दं नमः | वाम-गुल्फे |
| श्रीं धं श्रीं धं श्रीं धं नमः | वाम-पादाङ्गुलिमूले |
| श्रीं नं श्रीं नं श्रीं नं नमः | वाम-पादाङ्गुल्यग्रे |
| श्रीं पं श्रीं पं श्रीं पं नमः | दक्षपार्श्वे |
| श्रीं फं श्रीं फं श्रीं फं नमः | वामपार्श्वे |
| श्रीं बं श्रीं बं श्रीं वं नमः | पृष्ठे |
| श्रीं भं श्रीं भं श्रीं भं नमः | नाभौ |
| श्रीं मं श्रीं मं श्रीं मं नमः | उदरे |
| श्रीं यं श्रीं यं श्रीं यं नमः त्वगात्मने नमः | हृदि |
| श्रीं रं श्रीं रं श्रीं रं नमः असृगात्मने नमः | दक्षांसे |
| श्रीं लं श्रीं लं श्रीं लं नमः मांसात्मने नमः | ककुदि |
| श्रीं वं श्रीं वं श्रीं वं नमः मेदआत्मने नमः | वामांसे |
| श्रीं शं श्रीं शं श्रीं शं नमः अस्थ्यात्मने नमः | हृदयादिदक्षहस्तान्तम् |
| श्रीं षं श्रीं षं श्रीं षं नमः मज्जात्मने नमः | हृदयादिवामहस्तान्तम् |
| श्रीं सं श्रीं सं श्रीं सं नमः शुक्रात्मने नमः | हृदयादिदक्षपादान्तम् |



| | |
|---|---|
| श्रीं हं श्रीं हं श्रीं हं नमः आत्मने नमः | हृदयादिवामपादान्तम् |
| श्रीं ळं श्रीं ळं श्रीं ळं नमः परमात्मने नमः | जठरे |
| श्रीं क्षं श्रीं क्षं श्रीं क्षं नमः प्राणात्मने नमः | हृदयादिमस्तकान्तम् |

**३—परात्परातीतान्यासः —**

| | |
|---|---|
| क्लीं अं क्लीं अं क्लीं अं नमः | ललाटे |
| क्लीं आं क्लीं आं क्लीं आं नमः | मुखवृत्ते |
| क्लीं इं क्लीं इं क्लीं इं नमः | दक्षनेत्रे |
| क्लीं ईं क्लीं ईं क्लीं ईं नमः | वामनेत्रे |
| क्लीं उं क्लीं उं क्लीं उं नमः | दक्षकर्णे |
| क्लीं ऊं क्लीं ऊं क्लीं ऊं नमः | वामकर्णे |
| क्लीं ऋं क्लीं ऋं क्लीं ऋं नमः | दक्षनासायाम् |
| क्लीं ॠं क्लीं ॠं क्लीं ॠं नमः | वामनासायाम् |
| क्लीं लृं क्लीं लृं क्लीं लृं नमः | दक्षकपोले |
| क्लीं ॡं क्लीं ॡं क्लीं ॡं नमः | वामकपोले |
| क्लीं एं क्लीं एं क्लीं एं नमः | ऊर्ध्वोष्ठे |
| क्लीं ऐं क्लीं ऐं क्लीं ऐं नमः | अधरोष्ठे |
| क्लीं ओं क्लीं ओं क्लीं ओं नमः | ऊर्ध्वदन्तपङ्क्तौ |
| क्लीं औं क्लीं औं क्लीं औं नमः | अधोदन्तपङ्क्तौ |
| क्लीं अं क्लीं अं क्लीं अं नमः | मूर्धनि |
| क्लीं अः क्लीं अः क्लीं अः नमः | मुखे |
| क्लीं कं क्लीं कं क्लीं कं नमः | दक्षिणबाहुमूले |
| क्लीं खं क्लीं खं क्लीं खं नमः | दक्षिणकूर्परे |
| क्लीं गं क्लीं गं क्लीं गं नमः | दक्षिणमणिबन्धे |
| क्लीं घं क्लीं घं क्लीं घं नमः | हस्ताङ्गुलिमूले |
| क्लीं ङं क्लीं ङं क्लीं ङं नमः | दक्षिणहस्तांगुल्यग्रे |
| क्लीं चं क्लीं चं क्लीं चं नमः | वामबाहुमूले |
| क्लीं छं क्लीं छं क्लीं छं नमः | वामकूर्परे |
| क्लीं जं क्लीं जं क्लीं जं नमः | वाम-मणिबन्धे |
| क्लीं झं क्लीं झं क्लीं झं नमः | वाम-हस्ताङ्गुलिमूले |
| क्लीं ञं क्लीं ञं क्लीं ञं नमः | वाम-हस्ताङ्गुल्यग्रे |
| क्लीं टं क्लीं टं क्लीं टं नमः | दक्षिण पादमूले |
| क्लीं ठं क्लीं ठं क्लीं ठं नमः | ,, जानुनि |

क्लीं डं क्लीं डं क्लीं डं नमः ,, गुल्फे
क्लीं ढं क्लीं ढं क्लीं ढं नमः दक्षिण पादाङ्गुलिमूले
क्लीं णं क्लीं णं क्लीं णं नमः ,, पादाङ्गुल्यग्रे
क्लीं तं क्लीं तं क्लीं तं नमः वाम-पादमूले
क्लीं थं क्लीं थं क्लीं थं नमः वाम-जानुनि
क्लीं दं क्लीं दं क्लीं दं नमः वाम-गुल्फे
क्लीं धं क्लीं धं क्लीं धं नमः वाम-पादाङ्गुलिमूले
क्लीं नं क्लीं नं क्लीं नं नमः वाम-पादाङ्गुल्यग्रे
क्लीं पं क्लीं पं क्लीं पं नमः दक्षपार्श्वे
क्लीं फं क्लीं फ क्लीं फं नमः वाम-पार्श्वे
क्लीं बं क्लीं बं क्लीं बं नमः पृष्ठे
क्लीं भं क्लीं भं क्लीं भं नमः नाभौ
क्लीं मं क्लीं मं क्लीं मं नमः उदरे
क्लीं यं क्लीं यं क्लीं यं नमः त्वगात्मने नमः, हृदि
क्लीं रं क्लीं रं क्लीं रं नमः असृगात्मने नमः, दक्षांसे
क्लीं लं क्लीं लं क्लीं लं नमः मांसात्मने नमः, ककुदि
क्लीं वं क्लीं वं क्लीं वं नमः मेदआत्मने नमः वामांसे
क्लीं शं क्लीं शं क्लीं शं नमः अस्थ्यात्मने नमः हृदयादिदक्षहस्तान्तम्
क्लीं षं क्लीं षं क्लीं षं नमः मज्जात्मने नमः, हृदयादिवामहस्तान्तम्
क्लीं सं क्लीं सं क्लीं सं नमः शुक्रात्मने नमः, हृदयादिदक्षपादान्तम्
क्लीं हं क्लीं हं क्लीं हं नमः आत्मने नमः, हृदयादिवामपादान्तम्
क्लीं ळं क्लीं ळं क्लीं ळं नमः परमात्मने नमः, जठरे
क्लीं क्षं क्लीं क्षं क्लीं क्षं नमः प्राणात्मने नमः, हृदयादिमस्तकान्तम्

**४– चित्परा-न्यासः**

अस्य श्रीपरात्परालीलान्यासमन्त्रस्य०

ह्लीं अं ह्लीं अं ह्लीं अं नमः ललाटे
ह्लीं आं ह्लीं आं ह्लीं आं नमः मुखवृत्ते
ह्लीं इं ह्लीं इं ह्लीं इं नमः दक्षनेत्रे
ह्लीं ईं ह्लीं ईं ह्लीं ईं नमः वामनेत्रे
ह्लीं उं ह्लीं उं ह्लीं उं नमः दक्षकर्णे
ह्लीं ऊं ह्लीं ऊं ह्लीं ऊं नमः वामकर्णे
ह्लीं ऋं ह्लीं ऋं ह्लीं ऋं नमः दक्षनासायाम्



ह्लीं ॠं ह्लीं ॠं ह्लीं ॠं नमः वामनासायाम्
ह्लीं ऌं ह्लीं ऌं ह्लीं ऌं नमः दक्षकपोले
ह्लीं ॡं ह्लीं ॡं ह्लीं ॡं नमः वामकपोले
ह्लीं एं ह्लीं एं ह्लीं एं नमः ऊर्ध्वोष्ठे
ह्लीं ऐं ह्लीं ऐं ह्लीं ऐं नमः अधरोष्ठे
ह्लीं ओं ह्लीं ओं ह्लीं ओं नमः ऊर्ध्वदन्तपङ्क्तौ
ह्लीं ओं ह्लीं औं ह्लीं औं नमः अधोदन्तपङ्क्तौ
ह्लीं अं ह्लीं अं ह्लीं अं नमः मूर्धनि
ह्लीं अः ह्लीं अः ह्लीं अः नमः मुखे
ह्लीं कं ह्लीं कं ह्लीं कं नमः दक्षिणबाहुमूले
ह्लीं खं ह्लीं खं ह्लीं खं नमः ,, कूर्परे
ह्लीं गं ह्लीं गं ह्लीं गं नमः ,, मणिबन्धे
ह्लीं घं ह्लीं घं ह्लीं घं नमः दक्षिणहस्ताङ्गुलिमूले
ह्लीं ङं ह्लीं ङं ह्लीं ङं नमः ,, हस्ताङ्गुल्यग्रे
ह्लीं चं ह्लीं चं ह्लीं चं नमः वाम — बाहुमूले
ह्लीं छं ह्लीं छं ह्लीं छं नमः ,, कर्पूरे
ह्लीं जं ह्लीं जं ह्लीं जं नमः ,, मणिबन्धे
ह्लीं झं ह्लीं झं ह्लीं झं नमः वामहस्ताङ्गुलिमूले
ह्लीं ञं ह्लीं ञं ह्लीं ञं नमः ,, हस्ताङ्गुल्यग्रे
ह्लीं टं ह्लीं टं ह्लीं टं नमः दक्षिण —पादमूले
ह्लीं ठं ह्लीं ठं ह्लीं ठं नमः ,, जानुनि
ह्लीं डं ह्लीं डं ह्लीं डं नमः ,, गुल्फे
ह्लीं ढं ह्लीं ढं ह्लीं ढं नमः ,, पादाङ्गुलिमूले
ह्लीं णं ह्लीं णं ह्लीं णं नमः ,, पादाङ्गुल्यग्रे
ह्लीं तं ह्लीं तं ह्लीं तं नमः वाम — पादमूले
ह्लीं थं ह्लीं थ ह्लीं थं नमः ,, जानुनि
ह्लीं दं ह्लीं दं ह्लीं दं नमः ,, गुल्फे
ह्लीं धं ह्लीं ध ह्लीं धं नमः ,, पादाङ्गुलिमूले
ह्लीं नं ह्लीं न ह्लीं न नमः ,, पादाङ्गुल्यग्रे
ह्लीं प ह्लीं प ह्लीं पं नमः दक्षपार्श्वे
ह्लीं फ ह्लीं फ ह्लीं फ नमः वामपार्श्वे
ह्लीं ब ह्लीं ब ह्लीं बं नमः पृष्ठे
ह्लीं भ ह्लीं भं ह्लीं भ नमः नाभौ

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ह्रीं | मं | ह्रीं | मं | ह्रीं | मं | नमः | उदरे |
| ह्रीं | यं | ह्रीं | यं | ह्रीं | यं | नमः त्वगात्मने नमः, | हृदि |
| ह्रीं | रं | ह्रीं | रं | ह्रीं | रं | नमः असृगात्मने नमः, | दक्षांसे |
| ह्रीं | लं | ह्रीं | लं | ह्रीं | लं | नमः मांसात्मने नमः, | ककुदि |
| ह्रीं | वं | ह्रीं | वं | ह्रीं | वं | नमः मेदआत्मने नमः, | वामांसे |
| ह्रीं | शं | ह्रीं | शं | ह्रीं | शं | नमः अस्थ्यात्मने नमः | हृदयादिदक्षहस्तान्तम् |
| ह्रीं | षं | ह्रीं | षं | ह्रीं | षं | नमः मज्जात्मने नमः | हृदयादिवाम-हस्तान्तम् |
| ह्रीं | सं | ह्रीं | सं | ह्रीं | सं | नमः शुक्रात्मने नमः | हृदयादिदक्षपादान्तम् |
| ह्रीं | हं | ह्रीं | हं | ह्रीं | हं | नमः आत्मने नमः | हृदयादिवामपादान्तम् |
| ह्रीं | ळं | ह्रीं | ळं | ह्रीं | ळं | नमः परमात्मने नमः | जठरे |
| ह्रीं | क्षं | ह्रीं | क्षं | ह्रीं | क्षं | नमः प्राणात्मने नमः, | हृदयादिमस्तकान्तम् |

**५–चित्परात्परा-न्यासः—**

ऐं ह्रीं ॠं ॠं ऌं ॡं ऐं ह्रीं ॠं ॠं ऌं ॡं ऐं ह्रीं ॠं ॠं ऌं ॡं नमः(ललाटे)

अनेनैव मन्त्रेण ललाटाद्यङ्गेषु न्यासान् कुर्यात् ।

**६–चित्परात्परातीता-न्यासः—**

ऐं ह्रीं श्रीं ऐं ह्रीं अं ऐं ह्रीं श्रीं ऐं ह्रीं अं ऐं ह्रीं श्रीं ऐं ह्रीं अं नमः ललाटे

| | | | | | |
|---|---|---|---|---|---|
| ५ | आं | ५ | आं | ५ | आं नमः मुखवृत्ते |
| ,, | इं | ,, | इं | ,, | इं नमः |
| ,, | ईं | ,, | ईं | ,, | ईं नमः |
| ,, | उं | ,, | उं | ,, | उं नमः |
| ,, | ऊं | ,, | ऊं | ,, | ऊं नमः |
| ,, | ऋं | ,, | ऋं | ,, | ऋं नमः |
| ,, | ॠं | ,, | ॠं | ,, | ॠं नमः |
| ,, | ऌं | ,, | ऌं | ,, | ऌं नमः |
| ,, | ॡं | ,, | ॡं | ,, | ॡं नमः |
| ,, | एं | ,, | एं | ,, | एं नमः |
| ,, | ऐं | ,, | ऐं | ,, | ऐं नमः |
| ,, | ओं | ,, | ओं | ,, | ओं नमः |
| ,, | औं | ,, | औं | ,, | औं नमः |



**ऐं ह्रीं श्रीं ऐं ह्रीं अं ऐं ह्रीं श्रीं ऐं ह्रीं अं ऐं ह्रीं श्रीं ऐं ह्रीं अं नमः**

| | | | | | |
|---|---|---|---|---|---|
| ५ | अः | ५ | अः | ५ | अः नमः |
| ,, | कं | ,, | कं | ,, | कं नमः |
| ,, | खं | ,, | खं | ,, | खं नमः |
| ,, | गं | ,, | गं | ,, | गं नमः |
| ,, | घं | ,, | घं | ,, | घं नमः |
शुभमस्तु सर्वदा।

ॐ फ्रें ख्फ्रें ध्रीं स्त्रीं हस् ख्फ्रे भगवति गुह्यकालि स्वाहा।

इति गुह्यकालिकादेव्याः कुल्लुका।

इति उत्तराम्नायः।

## श्रीकुब्जिका-कवचमाला-मन्त्रस्तोत्रम्

**देव्युवाच—**

हिमाद्रिशिखरे रम्ये, सुखासीनं त्रिलोचनम्।
तोषयित्वा महाघोरैस्तपोभिरति-दुष्करैः ॥ १ ॥
सर्वज्ञ! भक्तिसुलभ! शरणागत-वत्सल।
बिना न्यासेन तपसा, विना ध्यान-जपादिभिः ॥ २ ॥
कथं तुष्टा भवेत् कुब्जा, कुलाकुल-विभेदिनी।
केन रक्षा भवेन्नृणां, साधकानां विशेषतः ॥ ३ ॥
वक्तुमर्होऽसि तत्त्वेन, षट्त्रिंशत् कृपामयि!।

**श्रीभैरव उवाच—**

शृणु देवि! प्रवक्ष्यामि, कुब्जिका-कवचं महत् ॥ ४ ॥
यन्न कस्यचिदाख्यातं, तव स्नेहाद् ब्रवीम्यहम्।
मेरु-सन्तान-सम्भूता, सत्य-प्रस्तारविस्तृता ॥ ५ ॥
शिव-शक्ति-प्रभेदेन, द्वात्रिंशत् कुब्जिका मता।
बलया षड्विधो मन्त्रो, मन्त्र-प्राणोऽप्यनेकधा ॥ ६ ॥
पुरा नैव मया प्रोक्तं, कवचं शृणु सुन्दरि!।

**विनियोगः—**

अस्य श्रीकुब्जिका-मन्त्रकवचस्य त्रिलोचन ऋषिः, अनुष्टुप् छन्दः, श्रीगुह्यकुब्जिका परमेश्वरी देवता, नवात्मा बीजं, समया शक्तिः, बीजं कीलकं, मम श्रीकुब्जिकाप्रसादद्वारा चतुर्विधपुरुषार्थसिद्ध्यर्थं शरीररक्षणार्थे जपे विनियोगः।

ऋष्यादिन्यासः—

त्रिलोचनर्षये नमः शिरसि, अनुष्टुप्छन्दसे नमः मुखे
श्रीगुह्यकुब्जिका परमेश्वरी देवतायै नमः हृदये
नवात्मबीजाय नमः गुह्ये, समयाशक्तये नमः पादयोः
कीलकाय नमः नाभौ, विनियोगाय नमः सर्वाङ्गे
मूलेन कर-षडङ्गन्यासान् कुर्यात् ।

**सृष्टिवक्त्रकुब्जिका**–(पश्चिमाम्नाये)—

देवीं ध्यायेद् वक्त्रकुब्जां, प्रभाते साधकोत्तमः ।
स्वच्छन्दभैरवयुतां, पञ्चवक्त्रां परां शिवाम् ।। १ ।।
दिव्यतेजोमयीमम्बां, पश्चिमाम्नाय-मार्गतः ।
पश्चिमाम्नायमाश्रित्य, सम्यगाप्ताक्रमो नरः ।। २ ।।
स पूजयेदघोराख्यां, कुब्जिकां तु षडाननाम् ।
पञ्चवक्त्रं दशभुजं, त्रिपञ्चनयनोज्ज्वलम् ।। ३ ।।
गोक्षीरधवलं पूर्वं, दक्षिणे कृष्णसन्निभम् ।
उत्तरे रक्तवर्णं च, पश्चिमे कनकप्रभम् ।। ४ ।।
ऊर्ध्ववक्त्रं स्फाटिकाभं, प्रत्यालीढपदस्थितम् ।
कपर्दस्थभालचन्द्रं, श्वेताङ्गं सर्पभूषणम् ।। ५ ।।
नागकुण्डलिनं देवं, गले वासुकिधारिणम् ।
हस्तपादधृतव्यालं, व्यालयज्ञोपवीतिनम् ।। ६ ।।
स्थूलाङ्गं मुण्डमालाढ्यं, व्याघ्रचर्मावृतं कटौ ।
नानाभरणभूषाङ्गं, डमरूं तर्जनीं मणिम् ।। ७ ।।
दधानमङ्कुशं खड्गं, वरदं चापि सव्यतः ।
वामे खड्वाङ्गपद्माक्षनागपाशांस्तथैव च ।। ८ ।।
मुण्डं पात्रं च दधतं, द्वात्रिंशन्मन्त्रबीजकम् ।
वह्नि नाभिस्थिताम्भोजे, वृषभासनसंस्थितम् ।। ९ ।।
महातेजं महेशानं, सर्वलक्षणसंयुतम् ।
स्वच्छन्दभैरवं देवं, भैरवीं सहसंयुताम् ।।१०।।
परापरकलारूपामूर्ध्वं कुब्जेश्वरीमुखम् ।
पूर्ववक्त्रं तडित्प्रख्यं, सिद्धियोगेश्वरीमतम् ।।११।।
दक्षिणे कालिकावक्त्रमुमाख्यं पश्चिमे मतम् ।
उत्तरे तु महालक्ष्मीमुखं स्फटिकसुप्रभम् ।।१२।।



पाशाङ्कुशधनुर्बाण - चन्द्रहास - कपालकम् ।
कपालपात्रमुद्राख्य - वरदाभय - शोभितम् ।।१३।।
दिग्भुजामिन्दुमुकुटां, कुब्जिकेश्वरराधिताम् ।
ईडे सकलसम्पत्त्यै, पश्चिमाम्नाय - देवताम् ।।१४।।

'लमलवरयीं'-कुमारी कुब्जिका पातु, मूलाधारकुलं मम ।
'वमलवरयीं'–महती समया पातु, स्वाधिष्ठानं सदा मम ।।१५।।
'रमलवरयीं'–पातु सौदामिनी कुब्जा, मणिपूरं सदा मम ।
'यमलवरयीं'–हंसेश्वरी महाकुब्जा, हृदयं मम रक्षतु ।।१६।।
'कमलवरयीं'–सर्वेश्वरी च या कुब्जा, विशुद्धं परिरक्षतु ।
'ममलवरयीं'–चित्परा कुब्जिका पातु, ममाज्ञाचक्रमन्वहम् ।।१७।।
'हमलवरयीं'–व्योमातीता महाकुब्जा, लम्बिकां पातु मे सदा ।
कुलालिकेति या कुब्जा, ललाटं पातु मेऽनिशम् ।।१८।।
'हसौं'– नीलकुब्जेति या ख्याता, मस्तकं परिरक्षतु ।
सन्तानकुब्जिका पातु, मम मस्तकमन्वहम् ।।१९।।
मन्थानभैरवी कुब्जा, मूर्धानं परिरक्षतु ।
श्मशानभैरवी कुब्जा, बिन्दुस्थानं सदाऽवतु ।।२०।।
अघोरभैरवी कुब्जा, नादस्थाने सदाऽवतु ।
या गुह्यकुब्जिका प्रोक्ता, प्रधाना बलिभाषिणी ।।२१।।
सा योगिनी गणाध्यक्षा, नादान्ते माऽभिरक्षतु ।
बृहत्- कुब्जा महादेवी, कलास्थानं च रक्षतु ।।२२।।
बृहत्तरी च या कुब्जा, कलातीतं सदाऽवतु ।
मम सिद्धिं प्रयच्छन्तु, एताः षोडश कुब्जिकाः ।।२३।।
षड्भ्यो मे षडङ्गानि, पातु वीरेन्द्र-वन्दिता ।
चण्डिका चरणं पातु, प्रपदं पातु चर्चिका ।।२४।।
अङ्गुलीर्मालिनी पातु, पातु गुल्फं भगेश्वरी ।
जङ्घां रक्षतु चामुण्डा, जानुनी पातु वेगिनी ।।२५।।
ऊरू रक्तेश्वरी पातु, कटिं पातु कृशोदरी ।
गुह्यं गुह्येश्वरी पातु, नाभिकन्दं नभेश्वरी ।।२६।।

हृदयं पातु चामुण्डा, स्तनौ पातु यशस्विनी ।
रक्तनेत्रा सदा पातु, पार्श्वयुग्मं त्रिलोचना ।।२७।।

वृषणौ पातु मे घोरा, अघोरा च कराङ्गुलीः ।
कुब्जा करतलं पातु, मणिबन्धे च मोहिनी ।।२८।।

उग्रचण्डा प्रकोष्ठे च, कुलचण्डा च कूर्परे ।
पातु मे बाहुमूलं तु, महोग्रचण्डिका सदा ।।२९।।

रक्तप्रिया तथा पातु, हस्तयुग्मं सदा मम ।
स्कन्धिनी स्कन्धमूलञ्च, कण्ठं कामारिवल्लभा ।।३०।।

चिबुकं कौलिनी पातु, मुखं रक्तमुखी मम ।
तारस्वरूपिणी पातु, अधरोष्ठं सदा मम ।।३१।।

बलिनी पातु मे दन्तान्, जिह्वां रक्षतु जिह्विनी ।
चिन्तासंहारिणी पातु, ऊर्ध्वमोष्ठं सदा मम ।।३२।।

हनुं मांसाशिनी पातु, जिह्वामूलं सुराशिनी ।
वह्निगर्भा सदा पातु, नासिकाविवरं मम ।।३३।।

सर्पकुण्डलिनी पातु, सर्वदा श्रवणद्वयम् ।
लोचने लोहिता पातु, मदाघूर्णित-लोचना ।।३४।।

भ्रूमध्यं पान्तु शाकिन्यो, याकिन्यः पान्तु मस्तकम् ।
भैरवाः पान्तु सर्वाङ्गे, योगिन्यश्चास्थिसन्धिषु ।।३५।।

रोमकूपे च वज्राङ्गी, वज्ररूपा महाबला ।
त्वचं रक्षतु वाराही, पथि रक्षतु पार्वती ।।३६।।

खेचरी गगने पातु, भूचरी पातु भूतले ।
दिवा रक्षतु गायत्री, निशि नक्तञ्चरी च माम् ।।३७।।

दिक्षु दिगम्बरी पातु, सर्वदा पातु शङ्करी ।
पर्वतेषु सदा पातु, मेरुशृङ्गनिवासिनी ।।३८।।

वह्नौ ज्यतिष्मती पातु, विषाद् रक्षतु वासुकी ।
सङ्ग्रामे विजया पातु, शत्रुमध्येऽस्थिमालिनी ।।३९।।

जया राजकुले पातु, सभायां नीतिवल्लभा ।
विद्या जागरणे पातु, स्वप्ने पातु हिरण्मयी ।।४०।।
प्रज्ञावती सुषुप्तौ च, तुर्यं च विमलाऽवतु ।
निर्वाणरूपिणी पातु, तुर्य्यातीतं ममाऽनिशम् ।।४१।।



[1]रक्ष मां कुब्जिके देवि, रक्ष मां कुब्जिकेश्वरि ।
रक्ष रक्ष महादेवि, अस्मदीयमिदं वपुः ।।४२।।

कुलद्वीपेति विख्याता, कैलाशशिखरालये ।
सा कुब्जिका महामाया, स्थातु श्रीर्मस्तके मम ।।४३।।

या खर्वेति समाख्याता, गन्धमादनवासिनी । रक्ष मां.....मस्तके ।।४४।।
बिन्दुरूपेति विख्याता, मेरुमण्डलवासिनी । ,, ।।४५।।
महोदरीति विख्याता, श्मशानालयवासिनी । ,, ।।४६।।
मादिनीति समाख्याता, अकाराक्षरमालिनी । अं नमः ,, ।।४७।।
ग्रसनीति प्रसिद्धा या, आकाराक्षरमालिनी । आं नमः ,, ।।४८।।
ऋषिवृन्देति या गीता, ऋषिस्था ऋषिमानिता । इं नमः ,, ।।४९।।
प्रतिष्ठेति समाख्याता, प्रतिष्ठास्था प्रतिष्ठिता । ईं नमः ,, ।।५०।।
विद्येश्वरीति या प्रोक्ता, विद्याविद्ये प्रतिष्ठिता । उं नमः ,, ।।५१।।
शान्तेति गीयते या च, शान्तिरूपे प्रतिष्ठिता । ऊं नमः ,, ।।५२।।
चामुण्डेति प्रसिद्धा या, प्रसिद्धाख्या प्रतिष्ठिता । ऋं नमः ,, ।।५३।।
वशिनीति समाख्याता, वशिन्यपि प्रतिष्ठिता । ॠं नमः ,, ।।५४।।
नारायणीति विख्याता, नारायणसमर्हिता । ऌं ,, ,, ।।५५।।
मोहिनीति समाख्याता, मोहिनीं प्रति संस्थिता । ॡं ,, ,, ।।५६।।
प्रशस्तिरिति या गीता, प्रशस्तिस्था प्रतिष्ठिता । एं ,, ,, ।।५७।।
गुहाशक्तिरिति ख्याता, गुह्यस्था परिकीर्तिता । ऐं ,, ,, ।।५८।।
मन्त्रनीति-प्रसिद्धा या, मन्त्ररूपा प्रतिष्ठिता । ओं नमः ,, ।।५९।।
त्रिकूटेति समाख्याता, त्रिकूटप्रतिसंस्थिता । औं नमः ,, ।।६०।।
कालिकेति प्रसिद्धार्था, कलिरूपेण संस्थिता । अं नमः ,, ।।६१।।
शम्भुना बिन्दुरूपस्था, बिन्दुरूपा प्रकीर्तिता । अः नमः ,, ।।६२।।
विसर्गाक्षर-मालिन्यां, शिवेति कथिता च या । नमः ,, ।।६३।।
मञ्जुघोषेति या प्रोक्ता, ककाराक्षरमालिनी । कं नमः ,, ।।६४।।
ऐङ्कारी चैव या प्रोक्ता, विश्वयोनिरितीरिता । खं नमः ,, ।।६५।।
महामायेति विख्याता, विश्वमाया प्रतिष्ठिता । गं नमः ,, ।।६६।।
वागीश्वरीति विख्याता, वागीशत्वे प्रतिष्ठिता । घं नमः ,, ।।६७।।
शिखिवाहेति विख्याता, शिखिरूपा प्रतिष्ठिता । ङं नमः ,, ।।६८।।
बिभीषणीति विख्याता, बिभीषण-प्रतिष्ठिता । चं नमः ,, ।।६९।।

१ इदं पद्यद्वयं ४२, ४३ संख्यात्मकं सर्वत्र योज्यम् ।

वायुवेगेति या गीता, वायुसंस्था-प्रतिष्ठिता । छं नमः ,, ॥७०॥
कुलमालेति विख्याता, कुलस्था कुलमार्गणी । जं नमः ,, ॥७१॥
विनायकेति विख्याता, विनायके प्रतिष्ठिता । झं नमः ,, ॥७२॥
पूर्णिमेति प्रसिद्धा या, पूर्णिमायां प्रतिष्ठिता । ञं नमः ,, ॥७३॥
शुभकरीति विख्याता, शुभदा सुप्रतिष्ठिता । टं नमः ,, ॥७४॥
क्रोधिनीति समाख्याता, क्रोधस्था च प्रतिष्ठिता । ठं नमः ,, ॥७५॥
दीपिनी त्रिपुरा गीता, दीपिताङ्गी सुसंस्थिता । डं नमः ,, ॥७६॥
जयन्तीति समाख्याता, जयं देहि जयप्रदा । ढं नमः ,, ॥७७॥
कपालिनीति या गीता, कपालस्था शुभप्रदा । णं नमः ,, ॥७८॥
भवानीति समाख्याता, भवरूपा प्रतिष्ठिता । तं नमः ,, ॥७९॥
अम्बिकेति समाख्याता, अम्बिनी परिसंस्थिता । थं नमः ,, ॥८०॥
सर्वात्मिकेति विख्याता, सर्वस्था सर्वरूपिणी । दं नमः ,, ॥८१॥
इच्छेति या समादिष्टा, इच्छायां सम्प्रतिष्ठिता । धं नमः ,, ॥८२॥
छागलीति च या गीता, छागस्था सुप्रतिष्ठिता । नं नमः ,, ॥८३॥
पूतनेति प्रसिद्धा या, पूतस्था पूतसंस्थिता । पं नमः ,, ॥८४॥
अमोघेति च विख्याता, अमोघे या प्रतिसंस्थिता । फं नमः ,, ॥८५॥
लम्बोदरीति विख्याता, लम्बमाना प्रतिष्ठिता । बं नमः ,, ॥८६॥
संहारिणीति विख्याता, संहारप्रतिसंस्थिता । भं नमः ,, ॥८७॥
महाकालीति विख्याता, महाकाल-प्रतिष्ठिता । मं नमः ,, ॥८८॥
कुसुमेति प्रसिद्धा या, कुसुमे सुप्रतिष्ठिता । यं नमः ,, ॥८९॥
शुक्लेश्वरीति या प्रोक्ता, शुक्लस्था प्रतिसंस्थिता । रं नमः ,, ॥९०॥
सबलेति च या गीता, बलस्थेति प्रतिष्ठिता । लं नमः ,, ॥९१॥
या चोग्रतारका प्रोक्ता, तारस्था प्रतिसंस्थिता । वं नमः ,, ॥९२॥
ज्ञानशक्तिरिति ख्याता, ज्ञानस्था प्रतिसंस्थिता । शं नमः ,, ॥९३॥
क्रियाशक्तिरिति ख्याता, क्रियास्थान-प्रतिष्ठिता । षं नमः ,, ॥९४॥
गायत्रीति प्रसिद्धा सा, गायत्री वेदमातृका । सं नमः ,, ॥९५॥
सावित्रीति समाख्याता, सारभूता समाश्रिता । हं नमः ,, ॥९६॥
सरस्वतीति विख्याता, शारदा प्रतिसंस्थिता । ळं नमः ,, ॥९७॥
मालिनीति कुलाध्यक्षा, क्षकाराक्षर-मालिनी । क्षं नमः ,, ॥९८॥

ब्रह्माणी पूर्वतः पातु, अग्निकोणे महेश्वरी ।
कौमारी दक्षिणे स्थातु, वैष्णवी स्थातु नैर्ऋते ॥९९॥
वाराही पश्चिमे पातु, इन्द्राणी वायुमण्डले ।
उत्तरे स्थातु चामुण्डा, लक्ष्मीरीशानकोणके ॥१००॥



ऊर्ध्वदेशे च चक्राङ्गी, अधोभागे च नागिनी ।
सर्वतः पातु विश्वेशी, सर्वदा मां कपालिनी ॥१०१॥

विद्याराजेश्वरी प्रोक्ता, सर्वविद्यादिदेवता ।
सा कुब्जिका महामाया, करोति मम चिन्तितम् ॥१०२॥

या वीरयोगिनी प्रोक्ता, वीराणां सिद्धिदायिनी ।
रक्ताम्बिकेति या प्रोक्ता, बलिरक्तप्रिया समा ॥१०३॥

या कामविजया प्रोक्ता, सर्वकामार्थसिद्धिदा ।
महोच्छिष्टेति विख्याता, महाज्वर-विनाशिनी ॥१०४॥

धर्मादेवीति या प्रोक्ता, सर्वधर्म-विवर्द्धिनी ।
महोत्तरीति विख्याता, महामृत्युविनाशिनी ॥१०५॥

सर्वेशी च प्रसिद्धा सा, सर्वस्फोटकनाशिनी ।
सा कुब्जिका महामाया, स्थातु श्रीमस्तके मम ॥१०६॥

कामोल्लासेति विख्याता, सर्वैश्वर्यप्रदायिनी । साकुब्जिका....मस्तके मम ।१०७
मातङ्गीति प्रसिद्धा या, सर्वलोकवशङ्करी । ,, ॥१०८॥
पौर्णमासीति या प्रोक्ता, सर्वमङ्गलदायिनी । ,, ॥१०९॥
शाम्भवींति च या प्रोक्ता, सर्वशास्त्रप्रबोधिनी । ,, ॥११०॥
पञ्चकेति समाख्याता, सुरद्रुम-निवासिनी । ,, ॥१११॥

महोक्षा मस्तकं पातु, गुह्या गुह्यं सुरक्षतु ।
गोवरा हृदयं मम पातु, रम्भा पातु मम स्तनौ ॥११२॥

शुभा पातु मम श्रोत्रे, साकिनी पातु सृक्किणी ।
काकिनी नाभिकुण्डञ्च, लाकिनी पातु जानुनी ॥११३॥

राकिनी चरणौ पातु, इडां मे पातु डाकिनी ।
हाकिनी पिङ्गलां पातु, सुषुम्नां कुलकुब्जिका ॥११४॥

मित्रा रक्षतु मे गात्रं, चर्चिका पातु मे वपुः ।
सृष्टीश्वरी च पृष्ठं मे, बोधिनी सर्वसन्धिषु ॥११५॥

तीव्रास्थीनि च मे पातु, कौलिनी पातु नाडिका ।
इच्छा रक्षतु मे पुत्रान्, ज्ञानं विद्या ममावतु ॥११६॥

क्रिया रक्षतु मे भार्य्या, कुब्जिका पातु मां सदा ।
ज्येष्ठा रक्षतु सर्वस्वमनुज्येष्ठा च मे श्रियम् ॥११७॥

द्वात्रिंशदक्षराभिज्ञा, महाविद्याधिदेवता ।
सा कुब्जिका महादेवी, निर्वाणं मेऽभिरक्षतु ॥११८॥

इदं हि कवचं पुण्यं, मेरुसन्तानसम्भवम् ।
यः पठेत् परया भक्त्या, तस्य शत्रुभयं कुतः ॥११९॥
त्रिकालमेककालं वा, यः पठेच्च सुसिद्धिदम् ।
तस्य हस्तगता सिद्धिर्नान्यैश्च जपकोटिभिः ॥१२०॥
इदं तु कवचं गुह्यं, पश्चिमादिमुखे निशि ।
दीपे देवीं समाराध्य, जपेदष्टोत्तरं शतम् ॥१२१॥
प्रसन्ना कुब्जिका तस्य, ददाति फलमीप्सितम् ।
रसं रसायनं खण्डं, गुटिकामञ्जनं जयम् ॥१२२॥
अणिमाद्यष्टसिद्धीश्च, पादुकासिद्धिमेव च ।
सर्वं ददाति सन्तुष्टा, कुब्जिका साधकस्य वै ॥१२३॥
इदं तु कवचं देवि, वज्रेणापि न हन्यते ।
त्रिरावृत्त्या तु सप्ताहाद्, बन्धनान्मुच्यते नरः ॥१२४॥
कवचस्यास्य माहात्म्यं, मया वक्तुं न शक्यते ।
कुब्जिकाऽपि महादेवी, तथा जानाति वा न वा ॥१२५॥
एतत्परतरं देवि ! कुब्जा - कवचमुत्तमम् ।
कथितं यन्मया ज्ञातं, गोपनीयं प्रयत्नतः ॥१२६॥
कवचेनावृतो यस्तु, यत्र कुत्रापि सञ्चरेत् ।
न जातु जायते तस्य, भूत-प्रेतादिजं भयम् ॥१२७॥
महारक्षाकरं देवि ! महाभयविनाशनम् ।
महाज्वर - निवारणं, महादारिद्र्य - नाशनम् ॥१२८॥
सर्वपाप - विनिर्मुक्तं, सर्वैश्वर्य - प्रदायकम् ।
सर्वकाम - प्रदं देवि, सर्वव्याधि - निवारणम् ॥१२९॥
ग्रहापस्मार - कुष्ठादि - विष - सर्पादि - भञ्जनम् ।
कवचेनावृतं दृष्ट्वा, चौर-व्याघ्रादिसम्भवम् ॥१३०॥
पलायन्ते तथा भीताः, सिंहं दृष्ट्वा यथा मृगाः ।
भैरवोऽहमिति -- ध्यायन्नयुतं कवचं पठेत् ॥१३१॥
खेचरो जायते देवि ! कुब्जिकायाः प्रसादतः ।
निशीथेऽयुतजापेन, मारयेद् रिपुमण्डलम् ॥१३२॥
रात्रिशेषे तु जप्तेन, सर्वैश्वर्यमवाप्नुयात् ।
पूर्वाक्षरानुसन्धानं, विद्यासु जायते तथा ॥१३३॥



पूर्वाह्णे प्रपठन् मन्त्री, वशीकुर्याज्जगत्त्रयम् ।
मध्याह्नकाले प्रजपन्, स्तम्भयेद् वायुमण्डलम् ॥१३४॥
सन्ध्यासमय-जापेन, शत्रूनुद्घाटयेद् भृशम् ।
कण्ठमात्रोदके स्थित्वा, सम्पश्यन् भानुमण्डले ॥१३५॥
कुब्जिकां मनसि ध्यायन् त्रिकालं कवचं पठेत् ।
सप्ताहाज्जायते मृत्युर्वैरिणां नात्र संशयः ॥१३६॥
क्षितौ भूमौ निशीथे तु, कवचस्यायुतं पठेत् ।
प्रत्यक्षा वरदा देवी, कुब्जिका सुप्रसीदति ॥१३७॥
महाकालयुता रात्रौ, चतुर्दश्यां यतेन्द्रियः ।
कर्मार्चन-विधानेन, पूजयित्वा च कुब्जिकाम् ॥१३८॥
सप्तधावर्तनान्मन्त्री, बन्धनान्मुच्यते नृपः ।
यद्यत्तिष्ठति मे लोके दिवि पातालभूतले ॥१३९॥
तत्सर्वं साधयेदाशु, कवचेनैव साधकः ।
इति ते कथितं देवि, कुब्जिका-कवचं महत् ॥१४०॥
पश्चिमाम्नाय - कुब्जोक्तं, भोग - मोक्ष - प्रदायकम् ।
समासेन सुरेशानि, किं भूयः श्रोतुमिच्छसि ॥१४१॥

इति श्रीमेरुतन्त्रोक्ते पश्चिमाम्नायाद्यप्रस्तारे
श्रीकुब्जिका-कवचमाला-मन्त्रस्तोत्रम् ।

## (क) ६—अथ श्रीविद्या-लघुषोढा-न्यासः

ॐ अस्य श्रीलघुषोढान्यासस्य दक्षिणामूर्तिऋषिर्गायत्रीच्छन्दः, गणेश-ग्रह-नक्षत्र-योगिनी-राशि-पीठस्वरूपिणी श्रीमहात्रिपुरसुन्दरीदेवता श्रीविद्याङ्गत्वेन न्यासे विनियोगः ।

**ऋष्यादिन्यासः** -

श्रीदक्षिणामूर्तये ऋषये नमः--शिरसि । गायत्रीच्छन्दसे नमः–मुखे । गणेश-ग्रह-नक्षत्र-योगिनी-राशि-पीठस्वरूपिण्यै श्रीमहात्रिपुरसुन्दर्यै देवतायै नमः–हृदये । विनियोगाय नमः–सर्वाङ्गे ।

**कर-हृदयादिन्यासः**

| | | (प्रथमवारम्) | (द्वितीयवारम्) |
|---|---|---|---|
| ऐं ह्रीं श्रीं | अं कं खं गं घं ङं आं ऐं | अंगुष्ठाभ्यां नमः | हृदयाय नमः |
| ,, | इं चं छं जं झं ञं ईं क्लां | तर्जनीभ्यां नमः | शिरसे स्वाहा |
| ,, | उं टं ठं डं ढं णं ऊं सौः | मध्यमाभ्यां नमः | शिखायै वषट् |
| ,, | एं तं थं दं धं नं ऐं ऐं | अनामिकाभ्यां नमः | कवचाय हुम् |
| ,, | ओं पं फं बं भं मं औं क्लीं | कनिष्ठिकाभ्यां नमः | नेत्रत्रयाय वौषट् |
| ,, | अंयंरंलंवंशंषंसंहंक्षं अः सौः | करतलकरपृष्ठाभ्यां नमः | अस्त्राय फट् |

**ध्यानम्**—

**उद्यत्सूर्य-सहस्राभां, पीनोन्नत-पयोधराम् ।**
**रक्तमाल्याम्बरालेपां, रक्तभूषण-भूषिताम् ॥१॥**

**पाशाङ्कुशधनुर्बाण - भास्वत्पाणिचतुष्टयाम् ।**
**लसन्नेत्रत्रयां स्वर्ण–मुकुटोद्भासि-मस्तकाम् ॥२॥**

**गणेश-ग्रह-नक्षत्र–योगिनी–राशि-रूपिणीम् ।**
**देवीं पीठमयीं वन्दे, मातृकां सुन्दरीं पराम् ॥३॥**

इति श्रीदेवीं समष्टिरूपेण ध्यात्वा, गणेशादिव्यष्टिरूपेण च ध्यायेत् ।

**१–गणेश-न्यासः**

अस्य श्रीगणेशन्यासमन्त्रस्य गणकऋषिर्निचृद्गायत्रीच्छन्दः, महागणपतिर्देवता मम श्रीविद्याङ्गत्वेन तत्प्रसादसिद्धयर्थे न्यासे विनियोगः ।

**ऋष्यादिन्यासः**

गणकऋषये नमः–शिरसि । निचृद्गायत्रीच्छन्दसे नमः–मुखे । महागणपतिदेवतायै नमः–हृदये । विनियोगाय नमः–सर्वाङ्गे ।

**तरुणादित्यसङ्काशान् गजवक्त्रांस्त्रिलोचनान् ।**
**पाशाङ्कुशवराभीतिकरान् शक्तिसमन्वितान् ॥**
**ते तु सिन्दूरवर्णाभाः सर्वालङ्कारभूषिताः ।**
**एकहस्तधृताम्भोजा इतरालिङ्गितप्रियाः ॥**

| | | | | |
|---|---|---|---|---|
| 'ऐं ह्रीं श्रीं' | अं | श्रीयुक्ताय विघ्नेशाय | नमः | शिरसि |
| ,, | आं | ह्रींयुक्ताय विघ्नराजाय | ,, | मुखवृत्ते |
| ,, | इं | तुष्टियुक्ताय विनायकाय | ,, | दक्षनेत्रे |
| ,, | ईं | शान्तियुक्ताय शिवोत्तमाय | ,, | वामनेत्रे |
| ,, | उं | पुष्टियुक्ताय विघ्नहृते | ,, | दक्षकर्णे |
| ,, | ऊं | सरस्वतीयुक्ताय विघ्नकर्त्रे | ,, | वामकर्णे |



| | | | | |
|---|---|---|---|---|
| ऐं ह्रीं श्रीं | ऋं | रतियुक्ताय विघ्नराजे | ,, | दक्षनासापुटे |
| ,, | ॠं | मेधायुक्ताय गणनायकाय | ,, | वामनासापुटे |
| ,, | ऌं | कान्तियुक्ताय एकदन्ताय | ,, | दक्षगण्डे |
| ,, | ॡं | कामिनीयुक्ताय द्विदन्ताय | ,, | वामकण्डे |
| ,, | एं | मोहिनीयुक्ताय गजवक्त्राय | ,, | ऊर्ध्वोष्ठे |
| ,, | ऐं | जटायुक्ताय निरञ्जनाय | ,, | अधरोष्ठे |
| ,, | ओं | तीव्रायुक्ताय कपर्दभृते | ,, | ऊर्ध्वदन्तपंक्तौ |
| ,, | औं | ज्वालिनीयुक्ताय दीर्घमुखाय | ,, | अधोदन्तपंक्तौ |
| ,, | अं | नन्दायुक्ताय शङ्कुकर्णाय | ,, | जिह्वाग्रे |
| ,, | अः | सुरसायुक्ताय वृषभध्वजाय | ,, | कण्ठे |
| ,, | कं | कामरुपिणीयुक्ताय गणनाथाय | ,, | दक्षबाहुमूले |
| ,, | खं | सुभ्रूयुक्ताय गजेन्द्राय | ,, | दक्षकूर्परे |
| ,, | गं | जयिनीयुक्ताय शूर्पकर्णाय | ,, | दक्षमणिबन्धे |
| ,, | घं | सत्यायुक्ताय त्रिलोचनाय | ,, | दक्षकराङ्गुलिमूले |
| ,, | ङं | विघ्नेशीयुक्ताय लम्बोदराय | ,, | दक्षकराङ्गुल्यग्रे |
| ,, | चं | सुरूपायुक्ताय महानादाय | ,, | वामबाहुमूले |
| ,, | छं | कामदायुक्ताय चतुर्मूर्तये | ,, | वामकूर्परे |
| ,, | जं | मदविह्वलायुक्ताय सदाशिवाय | ,, | वाममणिवन्धे |
| ,, | झं | विकटायुक्ताय आमोदाय | ,, | वामकराङ्गुलिमूले |
| ,, | ञं | पूर्णायुक्ताय दुर्मुखाय | ,, | वामकराङ्गुल्यग्रे |
| ,, | टं | भूतिदायुक्ताय सुमुखाय | ,, | दक्षोरुमूले |
| ,, | ठं | भूमियुक्ताय प्रमोदाय | ,, | दक्षजानुनि |
| ,, | डं | शक्तियुक्ताय एकपादाय | ,, | दक्षगुल्फे |
| ,, | ढं | रमायुक्ताय द्विजिह्वाय | ,, | दक्षपादाङ्गुलिमूले |
| ,, | णं | मानुषीयुक्ताय शूराय | ,, | दक्षपादाङ्गुल्यग्रे |
| ,, | तं | मकरध्वजायुक्ताय वीराय | ,, | वामोरुमूले |
| ,, | थं | वीरिणीयुक्ताय षण्मुखाय | ,, | वामजानुनि |
| ,, | दं | भ्रुकुटीयुक्ताय वरदाय | ,, | वामगुल्फे |
| ,, | धं | लज्जायुक्ताय वामदेवाय | ,, | वामपादाङ्गुलिमूले |
| ,, | नं | दीर्घघोणायुक्ताय वक्रतुण्डाय | ,, | वामपादाङ्ल्यग्रे |
| ,, | पं | धनुर्धरायुक्ताय द्विरण्डकाय | ,, | दक्षपार्श्वे |
| ,, | फं | यामिनीयुक्ताय सेनान्ये | ,, | वामपार्श्वे |
| ,, | बं | रात्रियुक्ताय ग्रामण्ये | ,, | पृष्ठे |

| | | | |
|---|---|---|---|
| ऐं ह्रीं श्रीं भं | चन्द्रिकायुक्ताय मत्ताय | नमः | नाभौ |
| ,, मं | शशिप्रभायुक्ताय विमत्ताय | ,, | जठरे |
| ,, यं त्वगात्मने | लोलायुक्ताय मत्तवाहनाय | ,, | हृदये |
| ,, रं ,, | चपलायुक्ताय जटिने | ,, | दक्षस्कन्धे |
| ,, लं ,, | ऋद्धियुक्ताय मुण्डिने | ,, | गलपृष्ठे |
| ,, वं ,, | दुर्भगायुक्ताय खङ्गिने | ,, | वामस्कन्धे |
| ,, शं ,, | सुभगायुक्ताय वरेण्याय | ,, | हृदयादिदक्षकरांगुल्यन्तम् |
| ,, षं ,, | शिवायुक्ताय वृषकेतनाय | ,, | हृदयादिवामकराङ्गुल्यन्तम् |
| ,, सं शुक्रात्मने | दुर्गायुक्ताय भक्ष्यप्रियाय | ,, | हृदयादिदक्षपादाङ्गुल्यन्तम् |
| ,, हं जीवात्मने | कालीयुक्ताय गणेशाय | ,, | हृदयादिवामपादङ्गुल्यन्तम् |
| ,, ळं परमात्मने | कालकुब्जिकायुक्ताय मेघनादाय | ,, | हृदयादिगुह्यान्तम् |
| ,, क्षं ज्ञानात्मने | विघ्नहारिणीयुक्ताय गणेश्वराय | ,, | हृदयादिमूर्धान्तम् |

**अथ ग्रहन्यासः —**

अस्य श्रीग्रहन्यासस्य कश्यपऋषिः दीधितिच्छन्दः श्रीसूर्यादिनवग्रहस्वरूपिणी श्रीत्रिपुरसुन्दरीदेवता मम श्रीविद्याङ्गत्वेन न्यासे विनियोगः। करहृदयादिन्यासाः— स्त्रां, स्त्रीं, स्त्रूं, स्त्रैं, स्त्रौं, स्त्रः, इति।

**रक्तं श्वेतं तथा रक्तं श्यामं पीतं च पाण्डुरम्।**
**कृष्णं धूम्र-धूम्रं भावये रविपूर्वकान्॥**
**कामरुपधरान्देवान् दिव्याभरणभूषितान्।**
**वामोरुन्यस्तहस्तांश्च दक्षहस्तवरप्रदान्॥**
**शक्तीरपि तथा वन्दे वराभयकराम्बुजाः।**
**स्वस्वप्रियांकनिलयाः सर्वाभरणभूषिताः॥**

ऐं ह्रीं श्रीं अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः रेणुकायुक्ताय सूर्याय नमः हृदयाधः हृज्जठरसन्धौ

| | | | |
|---|---|---|---|
| यं रं लं वं | अमृतायुक्ताय चन्द्राय | नमः | भ्रूमध्ये |
| कं खं गं घं ङं | धमयुक्ताय भौमाय | ,, | नेत्रयोः |
| चं छं जं झं ञं | यशस्विनीयुक्ताय बुधाय | ,, | श्रोत्रकूपाधः |
| टं ठं डं ढं णं | शांकरीयुक्ताय बृहस्पतये | ,, | कण्ठे |
| तं थं दं धं नं | ज्ञानरुपायुक्ताय शुक्राय | ,, | हृदि |
| पं फं बं भं मं | शक्तियुक्ताय शनैश्चराय | ,, | नाभौ |
| शं षं सं हं | कृष्णायुक्ताय राहवे | ,, | मुखे |
| ळं क्षं | धूम्रायुक्ताय केतवे | ,, | गुदे |



**अथनक्षत्रन्यासः—**

ॐ अस्य श्रीनक्षत्रन्यासस्य दक्षिणामूर्तिऋषिर्गायत्रीछन्दोनक्षत्रस्वरुपिणी श्रीमहात्रिपुरसुन्दरी देवता मम श्रीविद्याङ्गत्वेन न्यासे विनियोगः। ॐ वषट् पूर्वकं अं आं, इं ईं, उऊं, एं ऐं, ओं औं, अं अः इतिन्यासाः।

**ज्वलत्कालानलप्रख्या वरदाभयपाणयः।**
**वन्देऽहमश्विनीपूर्वाः सर्वाभरणभूषिताः॥**

| | | | |
|---|---|---|---|
| ऐं ह्रीं श्रीं अं आं | अश्विन्यै | नमः | ललाटे |
| ,, इं | भरण्यै | ,, | दक्षनेत्रे |
| ,, ईं उं ऊं | कृत्तिकायै | ,, | वामनेत्रे |
| ,, ऋं ॠं लृं ॡं | रोहिण्यै | ,, | दक्षकर्णे |
| ,, एं | मृगशिरसे | ,, | वामकर्णे |
| ,, ऐं | आर्द्रायै | ,, | दक्षनासापुटे |
| ,, ओं औं | पुनर्वसवे | ,, | वामनासापुटे |
| ,, कं | पुष्याय | ,, | कण्ठे |
| ,, खं गं | अश्लेषायै | ,, | दक्षस्कन्धे |
| ,, घं ङं | मघाय | ,, | वामस्कन्धे |
| ,, चं | पूर्वाफाल्गुन्यै | ,, | पृष्ठे |
| ,, छं जं | उत्तराफाल्गुन्यै | ,, | दक्षकूर्परे |
| ,, झं ञं | हस्ताय | ,, | वामकूर्परे |
| ,, टं ठं | चित्रायै | ,, | दक्षमणिबन्धे |
| ,, डं | स्वात्यै | ,, | वाममणिबन्धे |
| ,, ढं णं | विशाखायै | ,, | दक्षहस्ते |
| ,, तं थं दं | अनुराधायै | ,, | वामहस्ते |
| ,, धं | ज्येष्ठायै | ,, | नाभौ |
| ,, नं पं फं | मूलाय | ,, | कटिबन्धे |
| ,, बं | पूर्वाषाढायै | ,, | दक्षोरौ |
| ,, भं | उत्तराषाढायै | ,, | वामोरौ |
| ,, मं | श्रवणाय | ,, | दक्षजानुनि |
| ,, यं रं | धनिष्ठायै | ,, | वामजानुनि |
| ,, लं | शततारकायै | ,, | दक्षजङ्घायाम् |
| ,, वं शं | पूर्वाभाद्रपदायै | ,, | वामजङ्घायाम् |
| ,, षं सं हं | उत्तराभाद्रपदायै | ,, | दक्षपादे |
| ,, ळं क्षं अं अः | रेवत्यै | ,, | वामपादे |

**अथ योगिनीन्यासः—**

ॐ अस्य श्रीयोगिनीमातृकान्यासस्य दक्षिणामूर्तिऋषिर्गायत्रीछन्दो योगिनीस्वरूपिणी श्रीमहात्रिपुरसुन्दरी देवता मम श्रीविद्याङ्गत्वेन न्यासे विनियोगः ।

**कर-हृदयादि न्यासः—**

ॐ यौं हूं फट् । ॐ यीं हूं फट् । ॐ यूं हूं फट्, ॐ यैं हूं फट्, ॐ यौं हूं फट्, ॐ यः हूं फट् । इति ।

**ध्यानम्—**

**कण्ठस्थाने विशुद्धौ नृपदलकमले श्वेतवर्णां त्रिनेत्रां,**
**हस्तैः खट्वाङ्गखड्गौ त्रिशिखमपि महाचर्म सन्धारयन्तीम् ।**
**वक्त्रेणैकेन युक्तां पशुजनभयदां पायसान्नैकसक्तां,**
**त्वक्स्थां वन्देऽमृताद्यैः परिवृतवपुषं डाकिनीं वीरवन्द्याम् ॥**

इति ध्यात्वा—

ऐं ह्रीं श्रीं विशुद्धस्थाने षोडशदलकमलकर्णिकायां ऐं ह्रीं श्रीं डां डीं डूं डमलवरयूं डाकिनि मां रक्ष रक्ष मम त्वग्धातुभागान् रक्ष २ सर्वसत्त्ववशङ्करि देव्यागच्छागच्छ इमां पूजां गृह्ण २ ऐं घोरे देवि ह्रीं सः परमघोरे हूं घोररूपे एह्येहि नमश्चामुण्डे डरलकसह ऐं श्रीमहात्रिपुरसुन्दरि वरदे विच्चे देवि अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः विशुद्धपीठस्थे विशुद्धडाकिनि विशुद्धनाथदेवश्रीपादुकां पूजयामि नमः । (कण्ठे ।)

'ऐं ह्रीं श्रीं' ३ अं अमृतायै नमः । ३ आं आकर्षिण्यै नमः । ३ इं इन्द्राण्यै नमः । ३ ईं ईशान्यै नमः । ३ उं उमायै नमः । ३ ऊं ऊर्ध्वकेश्यै नमः । ३ ऋं ऋद्धिदायै नमः । ३ ॠं ॠकारायै नमः । ३ लृं लृकारयै नमः । ३ लॄं लॄकारायै नमः । ३ एं एकपदायै नमः । ३ ऐं ऐश्वर्यात्मिकायै नमः । ३ ओं ओङ्काराय नमः । ३ औं औषध्यै नमः । ३ अं अम्बिकायै नमः । ३ अः अक्षरायै नमः ।

**हृत्पद्मे भानुपत्र-द्विवदनलसितां दंष्ट्रिणीं श्यामवर्णाम्**
**अक्षं शूलं कपालं डमरुमपि भुजैर्धारयन्तीं त्रिनेत्राम् ।**
**रक्तस्थां कालरात्रिप्रभृतिपरिवृतां स्निग्धभक्तैकसक्ताम्**
**श्रीमद्वीरेन्द्रवन्द्यामभिमतफलदां राकिणीं भावयामः ॥**



इति ध्यात्वा —

३ अनाहतस्थाने द्वादशदलकमलकर्णिकायां ३ रां रीं रूं रमलवरयूं राकिनि मां रक्ष २ मम रक्तधातुभागान् रक्ष २ सर्वसत्त्ववशङ्करि देव्यागच्छागच्छ इमां पूजां गृह्ण २ ऐं घोरे ह्रीं सः परमघोरे हूं घोररूपे एह्येहि नमश्चामुण्डे डरलकसह ऐं श्रीमहात्रिपुरसुन्दरि वरदे विच्चे कं खं गं······· टं ठं अनाहतपीठस्थे अनाहतराकिनि अनाहतनाथदेव श्रीपादुकां पूजयामि नमः । (हृदये)

३ कं कालरात्र्यै नमः । खं खण्डितायै नमः । गं गायत्र्यै नमः । घं घण्टाकर्षिण्यै नमः । ङं ङार्णायै नमः । चं चण्डायै नमः । छं छायायै नमः । जं जयायै नमः । झं झङ्कारिण्यै नमः । ञं ज्ञानरूपायै नमः । टं टङ्कहस्तायै नमः । ठं ठङ्कारिण्यै नमः ।

**दिक्पत्रे नाभिपद्मे त्रिवदनलसितां दंष्ट्रिणीं रक्तवर्णां,**
**शक्तिं दम्भोलिदण्डावभयमपि भुजैर्धारयन्तीं महोग्राम् ।**
**डामर्याद्यैः परीतां पशुजनभयदां मांसधात्वैकनिष्ठां,**
**गौडान्नासक्तचित्तां सकलसुखकरीं लाकिनीं भावयामः ॥**

इति ध्यात्वा—

मणिपूरस्थाने दशदलकमलकर्णिकायां ३ लां लीं लूं लमलवरयूं लाकिनि मां रक्ष २ मम मांस-धातुभागान् रक्ष २ सर्वसत्त्ववशङ्करि देव्यागच्छागच्छ, इमां पूजां गृह्ण २ ऐं घोरे ह्रीं सः परमघोरे हूं घोररूपे एह्येहि नमश्चामुण्डे डरलकसह ऐं श्रीमहात्रिपुरसुन्दरि वरदे विच्चे देवि डं ढं णं तं थं दं धं नं पं फं मणिपूरपीठस्थे मणिपूरलाकिनि मणिपूरनाथदेवश्रीपादुकां पूजयामि नमः । (मणिपूरे)

ऐं ह्रीं श्रीं डं डामर्यै नमः । ढं ढङ्कारिण्यै नमः । णं णार्णायै नमः ।
तं तामस्यै नमः । थं स्थाण्व्यै नमः । दं दाक्षायण्यै नमः ।
धं धात्र्यै नमः । नं नार्यै नमः । पं पार्वत्यै नमः ।
फं फट्कारिण्यै नमः ।

**स्वाधिष्ठानाख्यपद्मे रसदललसिते वेदवक्त्रां त्रिनेत्रां,**
**हस्ताब्जैर्धारयन्तीं त्रिशिखगुणकपालाङ्कुशानात्तगर्वाम् ।**
**मेदोधातुप्रतिष्ठामलिमदमुदितां बन्धिनीं मुख्ययुक्तां,**
**पीतां दध्योदनेष्टामभिमतफलदां काकिनीं भावयामः ॥**

इति ध्यात्वा—

स्वाधिष्ठानस्थाने षड्दलकमलकर्णिकायां ३ कां कीं कूं कमलवरयूं काकिनि मां रक्ष२ मेदोधातुभागान् रक्ष २ सर्वसत्त्ववशङ्करि देव्यागच्छागच्छ इमां पूजां गृह्ण २ ऐं घोरे ह्रीं सः परमघोरे हूं घोररूपे एह्येहि नमश्चामुण्डे डरलकसहऐं श्रीमहात्रिपुरसुन्दरि वरदे विच्चे देवि ३ बं भं मं यं रं लं स्वाधिष्ठानपीठस्थे स्वाधिष्ठानकाकिनि स्वाधिष्ठाननाथदेव–श्रीपादुकां पूजयामि नमः। (स्वाधिष्ठाने)

ऐं ह्रीं श्रीं बं बन्धिन्यै नमः। भं भद्रकाल्यै नमः। मं महामायायै नमः। यं यशस्विन्यै नमः। रं रक्तायै नमः। लं लम्बोष्ठ्यै नमः।

**मूलाधारस्थपत्रे श्रुतिदललसिते पञ्चवक्त्रां त्रिनेत्रां,**
**धूम्राभामस्थिसंस्थां सृणिमपि कमलं पुस्तकं ज्ञानमुद्राम्।**
**बिभ्राणां बाहुदण्डैः सुललितवरदापूर्वशक्त्यावृतां तां,**
**मुद्गान्नासक्तचित्तां मधुमदमुदितां साकिनीं भावयामः॥**

इति ध्यात्वा—

मूलाधारस्थाने चतुर्दलकमलकर्णिकायां ३ सां सीं सूं समलवरयूं साकिनि मां रक्ष २ ममास्थिधातुभागान् रक्ष २ सर्वसत्त्ववशङ्करि देव्यागच्छागच्छ इमां पूजां गृह्ण २ ऐं घोरे ह्रीं सः परमघोरे हूं घोररूपे एह्येहि नमश्चामुण्डे डरलकसहऐं श्रीमहात्रिपुरसुन्दरि वरदे विच्चे देवि ३ वं शं षं सं मूलाधारपीठस्थे मूलाधारसाकिनि मूलाधारनाथदेव श्रीपादुकां पूजयामि नमः। मूलाधारे ऐं ह्रीं श्रीं वं वरदायै नमः। शं श्रियै नमः। षं षष्ठायै नमः। सं सरस्वत्यै नमः।

**भ्रूमध्ये बिन्दुपद्मे दलयुगकलिते शुक्लवर्णां कराब्जैः—**
**बिभ्राणां ज्ञानमुद्रां डमरुकममलामक्षमालां कपालम्।**
**षड्वक्त्रां मज्जसंस्थां त्रिनयनलसितां हंसवत्यादियुक्तां,**
**हारिद्रान्नैकसक्तां सकलसुखकरीं हाकिनीं भावयामि॥**

ऐं ह्रीं श्रीं आज्ञास्थाने युगदलकमलकर्णिकायां ३ हां हीं हूं हमलवरयूं हाकिनि मां रक्ष २ मम मज्जाधातुभागान् रक्ष २ सर्वसत्त्ववशङ्करि देव्यागच्छागच्छ इमां पूजां गृह्ण २ ऐं घोरे ह्रीं सः परमघोरे हूं घोररूपे एह्येहि नमश्चामुण्डे डरलकसहऐं श्रीमहात्रिपुरसुन्दरि वरदे विच्चे देवि हं क्षं आज्ञापीठस्थे आज्ञाहाकिनि आज्ञानाथदेव श्रीपादुकां पूजयामि नमः। (आज्ञायाम्।)



ऐं ह्रीं श्रीं हं हंसवत्यै नमः। क्षं क्षमावत्यै नमः।

**मुण्डव्योमस्थपद्मे दशशतदलके कर्णिकाचन्द्रसंस्थां,**
**रेतोनिष्ठां समस्तायुधकलितकरां सर्वतो वक्त्रपद्माम्।**
**आदिक्षान्तार्णशक्तिप्रकरपरिवृतां सर्ववर्णां भवानीं,**
**सर्वान्नासक्तचित्तां परशिवरसिकां याकिनीं भावयामः॥**

सहस्रारस्थाने सहस्रदलकमलकर्णिकायां ३ यां यीं यूं यमलवरयूं याकिनि मां रक्ष २ शुक्रधातुभागान् रक्ष २ सर्वसत्त्ववशङ्करि देव्यागच्छागच्छ इमां पूजां गृह्ण २ ऐं घोरे ह्रीं सः परमघोरे हूं घोररूपे एह्येहि नमश्चामुण्डे डरलकसहऐं श्रीमहात्रिपुरसुन्दरि वरदे विच्चे देवि अं आं इं ईं……ळं क्षं ब्रह्मरन्ध्रपीठस्थे ब्रह्मरन्ध्रयाकिन्यम्बा ब्रह्मरन्ध्रनाथदेव श्रीपादुकां पूजयामि नमः। (सहस्रारे।)

ऐं ह्रीं श्रीं अं अमृतायै नमः। आं आकर्षिण्यै नमः। इं इन्द्राण्यै नमः। ईं ईशान्यै नमः। उं उमायै नमः। ऊं ऊर्ध्वकेश्यै नमः। ऋं ऋद्धयै नमः। ॠं ॠकारायै नमः। ऌं ऌकारायै नमः। ॡं ॡकारायै नमः। एं एकपदायै नमः। ऐं ऐश्वर्यात्मिकायै नमः। ओं ओंकारायै नमः। औं औषध्यै नमः। अं अम्बिकायै नमः। अः अक्षरायै नमः। कं कालरात्र्यै नमः। खं खण्डितायै नमः। गं गायत्र्यै नमः। घं घण्टाकर्षिण्यै नमः। ङं ङार्णायै नमः। चं चण्डिकायै नमः। छं छायायै नमः। जं जयायै नमः। झं झङ्कारिण्यै नमः। ञं ज्ञानरूपायै नमः। टं टङ्कहस्तायै नमः। ठं ठङ्कारिण्यै नमः। डं डङ्कारिण्यै नमः। ढं ढङ्कारिण्यै नमः। णं णार्णायै नमः। तं तामस्यै नमः। थं स्थाण्व्यै नमः। दं दाक्षायण्यै नमः। धं धात्र्यै नमः। नं नन्दिकायै नमः। पं पार्वत्यै नमः। फं फट्कारिण्यै नमः। बं बन्धिन्यै नमः। भं भद्रकाल्यै नमः। मं महामायायै नमः। यं यशस्विन्यै नमः। रं रमायै नमः। लं लम्बोष्ठ्यै नमः। वं वरदायै नमः। शं श्रियै नमः। षं षण्डायै नमः। सं सरस्वत्यै नमः। हं हंसवत्यै नमः। क्षं क्षमावत्यै नमः।

**अथ राशिन्यासः—**

अस्य श्रीराशिमातृकान्यासस्य दक्षिणामूर्तिर्ऋषिः गायत्रीछन्दः श्रीराशिस्वरूपिणी श्रीमहात्रिपुरसुन्दरी देवता श्रीविद्याङ्गत्वेन तत्प्रसादसिद्ध्यर्थे न्यासे विनियोगः।

**कर-हृदयादिन्यासाः—**

३ मां, मीं, मूं, मैं, मौं, मः–इत्यादिभिः कर्तव्याः।

**ध्यानम्—** **रक्तश्वेत-हरित्पाण्डु-चित्रकृष्णपिशङ्ककान् ।**
**कपिशबभ्रुकिर्मीरकृष्णधूम्रान् क्रमाद् भजे ॥**

| | | | |
|---|---|---|---|
| ऐं ह्रीं श्रीं | अं आं इं ईं | मेषाय नमः | दक्षपादे |
| ३ | उं ऊं | वृषाय नमः | लिङ्गदक्षभागे |
| ३ | ऋं ॠं लृं लॄं | मिथुनाय नमः | दक्ष-कुक्षौ |
| ३ | एं ऐं | कर्काय नमः | हृदयदक्षभागे |
| ३ | ओं औं | सिंहाय नमः | दक्षबाहुमूले |
| ३ | अं अः शं षं सं हं ळं | कन्यायै नमः | दक्षशिरोभागे |
| ३ | कं खं गं घं ङं | तुलायै नमः | वामशिरोभागे |
| ३ | चं छं जं झं ञं | वृश्चिकाय नमः | वामबाहुमूले |
| ३ | टं ठं डं ढं णं | धनुषे नमः | हृदयवामभागे |
| ३ | तं थं दं धं नं | मकराय नमः | वामकुक्षौ |
| ३ | पं फं बं भं मं | कुम्भाय नमः | लिङ्गवामभागे |
| ३ | यं रं लं वं | मीनाय नमः | वामपादे |

**पीठन्यासः—**

अस्य श्रीपीठमातृकान्यासस्य दक्षिणामूर्तिऋषिर्गायत्रीछन्दः पीठ रूपिणी श्रीमहात्रिपुरसुन्दरी देवता मम श्रीविद्याङ्गत्वेन न्यासे विनियोगः ।

**कर-हृदयादिन्यासाः**—'कां, कीं कूं कैं कौं कः' इत्यादिभिः कर्तव्याः ।

**ध्यानम्—** **सितासितारुणश्याम-हरित्पीतान्यनुक्रमात् ।**
**वन्दे क्रमेण देवेश्याः पञ्चाशत्पीठसञ्चयान् ॥**

इति भावयित्वा मातृकाभिः समं पूर्वोक्तेषु तासां स्थानेषु पीठानि क्रमेण विन्यसेत् । यथा —

| | | | |
|---|---|---|---|
| ऐं ह्रीं श्रीं | अं | कामरूपाय नमः | शिरसि |
| ३ | आं | वाराणस्यै नमः | मुखवृत्ते |
| ३ | इं | नेपालाय नमः | दक्षनेत्रे |
| ३ | ईं | पौण्ड्रवर्धनाय नमः | वामनेत्रे |
| ३ | उं | पुरस्थितकाश्मीराय नमः | दक्षकर्णे |
| ३ | ऊं | कान्यकुब्जाय नमः | वामकर्णे |
| ३ | ऋं | पूर्णशैलाय नमः | दक्षनासायाम् |
| ३ | ॠं | अर्बुदाचलाय नमः | वामनासायाम् |
| ३ | लृं | आम्रातकेश्वराय नमः | दक्षगण्डे |



| | | | |
|---|---|---|---|
| ऐं ह्रीं श्रीं | लॄं | एकाम्राय नमः | वामगण्डे |
| ३ | एं | त्रिस्रोतसे नमः | ऊर्ध्वोष्ठे |
| ३ | ऐं | कामकोटये नमः | अधरोष्ठे |
| ३ | ओं | कैलासाय नमः | उर्ध्वदन्तपंक्तौ |
| ३ | औं | भृगुनगराय नमः | अधोदन्तपंक्तौ |
| ३ | अं | केदाराय नमः | जिह्वाग्रे |
| ३ | अः | चन्द्रपुष्करिण्यै नमः | कण्ठे |
| ३ | कं | श्रीपुराय नमः | दक्षबाहुमूले |
| ३ | खं | ओङ्काराय नमः | दक्षकूर्परे |
| ३ | गं | जालन्धराय नमः | दक्षमणिबन्धे |
| ३ | घं | मालवाय नमः | दक्षकरांगुलिमूले |
| ३ | ङं | कुलान्तकाय नमः | दक्षकरांगुल्यग्रे |
| ३ | चं | देवीकोटाय नमः | वामबाहुमूले |
| ३ | छं | गोकर्णाय नमः | वामकूर्परे |
| ३ | जं | मारुतेश्वराय नमः | वाममणि. |
| ३ | झं | अट्टहासाय नमः | वामकरांगुलिमूले |
| ३ | ञं | विरजायै नमः | वामकरांगुल्यग्रे |
| ३ | टं | राजगेहाय नमः | दक्षोरूमूले |
| ३ | ठं | महापथाय नमः | दक्षजानुनि |
| ३ | डं | कोल्हापुराय नमः | दक्षगुल्फे |
| ३ | ढं | एलपुराय नमः | दक्षपादांगुलिमूले |
| ३ | णं | कालेश्वराय नमः | दक्षपादांगुल्यग्रे |
| ३ | तं | जयन्तिकायै नमः | वामोरुमूले |
| ३ | थं | उज्जयिन्यै नमः | वामजानुनि |
| ३ | दं | चित्रायै नमः | वामगुल्फे |
| ३ | धं | क्षीरिकायै नमः | वामपादांगुलिमूले |
| ३ | नं | हस्तिनापुराय नमः | वा.पादांगुल्यग्रे |
| ३ | पं | उड्डीशाय नमः | दक्षपार्श्वे |
| ३ | फं | प्रयागाय नमः | वामपार्श्वे |
| ३ | बं | षष्ठीशाय नमः | पृष्ठे |
| ३ | भं | मायापुर्यै नमः | नाभौ |
| ३ | मं | जलेशाय नमः | जठरे |
| ३ | यं | मलयाय नमः | हृदये |

ऐं ह्रीं श्रीं रं श्रीशैलाय नमः दक्षस्कन्धे
३ लं मेरवे नमः गलपृष्ठे
३ वं गिरिवराय नमः वामस्कन्धे
३ शं महेन्द्राय नमः हृदयादिदक्षकरांगुल्यन्तम्
३ षं वामनाय नमः हृदयादिवामकराङ्गुल्यन्तम्
३ सं हिरण्यपुराय नमः हृदयादिदक्षपादाङ्गुल्यन्तम्
३ हं महालक्ष्मीपुराय नमः ,, वाम ,,
३ ळं ओड्याणाय नमः ,, गुह्यान्तम्
३ क्षं छायाच्छत्राय नमः ,, मूर्धान्तम्

इति लघुषोढान्यासः ।

## अथ श्रीविद्याषोढान्यासः

### ऊर्ध्वाम्नायस्य[1]

अस्य श्रीविद्याषोढान्यासस्य श्रीआदिप्रकृतिर्ऋषिः, महतीच्छन्दः श्रीमहात्रिपुरसुन्दरी देवता ॐ ऐं ह्रीं श्रीं ५ ऐं क ५ तत्सवितुः····प्रचोदयात् । परोरजसे सावदोम् ५ बीजं ॐ ऐं ह्रीं श्रीं ५ क्लीं ह ६ जातवेदसे···· त्यग्निः—इति शक्तिः ॐ ऐं ह्रीं श्रीं ५ सौः ४ त्र्यम्बकं·······५ कीलकं श्रीविद्याषोढान्यासे विनियोगः । ऋष्यादिन्यासः, कर-हृदयादिन्यासाश्च कर्तव्याः ।

**ध्यानम्**—

**अनन्तं चिन्तयेद् धीमान्, सहस्रफणिमण्डपम् ।**
**तन्मध्ये फणिशृङ्गान्ते, महाप्रेतं विचिन्तयेत् ॥**

1—आदिशक्तिरुवाच—

अथातः सम्प्रवक्ष्यामि. विद्या-षोढा महत्तरम् ।
मन्त्री तां न्यासमात्रेण जीवन्मुक्तो न संशयः ॥
मम न्यासादिकं कृत्वा, ध्यात्वा ऋष्यादिपूर्वकम् ।
श्रीविद्याया महेशान्या, वर्णन्यासं समाचरेत् ॥
षोढान्यासं प्रकुर्वीत, श्रीविद्याया महाप्रभो ।
आद्यः **सिद्धेश्वरीन्यासो** द्वितीयस्तु **परापरे** ॥
तृतीयस्तु **महाविद्या** चतुर्थस्तु **महाकला** ।
पञ्चमः स्याद् **बीजकला** षष्ठं तदवरोधकम् ।
पूर्वोक्ते शाम्भवे पीठे सहस्रफणवराटके ॥



**हिरण्यगर्भं षड्वक्त्रं, पञ्चप्रेतासनस्थितम् ।**
**तस्य मूर्ध्नि महाप्राज्ञः, कमलं चन्द्ररोचिषम् ॥**
**कर्णिकायां महेशानं, पद्मरागाकृतिं स्मरेत् ।**
**कलाब्जं चिन्तयेत्तत्र, महाकालकलालयम् ॥**
**महारक्तप्रभां देवीं, श्रीविद्यां मनसा स्मरेत् ।**
**आधारादिकलाचक्रां, ध्यात्वा मूले विचिन्तयेत् ॥**
**तडित्कोटिप्रभापुञ्ज - कैवल्याग्निसमोपमाम् ।**
**त्रिपुरात्म - त्रिकोणस्थां, मूलविद्यास्वरूपिणीम् ॥**
**गुरूपदिष्टविधिना, प्रोत्थितां चिन्तयेत् सुधीः ।**
**इति ध्यात्वा सुरेशान, विन्यसेत् परमेश्वरीम् ॥**

**तत्रादौ सिद्धेश्वरीन्यासः**—

१. ॐ ऐं ह्रीं श्रीं ५ अं–अः १६ क १५ कं सन्ध्यारूपिण्ये कालनित्यात्मिकायै सात्त्विक - ककार - भट्टारक-पीठस्थितायै कामेश्वराङ्कनिलयायै कामेश्वरीमहाभट्टारिकायै खड्गसिद्धेश्वर्यै नमः श्रीं ५ । मूलाधारे

२. ॐ ऐं ह्रीं श्रीं ५ कं-ङं ऐं हं १५ वर्णरूपिणीमातृकात्मिकायै महासात्त्विकभोगद-एकार-भट्टारकपीठस्थितायै एकवीरकामेश्वराङ्कनिलयायै ए - कला - ललिता - महाभट्टारिकायै पादुकासिद्धेश्वर्यै नमः श्रीं ५ । स्वाधिष्ठाने

३. ॐ ऐं ह्रीं श्रीं ५ चं-अं ई क (४) हसकल ह्रीं हसकल ह्रीं ह ए ई ल ह्रीं नफलवरयीं मालिन्यादिरूपिणी - निष्कलामातृकात्मिकायै शुद्ध सात्विक - मोक्षदईकार-भट्टारक - पीठस्थितायै ईश्वरकामेश्वराङ्कनिलयायै ईश्वरीललितामहाभट्टारिकायै अज्जनसिद्धेश्वर्यै नमः श्रीं ५ । मणिपूरे

४. ॐ ऐं ह्रीं श्रीं ५ टं ·· णं क (४) ह क ए ईल ह्रीं सकए ईल ह्रीं गणेशादि - रूपिणी - विराजात्मिकायै-सात्त्विक-लकारभट्टारकपीठस्थितायै ललितलक्षस्तरकामेश्वराङ्क - निलयायै लक्षसारा-ललिता-महाभट्टारिकायै बलवीरसिद्धेश्वर्यै नमः । श्रीं ५ । अनाहते

५. ॐ गं ह्रीं श्रीं ५ तं·······नं ह्रीं हसकएईल ह्रीं सहकएईल ह्रीं मण्डूकादियोगसिंहासनात्मिकायै निष्कलसात्त्विकह्रीङ्कारभट्टारकपीठस्थितायै हृदयकामेश्वराङ्कनिलयायै हृल्लेखा-ललिता-महाभट्टारिकायै ५ वाक्सिद्धेश्वर्यै नमः श्रीं ५ । वक्षसि

६. ॐ ऐं ह्लीं श्रीं ५ पं···· मं हं कं ४ ह ५ सहसकल ह्लीं तिथि-रूपिणे नित्यात्मकाय राजसहकारभट्टारकपीठस्थिताय हलिनीललिता-भूषिताङ्काय हलिककामेश्वरभट्टारकाय देहसिद्धेश्वराय नमः। श्रीं ५ कण्ठे

७. ॐ ऐं ह्लीं श्रीं ५ यं···शं स ३ सएईल ह्लीं सहकहल ह्लीं सभृङ्गा-रादिरूपिणे अणिमाद्यात्मकाय भोगद-राजस-सकार-भट्टारकपीठस्थिताय सरस्वतीललिताभूषिताङ्काय सर्वज्ञकामेश्वरभट्टारकाय लोहसिद्धेश्वराय नमः। श्रीं ५। मुखे

८. ॐ ३-५-षं सं हं क्षं कं क ५ हकहल ह्लीं सहकल ह्लीं प्रतिबिम्ब-रूपिणे पञ्चपञ्चिकात्मकाय कामद-राजस-तामस-ककार-भट्टारकपीठ-स्थिताय कमलाललिताभूपिताङ्काय कालियमर्दनकामेश्वरभट्टारकाय अणि-मादिमहासिद्धेश्वराय नमः। श्रीं ५। नेत्रयोः

९. ॐ ३-५-क्षं लं हं सं हं एं क ५ ह ६ सहकल ह्लीं महाप्रेतरूपिणे पञ्चसिंहात्मकाय मोक्षदराजसहकारभट्टारकपीठस्थिताय हरिवल्लभा-ललिताभूषिताङ्काय हरनाथकामेश्वरभट्टारकाय सर्ववश्यसिद्धेश्वराय नमः। श्रीं ५। आज्ञायाम्

१०. ॐ ३-५ शं वं लं रं यं लं क १५ दिग्रूपाम्नायदर्शनात्मकाय मुक्तिद-राजस-लकारभट्टारकपीठस्थिताय लक्ष्मीललिताभूषिताङ्काय लल-ज्जिह्वाकामेश्वरभट्टारकाय सर्वाकर्षणसिद्धेश्वराय नमः श्रीं ५। ललाटे

११. ॐ ऐं ह्लीं श्रीं ५ मं भं वं फं पं ह्लीं हसकहल सकल ह्लीं ह ५ स ३ विश्वरूपप्रपञ्चाद्यात्मकाय तामस - ह्लीङ्कार - भट्टारकपीठस्थिताय हिरण्याललिताभूपिताङ्काय हृदयेश्वरकामेश्वरभट्टारकाय सर्वसम्मोहन-सिद्धेश्वराय नमः श्रीं ५। इन्दौ

१२. ॐ ३–५ नं धं दं थं तं सं क ४ **सह सकल** ह्लीं **स ए ईल** ह्लीं ह ५ स ३ त्रिपुष्कररूपिणे चतुर्लिङ्गात्मकाय महातामस– सकार-भट्टारकपीठस्थिताय सकलजननी-ललिताभूपिताङ्काय सर्वेश्वरसकलेश्वर-कामेश्वरभट्टारकाय सर्वस्तम्भनसिद्धेश्वराय नमः श्रीं ५। बिन्दौ

१३. ॐ ३-५ णं ढं डं ठं टं कं क १५ मानसादिरूपिणे षडन्वयात्म-काय परतामस-राजस-ककारभट्टारकपीठस्थिताय कामकोटिललिता-भूषिता-ङ्काय करुणाकरकामेश्वरभट्टारकाय धर्मार्थकाममोक्षपुरुषार्थचतुष्टयसिद्धे-श्वराय नमः श्रीं ५। वृत्ते



१४. ॐ ३-५ ञं झं जं छं चं लं क ४ सहएईल ह्लीं चरणादिरूपिणे-निर्वाणशाम्भवात्मकाय अतितामसराजस-लकार-भट्टारक-पीठस्थिताय लीला-वतीललिताभूषिताङ्काय लावण्य-नायक-कामेश्वरभट्टारकाय नित्यानन्द-सिद्धेश्वराय नमः श्रीं ५। नादे

१५. ॐ ३-५ ङं घं गं खं कं ह्लीं हसकसहल ह्लीं स ३ शून्यरूपिणे महाशाम्भवात्मकाय शुद्धतामसराजसह्लीङ्कारभट्टारकपीठस्थिताय हिरण्ये-श्वरीललिताभूषिताङ्काय हिरण्यबाहुकामेश्वरभट्टारकाय मोक्षसिद्धेश्वराय नमः। श्रीं ५। नादान्ते

१६. ॐ ३–५ अं १५ क एईल हसकहल सकल ह्लीं (१३) हसकल हसकहल सकल ह्लीं (१३) महाशून्यरूपिण्यै महाविद्यात्मिकायै त्रिगुणा-तीत-श्रीङ्कारभट्टारकपीठस्थितायै महाकामेश्वराङ्कनिलयायै श्रीमहात्रिपुरा-ललितामहाभट्टारिकायै सर्वसिद्धेश्वराय नमः। श्रीं ५। ब्रह्मरन्ध्रे

ॐ ३–५ अं ५० क १५ क्षं ५० सर्वसिद्धेश्वराधिदेवतायै श्रीमहात्रि-पुरसुन्दरीपराम्बायै नमः श्रीं ५। इति सर्वाङ्गं व्याप्य।

**एताः पाशाङ्कुशकरा बाणकार्मुकपाणयः।**
**मूलदेव्यो यथारूपं तथैव मनसा स्मरेत् ॥**

इति सिद्धेश्वरीन्यासः।

**अथ परमेश्वरीन्यासः—**

तत्र पूर्वोक्तवर्णकमलं अकथादित्रिधा विभाव्य—

ॐ ३–५ अं श्रीं श्रीपरमेश्वरी श्रीमहात्रिपुरसुन्दरी श्रीं ५ आधारे

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ,, | आं | ह्ली | विश्वेश्वरी परापरेश्वरी नमः श्रीं ५ | | | | स्वाधि. |
| ,, | इं | क्लीं | कामेश्वरी | ,, | ,, | ,, | मणिपूरे |
| " | ईं | ऐं | वीरेश्वरी | ,, | ,, | ,, | अनाहते |
| ,, | उं | सौः | अनुत्तरा | ,, | ,, | ,, | वक्षसि |
| ,, | ऊं | ॐ | निःश्रेयसालया | ,, | ,, | ,, | कण्ठे |
| ,, | ऋं | ह्लीं | हृदयोदरालया | ,, | ,, | ,, | मुखे |
| ,, | ॠं | श्रीं | श्रीविद्या | ,, | ,, | ,, | नेत्रयोः |
| ,, | ऌं | क ४ | त्रिपुरावागीश्वरी | ,, | ,, | ,, | आज्ञायाम् |
| ,, | ॡं | ह ५ | त्रिपुराकामेश्वरी | ,, | ,, | ,, | ललाटे |
| ,, | एं | स ३ | त्रिपुरामृतेश्वरी | ,, | ,, | ,, | इन्दौ |
| ,, | ऐं | सौः | निष्कला | ,, | ,, | ,, | बिन्दौ |

ॐ ३–५ ऐं ऐं महाविद्या परापरमेश्वरी नमः श्रीं ५ वृत्ते

,, औं क्लीं कामकला ,, ,, ,, नादे

,, अं ह्लीं जगदीश्वरी ,, ,, ,, नादान्ते

,, अः श्रीं महात्रिपुरसुन्दरी ,, ,, ,, ब्रह्मरन्ध्रे

इति परापरमेश्वरीन्यासः ।

**अथ महाविद्यान्यासः** ( श्रीबीजरूपा षोडशी )

ॐ ऐं ह्रीं श्रीं ५ कं श्रीं श्रीं कं १५ श्रीबीजषोडशी श्रीविद्यारूपिणी श्रीपरब्रह्मात्मिका महात्रिपुरसुन्दरीं श्रीं ५ । सौः ५ । आधारे

ॐ ३–५ ह्रीं क्लीं ऐं सौः खं ह्रीं ह्रीं क १५ मायादिषोडशी श्रीविद्यारूपिणी श्रीपरब्रह्मात्मिकामहात्रिपुरसुन्दरी श्रीं ५ सौः ५ स्वाधिष्ठाने

ॐ ३-५ श्रीं ह्रीं क्लीं ऐं सौः गं क्लीं क्लीं क १५ कामादि षोडशी श्री .... .... .... .... .... श्रीं सौः ५ ,, मणिपूरे

ॐ ३-५ घं ऐं ऐं क १५ वागादिषोडशी० ,, अनाहते

ॐ ३-५ ङं सौः सौः क १५ परादिषोडशी ,, वक्षसि

ॐ ३-५ चं ॐ ॐ क १५ तारादिषोडशी० ,, कण्ठे

ॐ ३-५ छं ह्रीं ह्रीं श्रीं ॐ श्रीं ५ क १५ सौः ५ ईश्वर्यादिषोडशी मुखे

ॐ ३-५ जं श्रीं श्रीं ह ५ क ४ स ३ रमादिषोडशी ,, नेत्रयोः

ॐ ३-५ झं क ४ क ४ हसौं क १५ शिवादिषोडशी ,, आज्ञायाम्

ॐ ३-५ ञं क ५ ह ६ ॐ ह्रीं श्रीं क १५ मदनषोडशी ,, ललाटे

ॐ ३-५ टं स ३ स ३ स्हौं क १५ सत्यादिषोडशी ,, इन्दौ

ॐ ३-५ ठं सौः सौः श्रीं ह्रीं क्लीं ऐं ॐ क १५ ऐं ५ नामषोडशी,, विन्दौ

ॐ ३-श्रीं ४ डं ऐं ऐं क १५ ह्रीं श्रीं ॐ ३ श्रीं ५ वामादिषोडशी ,, वृत्ते

ॐ ३-श्रीं ४ ढं क्लीं क्लीं क १५ ॐ ५ सौः रत्यादिषोडशी ,, नादे

ॐ ३-श्रीं ४ णं ह्रीं ह्रीं क १५ ब्रह्मविद्याषोडशी ,, नादान्ते

ॐ ३-श्रीं ४ तं श्रीं श्रीं क १५ श्रीविद्याषोडशीविद्या ,, ब्रह्मरन्ध्रे

इति महाविद्येश्वरीन्यासः ।

**अथ महाकालाधीश्वरीन्यासः**—

ॐ ऐं ह्रीं श्रीं श्रीं ह्रीं क्लीं ऐं सौः थं श्रीं परा-कलारूपिणी श्रीमहात्रिपुरसुन्दरी श्रीं सौः ऐं क्लीं ह्रीं श्रीं । आधारे

ॐ ३ श्रीं ४ दं ह्रीं पश्यन्ती-कलारूपिणी........श्रीं सौः ४ मणिपूरे



ॐ ३ श्रीं ४ धं क्लीं मध्यमा-कलारूपिणी श्रीं सौः ४ अनाहते

,, श्रीं ४ नं ऐं वैखरी-कलारूपिणी ,, वक्षसि

,, पं सौः साकार-कलारूपिणी ,, कण्ठे

,, बं ह्रीं निरामया-कलारूपिणी ,, मुखे

,, भं श्रीं चिदानन्द-कलारूपिणी ,, नेत्रयोः

,, मं क ४ पातालव्यापिनी-कलारूपिणी ,, आज्ञायाम्

,, श्रीं४ यं ह ५ मर्त्यव्यापिनीकलारूपिणी श्रीमहात्रिपुरासुन्दरी ललाटे

,, रं स ३ स्वर्गव्यापिनीकलारूपिणी ,, इन्दौ

,, लं सौः ४ आकाशव्यापिनीकलारूपिणी ,, बिन्दौ

,, वं ऐं महदाकाशव्यापिनीकलारूपिणी ,, नादे

,, शं षं ह्रीं विश्वव्यापिनीकलारूपिणी ,, नादान्ते

,, सं हं क्ष श्रीं विश्वाङ्कुराव्यापिनीकला ,, ब्रह्मरन्ध्रे

इति महाकलाधीश्वरीन्यासः ।

**अथ बीजकलान्यासः** (वर्णारविन्दान्तर्गतकलाब्जे)

ॐ ऐं ह्रीं श्रीं श्रीं ह्रीं क्लीं ऐं सौः अं कं थं हं श्रीं चित्कलापराम्बायै नमः श्रीं सौं ऐं क्लीं ह्रीं श्रीं आधारे

ॐ ३ श्रीं ४ आं खं दं ठं ह्रीं सकलापराम्बायै नमः श्रीं सौ ४ स्वाधिष्ठाने

,, इं गं धं क्षं क्लीं ज्ञानापराम्बायै नमः ,, मणिपूरे

,, ईं घं नं ऐं संवित्कलापराम्बायै नमः ,, अना.

,, उं ङं पं सौः विरागताकलाम्बायै नमः ,, वक्षसि

,, ऊं चं फं ॐ मोक्षकलाम्बायै नमः ,, कण्ठे

,, ऋं छं बं ह्रीं परमाणुकलाम्बायै नमः ,, मुखे

,, ॠं जं भं श्रीं विद्याकलाम्बायै नमः ,, नेत्रयोः

,, ऌं झं मं क ४ विज्ञानकलाम्बायै नमः ,, आज्ञायाम्

,, ॡं ञं यं ह ५ सन्तोषकलाम्बायै नमः ,, ललाटे

,, एं टं रं स ३ तृप्तिकलाम्बायै नमः ,, इन्दौ

,, ऐं ठं लं सौः परब्रह्मप्रकाशिनीकलाम्बायै नमः ,, बिन्दौ

,, ओं डं वं ऐं शक्तिकलाम्बायै नमः ,, वृत्ते

,, औं ढं शं क्लीं ऊर्ध्वाधःकलाम्बायै नमः ,, नादे

,, अं णं षं ह्रीं व्याप्तिकलाम्बायै नमः ,, नादान्ते

,, अः तं सं श्री पराकलाम्बायै नमः ,, ब्रह्मरन्ध्रे

इति बीजकलान्यासः ।

इति विन्यस्य कर्णिकायां अकथादित्रिकोणं विभाव्य त्रिपुरकोणेषु चरणत्रयं (ब्रह्मरन्ध्रे) न्यसेत् ।

**अथचरणन्यासः —**

ॐ ऐं ह्रीं श्रीं श्रीं ह्रीं श्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं क एईलह्सकहल सकल ह्रीं श्रीं ह्रीं ॐ सौः ऐं क्लीं ह्रीं रक्तचरणश्रीपादुकां पूजयामि नमः।

ॐ ३ श्रीं ह्रीं क्लीं ऐं सौः क १३····ऐं ह्रीं श्रीं ह सौः स्हौं हंसः सोहं शिवः स्हों स्हौं श्रीं ह्रीं ऐं क १३ सौः ऐं क्लीं ह्रीं श्रीं शुक्लचरणश्रीपादुकां ।

ॐ ३ श्रीं ४ ॐ ह्रीं श्रीं क १३ ऐं ह्रीं श्रीं ह्स्ख्फ्रें हसौं स्हौं ऐं फें ह सौः ह्स्ख्फ्रों श्रीं ह्रीं ऐं ह्रीं १५ श्रीं ह्रीं ॐ सौः ऐं क्लीं ह्रीं श्रीं मिश्र-चरणश्री० ।

ॐ ३ श्रीं ४ श्रीं क १३ सौः ऐं क्लीं ह्रीं श्रीं तुरीयचरणश्रीपादुकां०

( इति त्रिकोणमध्यदक्षिणतः । )

ॐ ३ श्रीं ४ ॐ ह्रीं श्रीं क १५ ह्स्रौं ह्स्क्रें··········लज्स्रीं हस हस ह्स्रौं क १३ न्फं ह्लीं श्रीं ह्रीं ॐ हसौं स्हौं सौः ऐं क्लीं ह्रीं श्रीं तुरीयातीत-चरणश्रीपादुकां । (इति त्रिकोणमध्यवामतः ।)

ॐ ऐं ह्रीं श्रीं श्रीं ४ श्रीं क १५ ॐ ह्रीं श्रीं क १५ श्रीं ह १५ सौः ऐं क्लीं ह्रीं श्रीं श्रीं परापरनिर्वाणचरणश्रीपादुकां पूजयामि । (इति तयोर्मध्ये ।)

ततस्तेनैव ध्यायेत् ।

**यत्कामुकः परशिवः खलु चिन्मयोऽपि**
**कामेश्वरत्वमगमज्जगतां हिताय ।**
**यत् सर्वदा वरदयावृतपुष्पबाण—**
**मोक्षप्रदं किमपि वस्तु ममाविरस्तु ।। इति ध्यात्वा—**

ॐ ऐं ह्रीं श्रीं श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं १५ सौं ४— ऐं क्लीं ह्रीं श्रीं अष्टादशाक्षरी— निर्वाणोत्तीर्ण— परब्रह्मस्वरूपा — महानिर्वाणकलातीता श्री महात्रिपुरसुन्दरीपादुकां पूजयामि तर्पयामि नमः ।

इति मानसैरूपचारैः सम्पूज्य मूलविद्यां यथाशक्ति जप्त्वा, जपं निवेद्य, योनिमुद्रया प्रणम्य, द्वितीयचरणविद्यां विन्यस्य, तत उक्तरीत्या अवरोहसिद्धेश्वरीन्यासं विधाय ताः सर्वाः तत्समानरूपाः प्रत्येकं षष्ट्युत्तर त्रिशतरश्मिपरिखाऽऽवृता ध्येयाः ।

**इति विन्यस्य देवेशीं, ध्यात्वा तां चिन्मयीं पराम् ।**
**संघट्टमुद्रया देवीं, पूजयेदुपचारकैः ।। १ ।।**



**क्षोभिण्याद्याः शक्ररूप १४ स्कन्धिनी दण्डिनीति च ।**
**कलामुद्रां प्रदर्श्याथ संस्मरेत् षोडशीं पराम् ।। २ ।।**

**आद्यं[1] बीजं समुच्चार्य, ब्रह्महत्यां विनाशयेत् ।**
**द्वितीयं सर्वविश्वानां, प्रादक्षिण्यफलं लभेत् ।। ३ ।।**

**तृतीयं सर्वविद्यानां, पारायणफलं लभेत् ।**
**चतुर्थं तु क्रियारूपमज्ञानतिमिरापहम् ।। ४ ।।**

**पञ्चमं राजसूयञ्च, शतकोटिफलं लभेत् ।**
**षष्ठं निर्वाणफलदं, सप्तमं श्रीकरं परम् ।। ५ ।।**

**अष्टमं सर्वसाम्राज्यं, लोकालोकाधिपत्यदम् ।**
**नवमं वाक्यदं देवं, दशमं सर्वकामदम् ।। ६ ।।**

**एकादशं महादेवं, निग्रहानुग्रहप्रदम् ।**
**त्रिकालं ज्ञानदं पश्चात्, स्वात्मज्ञानप्रदं ततः ।। ७ ।।**

**शक्रबीजं समुच्चार्य, ऋद्धिसिद्धिर्भवेत् प्रभो ।**
**बीजं पञ्चदशं प्रोक्तं, शिवत्वफलदायकम् ।। ८ ।।**

**महामुक्तिप्रदं देव, षोडशाख्यं परात्परम् ।**
**महासप्तदशी विद्या, तल्लीना तत्स्वरूपिणी ।। ९ ।।**

**अष्टादशाक्षरी विद्या, स्वस्वरूपात्मविग्रहा ।**
**तस्याः फलं न जानीमो, न जानीमः पुनः पुनः ।।१०।।**

**तस्या विज्ञानमात्रेण, जीवन्मुक्तो न संशयः ।**
**मयाऽपि च त्वया चैव, वन्दनीयो भवेद् ध्रुवम् ।।**

इति श्रीविद्या-षोढान्यासः ।

( ॐ ऐं ह्रीं श्रीं क्लीं स्त्रीं हूं स्त्रौं क्षौं छ्रीं फ्रें ग्लूं क्ष्म्लीं इति बाला द्वादशाक्षरी बोध्या । )

---

१. वाग्भवम् । वाग् माया रमा वाक् कामशक्तिः ।

## अथ श्रीविद्यामहाषोढा-न्यासः[1]

अस्य श्रीश्रीविद्या-महाषोढान्यासस्य ब्रह्मा ऋषिः, जगतीच्छन्दः, श्रीमदर्धनारीश्वरो देवता प्रपञ्च-भुवनं बीजं, मूर्तिमन्त्रशक्तिर्दैवतमातरः कीलकं, श्रीविद्याङ्गत्वेन न्यासे विनियोगः ।

**ऋष्यादिन्यासः—**

ब्रह्मणे ऋषये नमः–शिरसि । जगतीच्छन्दसे नमः–मुखे । श्रीमदर्धनारीश्वरदेवतायै नमः हृदये । विनियोगाय नमः–सर्वाङ्गे ।

**अङ्गन्यासाः —**

**१-अङ्गुलीन्यासः** 'ॐ ऐं ह्रीं श्रीं ह्सौः स्हौः' हौं ईशानाय नमः अङ्गुष्ठयोः

| | | | |
|---|---|---|---|
| | ६ | हें तत्पुरुषाय नमः | तर्जन्योः |
| | ६ | हुं अघोराय नमः | मध्यमयोः |
| | ६ | हिं वामदेवाय नमः | अनामिकयोः |
| | ६ | हं सद्योजाताय नमः | कनिष्ठिकयोः |
| **२-देहन्यासः** | ६ | हौं ईशानाय नमः | मूर्ध्नि |
| | ६ | हें तत्पुरुषाय नमः | मुखे |
| | ६ | हुं अघोराय नमः | हृदये |
| | ६ | हिं वामदेवाय नमः | गुह्ये |
| | ६ | हं सद्योजाताय नमः | पादयोः |
| **३-वक्त्रन्यासः** | ६ | हौं ईशानायोर्ध्ववक्त्राय नमः | मूर्ध्नि-अङ्गुष्ठेन |
| | ६ | हें तत्पुरुषाय पूर्ववक्त्राय नमः | मुखे-तर्जन्या |
| | ६ | हुं अघोराय दक्षिणवक्त्राय नमः | दक्षकर्णे मध्यमया |
| | ६ | हिं वामदेवायोत्तरवक्त्राय नमः | वामकर्णेऽनामिकया |
